स्वाध्याय

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org



जैन विश्व भारती

द्वारा प्रकाशित साहित्य उपलब्ध है online

http://books.jvbharati.org

घर बैठे सत्साहित पाए।

स्वाध्याय का आनन्द उठाएं।।

जैन विश्व भारती

पोस्ट : लाडनू–341306

जिला : नागौर (राज.)

फोन नं. : (01581) 226080, 224671

ई–मेल : books@jvbharati.org

स्वाध्याय

आचार्य महाप्रज्ञ

जैन विश्व भारती प्रकाशन

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

प्रकाशक :
जैन विश्व भारती
पोस्ट : लाडनूं–341306
जिला : नागौर (राज.)
फोन नं. : (01581) 226080, 224671
ई–मेल : books@jvbharati.org

Books are available online at
https://books.jvbharati.org

ISBN No. : 978-81-938763-7-4

© जैन विश्व भारती, लाडनूं

प्रथम संस्करण : सितम्बर 2018 (500 प्रतियां)
मूल्य : नब्बे रुपये मात्र
मुद्रक : पायोराईट प्रिन्ट मीडिया प्रा. लि., उदयपुर

SWADHIYAY - By Acharya Mahaprajna ₹ 90/-

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

अनुक्रमणिका

1. अमृतार्चना	5
2. सिद्ध स्तवनम्	6
3. श्री पैंसठिया यंत्र और छंद	8
4. श्री वज्रपंजर स्तोत्र	9
5. महावीर अष्टकम् (1)	10
6. महावीर अष्टकम् (2)	12
7. भिक्षु अष्टकम्	13
8. तुलसी अष्टकम्	15
9. महाप्रज्ञ अष्टकम्	16
10. गौतम कुलकम्	18
11. रत्नाकर पंचविंशिका	20
12. परमात्म द्वात्रिंशिका	22
13. अन्ययोगव्यवच्छेदिका	25
14. अयोगव्यवच्छेदिका	28
15. कर्त्तव्य–षट्त्रिंशिका	31
16. संघ–षट्त्रिंशिका	35

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

17. श्री भक्तामर स्तोत्रम् 38
18. कल्याण–मंदिर–स्तोत्रम् 46
19. चतुर्विंशति–गुण–गेय–गीतिः 53
20. आलंबन–सूत्र 58
21. नीति–शतकम् 63
22. षड्दर्शन–समुच्चयः 77
23. शांत–सुधारस–भावना 85
24. सिन्दूरप्रकर 107
25. पंचसूत्रम् 126
26. जैन सिद्धांत दीपिका 147
27. भिक्षु न्यायकर्णिका 163

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

1. अमृतार्चना

—आचार्य महाप्रज्ञ

1. सुघोषः सुतोषः सुदिव्यानुभूतिः,
परात्मा परात्मा प्रभुताविभूतिः।
प्रकाशी तमिस्राप्रमाथी दिनेशः,
चिरायुः चिरायुः प्रभूयाद् गणेशः।।
2. सदानन्दसिद्धिः चिदानन्दवृद्धिः,
प्रकर्ष—प्रणीता प्रकृष्टा समृद्धिः।
विकासः समग्रः प्रसिद्धप्रदेशः,
चिरायुः चिरायुः प्रभूयाद् गणेशः।।
3. न देशस्य सीमा न कालस्य सीमा,
असीमः असीमोऽस्ति धर्मेतिघोषः।
श्रुतो विश्रुतोऽसौ विमुक्त—प्रवेशः,
चिरायुः चिरायुः प्रभूयाद् गणेशः।।
4. अगम्यः सुरम्यः प्रणम्यः क्षणोऽयं,
सुभक्तिः सुशक्तिः विशुद्धासनोऽयं।
ध्रुवं कान्तकायः सदा शुद्धवेशः,
चिरायुः चिरायुः प्रभूयाद् गणेशः।।4।।
5. प्रभावं नयामः स्वभावे भवामः,
सुदृष्टिं सुसृष्टिं अबाधं व्रजामः।
सुधासिक्तशास्तिः परं शासनेशः,
चिरायुः चिरायुः प्रभूयाद् गणेशः।।5।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

2. सिद्ध स्तवनम्

आचार्य महाप्रज्ञ

नाथ! मयि कुरु करुणादृष्टिं
दर्शयानन्दमयीं सृष्टिम्।।ध्रुवपद।।

1. जगति परितोऽपि भाति कष्टं, क्वापि नानन्दपदं दृष्टम्।
मोहमहिमारूणिमाकृष्टं मानसं मुग्धमिदं स्पष्टम्।।
परमेश्वर! परमौषधं, शांतिमयं प्रविदाय,
संहर संहर मोहरुजं मे, प्रयते तेन हिताय,
आयतौ प्रणये तव शिष्टिम्।।

2. शमथपीयूषरसं पीत्वा, वासनां विषययुतां हित्वा।
नन्दनां चिद्रूपां नीत्वा, मोहरिपुमेव झटिति जित्वा।
वीतरागपदमुज्ज्वलं, स्वात्मगणौज्ज्वल्सेन,
केवलकमलाललितं कलितं, शुक्लध्यानबलेन,
येन तत्रैषि सदा ह्रष्टिम्।।

3. यत्र नो जन्मजरामरणं, नो भयं नैव शोककरणम्।
विद्यते किंचिन्नावरणं, लोक्यते निखिलजनाचरणम्।
तत्तव मन्दिरमद्भुतं, द्रष्टुं लोलुप एवं,
लौकिक सदन निभालन सुहितो धृत्वाहं स्वयमेव
देव! तव नाममयीं यष्टिम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

4. अक्षयं विगतरुजं स्थानं, ज्योतिरुज्ज्वलितं ह्यम्लानम्।
किन्तु नो सन्निहितं यानं स्याद् यतो मे हि तत्र यानम्।
उन्नतशाखामाश्रितस्तव करुणोर्विरुहस्य,
यायां मातृमहीं सुमनोज्ञां, स्वामिन्! शिवनगरस्य
शस्यगुण! देहि तदाकृष्टिम्।।

5. असकृदुत्पादयते सेहं, विकृतयत्यतनुतरं देहम्।
कर्हिचित् सिंचति सत्स्नेहं, कर्हिचिच्छोषयते गेहम्।
आकण्ठं खिन्नोऽभवं कर्मकृषिककार्येण,
सामर्थ्यं पुनरुद्भवनस्य स्यान्नष्टं भुवनेन।
येन मयि कुरु तादृग्दृष्टिम्।।

6. केवलं मृगतृष्णाक्रान्तस्तत इतो भूरितरं भ्रान्तः।
प्रचुरतरसुखलिप्साक्लान्तः, क्वापि नाहं भगवन्! श्रांतः।
सम्प्रति तव चिच्चेतसा, मैत्रीं प्रमुदाऽवाप्य,
चिदानन्दरूपे रज्येऽहं, तृष्णामपि च समाप्य,
प्राप्य तव मन्दिरे प्रविष्टिम्।।

7. त्वमसि मे प्राणधनं स्वामी, त्वमसि मे हृदयान्तर्यामी।
त्वामहं न यथा विभजामि, तादृशीं वाञ्छा विदधामि।
युष्मदष्मदोरन्तरं, दूरं सपदि सृजामि,
त्वमिति रूपमहं नथमल्लस्त्वयि मिलितोऽनुभवामि,
यामि तामेव परामृष्टिम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

3. श्री पैंसठिया यंत्र और छंद

22	3	9	15	16
14	20	21	2	8
1	7	13	19	25
18	24	5	6	12
10	11	17	23	4

1. श्री नेमीश्वर संभव स्वाम,
सुविधि धर्म शांति अभिराम,
अनंत सुव्रत नमिनाथ सुजाण,
श्री जिनवर मुझ करो कल्याण।।

2. अजित नाथ चंदा प्रभु धीर,
आदीश्वर सुपार्श्व गंभीर,
विमल नाथ विमल जग–भाण,
श्री जिनवर मुझ करो कल्याण।।

3. मल्लिनाथ जिन मंगल रूप,
पंचबीस धनु सुंदर स्वरूप,
श्री अरनाथ नमूं वर्धमान,
श्री जिनवर मुझ करो कल्याण।।

4. सुमति पद्म प्रभु अवतंस,
वासुपूज्य शीतल श्रेयांस,
कुंथु पार्श्व अभिनंदन भाण,
श्री जिनवर मुझ करो कल्याण।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

5. इण परे श्री जिनवर संभारिए,
दुःख दारिद्र्य विघ्न निवारिए,
पच्चीसे पैंसठ परमाण,
श्री जिनवर मुझ करो कल्याण।।

6. इण भणतां दुःख नावे कदा,
जो निज पासे राखे सदा,
धरिए पंचतणुं मन ध्यान,
श्री जिनवर मुझ करो कल्याण।।6।।

7. श्री जिनवर नामे वांछित मिले,
मन वांछित सहु आशा फले,
धर्मसिंह मुनि नाम निधान,
श्री जिनवर मुझ करो कल्याण।।7।।

4. श्री वज्रपंजर स्तोत्र

1. परमेष्ठि–नमस्कारं, सारं नवपदात्मकम्।
आत्मरक्षाकरं वज्रपंजराभं स्मराम्यहम्।।
2. ऊँ नमो अरिहंताणं, शिरस्कं शिरसि स्थितम्।
ऊँ नमो सव्वसिद्धाणं, मुखे मुखपटं वरम्।।
3. ऊँ नमो आयरियाणं, अंगरक्षातिशायिनी।
ऊँ नमो उवज्झायाणं, आयुधं हस्तयोर्दृढम्।।
4. ऊँ नमो लोए सव्वसाहूणं, मोचके पादयोः शुभे।
एसो पंच णमुक्कारो, शिलावज्रमयीतले।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

5. सव्वपावप्पणासणो, वप्रो वज्रमयो बहिः।
मंगलाणं च सव्वेसिं, खादिराङ्गारखातिका।।
6. स्वाहान्तं च पदं ज्ञेयं, पढमं हवइ मंगलं।
वप्रोपरि वज्रमयं, पिधानं देहरक्षणे।।
7. महाप्रभावा रक्षेयं, क्षुद्रोपद्रवनाशिनी।
परमेष्ठि–पदोद्भूता, कथिता पूर्वसूरिभिः।।
8. यश्चैवं कुरुते रक्षां, परमेष्ठिपदैः सदा।
तस्य न स्यात् भयं व्याधिराधिश्चापि कदाचन।।

5. महावीर अष्टकम् (1)

1. यदीये चैतन्ये मुकुर इव भावाश्चिदचितः,
समं भांति ध्रौव्य–व्यय–जनि–लसन्तोऽन्तरहिताः।
जगत्–साक्षी मार्गप्रकटनपरो भानुरिव यो,
महावीरस्वामी नयन–पथ–गामी भवतु मे।।
2. अताम्रं यच्चक्षुःकमलयुगलं स्पन्दरहितं,
जनान् कोपापायं प्रकटयति वाऽऽभ्यंतरमपि।
स्फुटं मूर्तिर्यस्य प्रशमितमयी वातिविमला,
महावीरस्वामी नयन–पथ–गामी भवतु मे।।
4. नमन्नाकेन्द्राली–मुकुट–मणिभा–जालजटिलं,
लसत्पादाम्भोजद्वयमिह यदीयं तनुभृताम्।
भवज्वालाशान्त्यै प्रभवति जलं वा स्मृतमपि,
महावीरस्वामी नयन–पथ–गामी भवतु मे।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

4. यदर्चाभावेन प्रमुदितमना दर्दुर इह,
क्षणादासीत् स्वर्गी गुणगणसमृद्धः सुखनिधिः।
लभंते सद्भक्ताः शिव–सुख–समाजं किमु तदा,
महावीरस्वामी नयन–पथ–गामी भवतु मे।।

5. कनत्स्वर्णाभासोऽप्यपगततनु–र्ज्ञान–निवहो,
विचित्रात्माऽप्येको नृपतिवर–सिद्धार्थ–तनयः।
अजन्माऽपि श्रीमान् विगत–भवरागोऽद्भुतगति–
र्महावीरस्वामी नयन–पथ–गामी भवतु मे।।

6. यदीया वाग्-गंगा विविध-नय-कल्लोल-विमला,
बृहज्ज्ञानाम्भोभिर्जगति जनतां या स्नपयति।
इदानीमप्येषा बुधजन–मरालैः परिचिता,
महावीरस्वामी नयन–पथ–गामी भवतु मे।।

7. अनिर्वारोद्रेकस्त्रिभुवनजयी कामसुभटः,
कुमारावस्थायामपि निजबलाद्येन विजितः।
स्फुरन्नित्यानन्द–प्रशमपदराज्याय स जिनः,
महावीरस्वामी नयन–पथ–गामी भवतु मे।।

8. महामोहातंक–प्रशमनपराऽऽकस्मिकभिषग्,
निरापेक्षो बंधुर्विदितमहिमा मंगलकरः।
शरण्यः साधूनां भव–भयभृतामुत्तमगुणी,
महावीरस्वामी नयन–पथ–गामी भवतु मे।।

9. महावीराष्टकं स्तोत्रं, भक्त्या भागेन्दुना कृतम्।
य पठेच्छृणुयाच्चापि, स याति परमां गतिम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

6. महावीर अष्टकम् (2)

—आचार्य महाप्रज्ञ

1. अनेकान्तः कान्तः सकलसरितां संगम इव,
प्रवादे स्याद्वादः सकलवचसामुद्गम इव।
न सत्यं सत्यांशैर्वियुतमिह दृष्टं बुधजनैः,
महावीरो धीरः स्फुरतु मम चित्ते प्रतिपलम्।।
2. न रागो नो द्वेषः प्रशमरसपीयूषललितं,
शरीरं संवृत्तं गरलममृतं विस्मयकथा।
न दृष्टिर्नो दंशः प्रखरफणिनश्चाऽपि सफलः,
महावीरो धीरः स्फुरतु मम चित्ते प्रतिपलम्।।
3. इदं शस्त्रं भीतिं जनयति जनानामधिमनः,
इदं सैन्यं दैन्यं जनयति समाजे प्रतिपदम्।
विदेहे देहस्य स्थितिरभयमाप्नोति सहजं,
महावीरो धीरः स्फुरतु मम चित्ते प्रतिपलम्।।
4. सुरक्षां नो नीता किमु तृणकुटीं भो मुनिवर!,
निजं नीडं पक्षी तनुतनुरहो! रक्षतितमाम्।
तदा ध्यातं स्वात्मा प्रभवति कुटीरं न च परं,
महावीरो धीरः स्फुरतु मम चित्ते प्रतिपलम्।।
5. निमेषार्धो नूनं ज्ञपयति न चात्मा बहिरिह,
तथैवार्द्धोन्मेषो ज्ञपयति च तत्त्वं बहिरपि।
विचित्रा मुद्रेयं वरनयनयोर्ध्याननिरता,
महावीरो धीरः स्फुरतु मम चित्ते प्रतिपलम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

6. अगम्यः स श्वासः परिमलमुपेतोब्जसुलभं,
अगम्या सा वाणी प्रसरति सुदूरं सहजतः।
अगम्यो गम्यस्त्वं कथमिति न जाने यतिपते!,
महावीरो धीरः स्फुरतु मम चित्ते प्रतिपलम्।।
7. न कालस्यैकान्तो न खलु नियतेर्मुख्यपदवी,
स्वकीयं कर्तृत्वं प्रबलपुरुषार्थेन फलितम्।
व्रतानां संदेशः श्रुतिमधिगतो मन्त्रमभवत्,
महावीरो धीरः स्फुरतु मम चित्ते प्रतिपलम्।।
8. अनन्तानन्देन क्वचिदपि न कष्टानुभवनं,
अनन्तं तज्ज्ञानं विदितमभितो विश्वमखिलम्।
अनन्ता सा शक्तिः क्वचिदपि न किंचित् प्रतिहता,
महावीरो धीरः स्फुरतु मम चित्ते प्रतिपलम्।।

7. भिक्षु अष्टकम्

—आचार्य महाप्रज्ञ

1. अकम्पः संकल्पः क्वचिदपि न केनापि चलितः,
न चित्ते चांचल्यं न च विपथगामीन्द्रियगणः।
समं सोढा गालिः क्वचन घनमुष्टेः प्रहरणं,
प्रसन्नात्मा भिक्षुर्नयनमवतारं नयतु मे।।
2. न रागो न द्वेषो घटितघटनासु प्रतिकृतः,
विरोधः सद्भावे परिणतिमुपागात् प्रतिपदम्।
न लेशः क्लेशानां समजनि निमेषं सहचरः,
प्रसन्नात्मा भिक्षुर्नयनमवतारं नयतु मे।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

3. अलब्धेऽप्याहारे सुमतिरचलन्नो क्षणमपि,
न लब्धं सुस्थानं तदपि पथि नीते स्थिरमतिः।
न कष्टं तत्कष्टं भवति यदि चित् स्पष्टमुदिता,
प्रसन्नात्मा भिक्षुर्नयनमवतारं नयतु मे।।

4. सदा स्वच्छो भावो जिनवचनभावैरपमलः,
कृतादर्शा प्रज्ञा मतिविभवमाक्रम्य सुगता।
न चेर्ष्या नो निन्दा गहनतमनिष्ठा स्वचरिते,
प्रसन्नात्मा भिक्षुर्नयनमवतारं नयतु मे।।

5. न सा काम्या बुद्धिर्भवति खलु या बन्धनिरता,
प्रशस्यां तां मन्ये भवति च यतश्चिद् विकसिता।
स्वचैतन्ये निष्ठा प्रशमसुखवृष्टेरनुभवः,
प्रसन्नात्मा भिक्षुर्नयनमवतारं नयतु मे।।

6. ज्वरो यस्याध्वानं सततमविगानं विहितवान्,
निराशा संन्यस्ता सरिति रवितापेन सुतराम्।
प्रकाशः सम्प्राप्तो गहनतिमिरे चैत्यनिलये,
प्रसन्नात्मा भिक्षुर्नयनमवतारं नयतु मे।।

7. अगम्यं यन्नाम प्रबलतपसा संचितयशो
न शेषाः संक्लेशा विलयमुपयान्ति स्मरणतः।
नयन् ऊं ऐं ऊं ऊं अमलमनसार्हं सवलयं,
प्रसन्नात्मा भिक्षुर्नयनमवमतारं नयतु मे।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

8. मतिः सिद्धा शुद्धा भवतु प्रतिबुद्धा प्रतिपलं,
मनो हित्वा भ्रान्तिं व्रजतु सुखदां शान्तिममलाम्।
सदा ह्रीं ह्रीं ह्रीं ह्रीं स्फुरतु नितरां भावनिचये,
प्रसन्नात्मा भिक्षुर्नयनमवतारं नयतु मे।।

8. तुलसी अष्टकम्

—आचार्य महाप्रज्ञ

1. सदानन्दस्पन्दः प्रवहति मनोहारिवदने,
प्रशस्तं वात्सल्यं स्फुरति सुखदं नेत्रयुगले।
विकासे विन्यस्ता विमलविपुला दृष्टिरनिशं,
जगद्वन्द्यः स्वामी विशदचरितो नाम तुलसी।।
2. अनन्तं माहात्म्यं वचनविषयं केन विहितं,
स्वयं सिद्धा वाणी सहजमतिमानाप्तपुरुषः।
समृद्धो वाक्सिद्धेरतनुमहिमा सिद्धपुरुषः,
जगद्वन्द्यः स्वामी विशदचरितो नाम तुलसी।।
3. कृता धर्मक्रान्तिर्निरसनमिता भ्रान्तिरखिला,
प्रतिष्ठां सम्प्राप्तं पुनरपि यतो मूल्यममलम्।
स धर्मः किं धर्मो यदि न मनुजो नीतिनिपुणः,
जगद्वन्द्यः स्वामी विशदचरितो नाम तुलसी।।
4. मनः पीठासीनः प्रथयसि मनःशान्तिमतुलां,
वचः श्रेण्यारूढः सृजसि वचसो गौरवमलम्।
मनोवाक्कायानां कथमिव सुयोगोऽजनि महान्,
जगद्वन्द्यः स्वामी विशदचरितो नाम तुलसी।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

5. अपूर्वा श्रीसम्पत् प्रतिपदमहोभावमुखरा,
अपूर्वा ह्रीसम्पत् सहजमनुशास्तिं जनयति।
अपूर्वा धीसम्पत् स्मृतिरपि विचित्राशयवती,
जगद्वन्द्यः स्वामी विशदचरितो नाम तुलसी।।

6. अपूर्वा सा भक्तिर्जिनवरवचः ख्यातिमगमद्
अपूर्वा सा शक्तिः प्रबलपुरुषार्थे प्रकटिता।
अपूर्वा सा शास्तिः प्रगतिमधिरूढा फलवती,
जगद्वन्द्यः स्वामी विशदचरितो नाम तुलसी।।

7. विकासस्य श्वासः प्रतिपलमनायासमुदितः,
प्रतीक्षासंलीना इव नवनवोन्मेषनिवहाः।
समीक्षानैपुण्यं सुकृतिसुलभं दुर्लभतमं,
जगद्वन्द्यः स्वामी विशदचरितो नाम तुलसी।।

8. श्रिये श्रीं श्रीं श्रीं श्रीं जपतु तुलसीनामवलये,
ह्रिये ह्रां ह्रीं ह्रौं ह्रः भवतु शिवनिष्ठा श्रुतवती।
धिये ऐं ऐं ऐं ऐं स्फुरतु सततं कण्ठकमले,
जगद्वन्द्यः स्वामी विशदचरितो नाम तुलसी।।

9. महाप्रज्ञ अष्टकम्

—आचार्य महाश्रमण

1. पवित्रान्तःप्रज्ञा गहनतम—तत्त्वेषु निपुणा,
श्रुतस्वाध्यायेन सुविदितरहस्यो विभुवरः।
प्रशस्या शास्त्राणां सुषमतर—सम्पादन सृतिः,
महाप्रज्ञः पूज्यो जिनपतिसरूपो गुरुवरः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

2. विशुद्धा सम्भाषा विनयति विबाधाः प्रतिपदं,
प्रकाण्डं पाण्डित्यं श्रवति मुखपद्मात् प्रवचने।
प्रभावी व्याहारो जनयति समाधिं जनचये,
महाप्रज्ञः पूज्यो जिनपतिसरूपो गुरुवरः।।

3. गभीरं साहित्यं सुमतिविदुषां प्रीतिजनकं,
प्रदत्ते सौहित्यं पठनपर–लोकाय विपुलम्।
विशिष्टश्लोकानां विरचनमकार्याशुकविना,
महाप्रज्ञः पूज्यो जिनपतिसरूपो गुरुवरः।।

4. तनावग्रस्तोऽयं विविधभययुक्तश्च मनुजः,
विधत्ते सन्तापं प्रशमसमभावाद् विरहितः।
शुभं प्रेक्षाध्यानं सहजसुखदं विश्ववरदं,
महाप्रज्ञः पूज्यो जिनपतिसरूपो गुरुवरः।।

5. विकासो बुद्धेः स्याद् विशदतरभावेन सहितः,
पवित्रा लेश्या चेत् प्रखरमतिलाभोऽपि सुफलः।
शिवा शिक्षाक्षेत्रे बुधनरमता जीवनकला,
महाप्रज्ञः पूज्यो जिनपतिसरूपो गुरुवरः।।

6. अहिंसा–शक्तीनां भवतु समवायः सुखकरः,
सदा यात्रा भूयात् विविधजनताया हितकृते।
जगत्यां तेजस्ते प्रहरतुतमां व्याप्ततिमिरं,
महाप्रज्ञः पूज्यो जिनपतिसरूपो गुरुवरः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

7. दयाभावः पुण्यो विलसतितरां पूतहृदये,
प्रकामं वात्सल्यं प्रवहति सुधातुल्यममलम्।
प्रसन्ना मुद्रेयं स्फुरति वदने शान्तिजननी,
महाप्रज्ञः पूज्यो जिनपतिसरूपो गुरुवरः।।
8. शरच्चन्द्रश्वेतो गणगगनभानुर्गतमलः,
सुलब्धा प्रख्यातिः प्रणयन–कलायां कविकुले।
प्रदत्तं विज्ञेभ्यः कठिनतरपृच्छा–प्रतिवचः,
महाप्रज्ञः पूज्यो जिनपतिसरूपो गुरुवरः।।

10. गौतम कुलकम्

1. लुद्धा नरा अत्थपरा हवंति, मूढा नरा कामपरा हवंति।
बुद्धा नरा खंतिपरा हवंति, मिस्सा नरा तिण्णि वि आयरंति।।
2. ते पण्डिया जे विरयाविरोहे, ते सत्तिणो जे न चलंति धम्मं।
ते साहुणो जे समयं चरंति, ते बांधवा जे वसिणो हवंति।।
3. कोहाभिभूया न सुहं लहंति, माणासिणो सोयपरा हवंति।
मायाविणो हुंति परस्स पेस्सा, लोभामहिच्छा णरयं उवेंति।।
4. कोहो विसं किं अमयं अहिंसा, माणो अरी किं हियमप्पमाओ।
माया भयं किं सरणं तु सच्चं, लोहो दुहं किं सुहमाहु तुट्ठी।।
5. बुद्धी अचंडं भयए विणीयं, कुद्धं कुसीलं भयए अकित्ती।
संभिण्णचित्तं भयए अलच्छी, सच्चेट्ठियस्स भयए सिरी य।।
6. चयंति मित्ताणि नरं कयग्घं, चयंति पावाइ मुणिं जयंतं।
चयंति सुक्काणि सराणि हंसा, चएइ बुद्धी कुवियं मणुस्सं।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

7. अईय–अत्थे कहिए विलावो, असंपहारे कहिए विलावो।
विक्खित्तचित्ते कहिए विलावो, बहू कुसीसे कहिए विलावो।।

8. दुट्ठाहिवा दंडपरा हवंति, विज्जाहरा मंतपरा हवंति।
मुक्खा नरा कोवपरा हवंति, सुसाहुणो तत्तपरा हवंति।।

9. सोहा भवे उग्गतवस्स खंती, समाहिजोगोवसमस्स सोहा।
णाणं सुझाणं चरणस्स सोहा, सीसस्स सोहा विणए पवित्ती।।

10. अभूसणो सोहइ बंभयारी, अकिंचणो सोहइ दिक्खधारी।
बुद्धीजुओ सोहइ रायमंती, लज्जाजुया सोहइ एगपत्ती।।

11. अप्पा अरी होइ अणवट्ठियस्स, अप्पा जसो सीलमओ नरस्स।
अप्पा दुरप्पा अणवट्ठियस्स, अप्पा जियप्पा सरणं गई य।।

12. न धम्मकज्जं परमत्थि कज्जं, न पाणहिंसा परमं अकज्जं।
न पेमरागा परमत्थि बंधो, न बोहिलाभा परमत्थि लाभो।।

13. न सेवियव्वा पमया परक्का, न सेवियव्वा पुरिसा अविज्जा।
न सेवियव्वा अहमा निहिण्णा, न सेवियव्वा पिसुणा मणुस्सा।।

14. जे धम्मिया ते खलु सेवियव्वा, जे पंडिया ते खलु पुच्छियव्वा।
जे साहवो ते अभिवंदियव्वा, जे णिम्ममा ते पडिलाभियव्वा।।

15. पुत्ता य सीसा य समं विभत्ता, रिसी य देवा य समं विभत्ता।
मुक्खा तिरिक्खा य समं विभत्ता, माया दरिद्दा य समं विभत्ता।।

16. सव्वं कलं धम्मकला जिणाइ, सव्वं कहं धम्मकहा जिणाइ।
सव्वं बलं धम्मबलं जिणाइ, सव्वं सुहं धम्मसुहं जिणाइ।।

17. जूए पसत्तस्स धणस्स नासो, मंसे पसत्तस्स दयाइ नासो।
मज्जे पसत्तस्स जसस्स नासो, वेसा–पसत्तस्स कुलस्स नासो।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

18. हिंसा पसत्तस्स सुधम्मनासो, चोरी–पसत्तस्स सरीर–नासो।
तहा परत्थी–सुपसत्तयस्स,सव्वस्स नासो अहमा गई य।।
19. दाणं दरिद्दस्स पहुस्स खंती, इच्छाणिरोहो य सुहोइयस्स।
तारुण्णए इंदियणिग्गहो य, चत्तारि एयाणि सुदुक्कराणि।।
20. असासयं जीवियमाहु लोए, धम्मं चरे साहुजणोवइट्ठं।
धम्मो य ताणं सरणं गई य, धम्मं निसेवित्तु सुहं लहंति।।

11. रत्नाकर पंचविंशिका

–रत्नाकर सूरि

1. श्रेयः श्रियां मंगलकेलिसद्म! नरेन्द्र–देवेन्द्र–नतांह्रिपद्म!
सर्वज्ञ! सर्वातिशय! प्रधान! चिरं जय! ज्ञान–कला–निधान।।
2. जगत्त्रयाधार! कृपावतार! दुर्वार–संसार–विकार–वैद्य!
श्री वीतराग! त्वयि मुग्धभावाद्, विज्ञ! प्रभो! विज्ञपयामि किंचित्।।
3. किं बाललीला–कलितो न बालः, पित्रोः पुरो जल्पति निर्विकल्पः?
तथा यथार्थं कथयामि नाथ! निजाशयं सानुशयस्तवाग्रे।।
4. दत्तं न दानं परिशीलितं च, न शालि–शीलं, न तपोऽभितप्तम्।
शुभो न भावोऽप्यभवद् भवेऽस्मिन्, विभो! मया भ्रान्तमहो! मुधैव।।
5. दग्धोऽग्निना क्रोधमयेन दष्टो, दुष्टेन लोभाख्य–महोरगेण।
ग्रस्तोऽभिमानाऽजगरेण माया–जालेन बद्धोऽस्मि कथं भजेत् त्वाम्।।
6. कृतं मयाऽमुत्र हितं न चेह, लोकेऽपि लोकेश! सुखं न मेऽभूत्।
अस्तादृशां केवलमेव जन्म, जिनेश! जज्ञे भव–पूरणाय।।
7. मन्ये मनो यन्न मनोज्ञवृत्त! त्वदास्यपीयूष–मयूखलाभात्।
द्रुतं महानन्दरसं कठोर–मस्मादृशां देव! तदश्मतोऽपि।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

8. त्वत्तः सुदुष्प्रापमिदं मयाप्तं, रत्नत्रयं भूरि–भव–भ्रमेण।
प्रमाद–निद्रावशतो गतं तत्, कस्याग्रतो नायक! पूत्करोमि?।।

9. वैराग्य–रंगः पर–वंचनाय, धर्मोपदेशो जन–रंजनाय।
वादाय विद्याध्ययनं च मेऽभूत्, कियद् ब्रुवे हास्यकरं स्वमीश!।।

10. परापवादेन मुखं सदोषं, नेत्रं परस्त्रीजन–वीक्षणेन।
चेतः परापाय–विचिन्तनेन, कृतं भविष्यामि कथं विभोऽहम्?।।

11. विडम्बितं यत् स्मर–घस्मरार्ति–दशावशात् स्वं विषयान्धलेन।
प्रकाशितं तद् भवतो ह्रियैव, सर्वज्ञ! सर्वं स्वयमेव वेत्सि।।

12. ध्वस्तोऽन्यमंत्रैः परमेष्ठि–मंत्रः, कुशास्त्रवाक्यैर्निहतागमोक्तिः।
कर्तुं वृथा–कर्म कुदेव–संगा–दवांछि ही नाथ! मतिभ्रमो मे।।

13. विमुच्य दृग्लक्ष्यगतं भवन्तं, ध्याता मया मूढधिया हृदंतः।
कटाक्ष–वक्षोज–गभीर–नाभि–कटीतटीयाः सुदृशां विलासाः।।

14. लोलेक्षणावक्त्र–निरीक्षणेन, यो मानसे रागलवो विलग्नः।
न शुद्ध–सिद्धांत–पयोधि–मध्ये, धौतोप्यगात् तारक! कारणं किम्।।

15. अंगं न चंगं न गणो गुणानां, न निर्मलः कोऽपि कला–विलासः।
स्फुरत्प्रभा न प्रभुता च कापि, तथाप्यहंकार–कदर्थितोऽहम्।।

16. आयुर्गलत्याशु न पाप–बुद्धि–र्गतं वयो नो विषयाभिलाषः।
यत्नश्च भैषज्य–विधौ न धर्मे, स्वामिन्! महामोह–विडंबना मे।।

17. नात्मा न पुण्यं न भवो न पापं, मया विटानां कटुगीरपीयम्।
अधारि कर्णे त्वयि केवलार्के, परिस्फुटे सत्यपि देव! धिग् माम्।।

18. न देवपूजा न च पात्रपूजा, न श्राद्धधर्मश्च न साधुधर्मः।
लब्ध्वाऽपि मानुष्यमिदं समस्तं, कृतं मयाऽरण्य–विलापतुल्यम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

19. चक्रे मयाऽसत्स्वपि कामधेनु– कल्पद्रु–चिन्तामणिषु स्पृहार्तिः।
न जैनधर्मे स्फुटशर्मदेऽपि, जिनेश! मे पश्य विमूढभावम्।।
20. सद्भोगलीला न च रोगकीला, धनागमो नो निधनागमश्च।
दारा न कारा नरकस्य चित्ते, व्यचिंति नित्यं मयकाऽधमेन।।
21. स्थितं न साधोर्हृदि साधुवृत्तात्, परोपकारान्न यशोऽर्जितं च।
कृतं न तीर्थोद्धरणादिकृत्यं, मया मुधा हारितमेव जन्म।।
22. वैराग्यरंगो न गुरूदितेषु, न दुर्जनानां वचनेषु शांतिः।
नाध्यात्मलेशो मम कोऽपि देव! तार्यः कथंकारमयं भवाब्धिः?।।
23. पूर्वे भवेऽकारि मया न पुण्य–मागामि–जन्मन्यपि नो करिष्ये।
यदीदृशोहं मम तेन नष्टा, भूतोद्भवद्भावि–भवत्रयीश!।।
24. किं वा मुधाऽहं बहुधा सुधाभुक्–पूज्य! त्वदग्रे चरितं स्वकीयम्।
जल्पामि यस्मात् त्रिजगत्स्वरूप–निरूपकस्त्वं कियदेतदत्र?।।
25. दीनोद्धार–धुरंधरस्त्वदपरो, नास्ते मदन्यः कृपा–
पात्रं नाऽत्र जनो जिनेश्वर! तथाप्येतां न याचे श्रियम्।
किंत्वर्हन्निदमेव केवलमहो, सद्बोधिरत्नं शिवं।
श्री–रत्नाकर–मंगलैकनिलय! श्रेयस्करं प्रार्थये।।

12. परमात्म द्वात्रिंशिका

–आचार्य अमितगति

1. सत्त्वेषु मैत्रीं गुणिषु प्रमोदं, क्लिष्टेषु जीवेषु कृपापरत्वम्।
माध्यस्थभावं विपरीतवृत्तौ, सदा ममात्मा विदधातु देव!।।
2. शरीरतः कर्तु–मनन्तशक्तिं, विभिन्नमात्मानमपास्तदोषम्।
जिनेन्द्र! कोषादिव खड्गयष्टिं, तव प्रसादेन ममास्तु शक्तिः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

3. दुःखे सुखे वैरिणि बंधुवर्गे, योगे वियोगे भवने वने वा।
निराकृताशेषममत्वबुद्धेः समं मनो मेऽस्तु सदाऽपि नाथ!।।

4. मुनीश! लीनाविव कीलिताविव, स्थिरौ निखाताविव बिंबिताविव।
पादौ त्वदीयौ मम तिष्ठतां सदा, तमो–धुनानौ हृदि दीपकाविव।।

5. एकेन्द्रियाद्या यदि देव! देहिनः, प्रमादतः संचरता यतस्ततः।
क्षता विभिन्ना मलिता निपीडिता, ममास्तु मिथ्या दुरनुष्ठितं तदा।।

6. विमुक्तिमार्ग–प्रतिकूलवर्तिना, मया कषायाक्षवशेन दुर्धिया।
चारित्र–शुद्धेर्यदकारि लोपनं, तदस्तु मिथ्या मम दुष्कृतं विभो!।।

7. विनिन्दनालोचन–गर्हणैरहं, मनोवचः काय–कषायनिर्मितम्।
निहन्मि पापं भव–दुःख–कारणं, भिषग् विषं मंत्रगुणैरिवाऽखिलम्।।

8. अतिक्रमं यं यमपि व्यतिक्रमं, जिनातिचारं सुचरित्रकर्मणः।
व्यधामनाचारमपि प्रमादतः, प्रतिक्रमं तस्य करोमि शुद्धये।।

9. क्षतिं मनःशुद्धिविधेरतिक्रमं, व्यतिक्रमं शीलवृतेर्विलंघनम्।
प्रभोऽतिचारं विषयेषु वर्तनं, वदन्त्यनाचार–मिहातिसक्तताम्।।

10. यदर्थमात्रा–पद–वाक्यहीनं, मया प्रमादात् यदि किंचनोक्तम्।
तन्मे क्षमित्वा विदधातु देवी, सरस्वती केवल–बोधिलब्धिम्।।

11. बोधिः समाधिः परिणामशुद्धिः, स्वात्मोपलब्धिः शिवसौख्यसिद्धिः।
चिन्तामणिं चिन्तितवस्तुदाने, त्वां वन्द्यमानस्य ममास्तु देवि!।।

12. यः स्मर्यते सर्व–मुनीन्द्र–वृन्दै–र्यः स्तूयते सर्वनरामरेन्द्रैः।
यो गीयते वेद–पुराणशास्त्रैः, स देवदेवो हृदये ममास्ताम्।।

13. यो दर्शन–ज्ञान–सुख–स्वभावः, समस्त-संसार-विकार–बाह्यः।
समाधिगम्यः परमात्म–संज्ञः, स देवदेवो हृदये ममास्ताम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

14. निषूदते यो भव–दुःखजालं, निरीक्षते यो जगदन्तरालम्।
योऽन्तर्गतो योगि–निरीक्षणीयः, स देवदेवो हृदये ममास्ताम्।।
15. विमुक्तिमार्ग–प्रतिपादको यो, यो जन्म–मृत्युव्यसनाद् व्यतीतः।
त्रिलोक–लोकी सकलोऽकलंकः, स देवदेवो हृदये ममास्ताम्।।
16. क्रोडीकृताशेष–शरीरि–वर्गा, रागादयो यस्य न सन्ति दोषाः।
निरीन्द्रियो ज्ञानमयोऽनपायः, स देवदेवो हृदये ममास्ताम्।।
17. यो व्यापको विश्वजनीन–वृत्तिः, सिद्धो विबुद्धो धुतकर्मबन्धः।
ध्यातो धुनीते सकलं विकारं,, स देवदेवो हृदये ममास्ताम्।।
18. न स्पृश्यते कर्मकलंकदोषैर्, यो ध्वान्तसंघैरिव तिग्मरश्मिः।
निरंजनं नित्यमनेकमेकं, तं देवमाप्तं शरणं प्रपद्ये।।
19. विभासते यत्र मरीचिमालि–न्यविद्यमाने भुवनावभासी।
स्वात्मस्थितं बोधमय–प्रकाशं, तं देवमाप्तं शरणं प्रपद्ये।।
20. विलोक्यमाने सति यत्र विश्वं, विलोक्यते स्पष्टमिदं विविक्तम्।
शुद्धं शिवं शान्तमनाद्यनन्तं, तं देवमाप्तं शरणं प्रपद्ये।।
21. येन क्षता मन्मथ-मान-मूर्च्छा-विषाद-निद्रा-भय-शोक-चिंताः।
क्षयानलेनैव तरु–प्रपंचस्, तं देवमाप्तं शरणं प्रपद्ये।।
22. न संस्तरोऽश्मा न तृणं न मेदिनी, विधानतो नो फलको विनिर्मितः।
यतो निरस्ताक्ष–कषाय–विद्विषः, सुधीभिरात्मैव सुनिर्मलो मतः।।
23. न संस्तरो भद्र! समाधि–साधनं, न लोकपूजा न च संघमेलनम्।
यतस्ततोऽध्यात्मरतो भवाऽनिशं, विमुच्य सर्वामपि बाह्यवासनाम्।।
24. न सन्ति बाह्या मम केचनार्था, भवामि तेषां न कदाचनाऽहम्।
इत्थं विनिश्चित्य विमुच्य बाह्यं, स्वस्थः सदा त्वं भव भद्र! मुक्त्यै।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

25. आत्मानमात्मन्यवलोक्यमानस्, त्वं दर्शनज्ञानमयो विशुद्धः।
एकाग्रचित्तः खलु यत्र तत्र, स्थितोऽपि साधुर्लभते समाधिम्।।

26. एकः सदा शाश्वतिको ममात्मा, विनिर्मलः साधिगमस्वभावः।
बहिर्भवाः सन्त्यपरे समस्ता, न शाश्वताः कर्मभवाः स्वकीयाः।।

27. यस्यास्ति नैक्यं वपुषाऽपि सार्द्धं, तस्यास्ति किं पुत्रकलत्रमित्रैः?
पृथक् कृते चर्मणि रोमकूपाः, कुतो हि तिष्ठन्ति शरीरमध्ये।।

28. संयोगतो दुःखमनेकभेदं, यतोऽश्नुते जन्मवने शरीरी।
ततस्त्रिधाऽसौ परिवर्जनीयो, यियासुना निर्वृतिमात्मनीनाम्।।

29. सर्वं निराकृत्य विकल्प–जालं, संसार–कान्तार–निपातहेतुम्।
विविक्तमात्मानमवेक्षमाणो, निलीयसे त्वं परमात्मतत्त्वे।।

30. स्वयं कृतं कर्म यदात्मना पुरा, फलं तदीयं लभते शुभाशुभम्।
परेण दत्तं यदि लभ्यते स्फुटं, स्वयं कृतं कर्म निरर्थकं तदा।।

31. निजार्जितं कर्म विहाय देहिनो, न कोऽपि कस्याऽपि ददाति किंचन।
विचारयन्नेवमनन्यमानसः, परो ददातीति विमुंच शेमुषीम्।।

32. यैः परमात्माऽमितगतिवन्द्यः, सर्वविविक्तो भृशमनवद्यः।
शश्वदधीतो मनसि लभन्ते, मुक्तिनिकेतं विभववरं ते।।

13. अन्ययोगव्यवच्छेदिका

(महावीर–स्तोत्रम्)

–आचार्य हेमचन्द्र

1. अनन्तविज्ञान–मतीतदोष–मबाध्यसिद्धान्तममर्त्यपूज्यम्।
श्री वर्द्धमानं जिनमाप्तमुख्यं, स्वयंभुवं स्तोतुमहं यतिष्ये।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

2. अयं जनो नाथ! तव स्तवाय, गुणान्तरेभ्यः स्पृहयालुरेव।
विगाहतां किन्तु यथार्थवाद–मेकं परीक्षाविधिदुर्विदग्धः।।2।।
3. गुणेष्वसूयां दधतः परेऽमी, मा शिश्रियन्नाम भवन्तमीशम्।
तथापि सम्मील्य विलोचनानि, विचारयन्तां नयवर्त्म सत्यम्।।
4. स्वतोऽनुवृत्तिव्यतिवृत्तिभाजो, भावा न भावान्तरनेयरूपाः।
परात्मतत्त्वादतथाऽऽत्मतत्त्वाद्, द्वयं वदन्तोऽकुशलाः स्खलन्ति।।
5. आदीपमाव्योमसमस्वभावं, स्याद्वादमुद्रानतिभेदि वस्तु।
तन्नित्यमेवैकमनित्यमन्य–दिति त्वदाज्ञाद्विषतां प्रलापाः।।
6. कर्त्ताऽस्ति कश्चिज्जगतः स चैकः, स सर्वगः स स्ववशः स नित्यः।
इमाः कुहेवाकविडम्बनाः स्यु–स्तेषां न येषामनुशासकस्त्वम्।।
7. न धर्मधर्मित्वमतीवभेदे, वृत्त्याऽस्ति चेन्न त्रितयं चकास्ति।
इहेदमित्यस्ति मतिश्च वृत्तौ, न गौणभेदोऽपि च लोकबाधः।।
8. सतामपि स्यात् क्वचिदेव सत्ता, चैतन्यमौपाधिकमात्मनोऽन्यत्।
न संविदानन्दमयी च मुक्तिः, सुसूत्रमासूत्रितमत्वदीयैः।।
9. यत्रैव यो दृष्टगुणः स तत्र, कुम्भादिवन्निष्प्रतिपक्षमेतत्।
तथाऽपि देहाद् बहिरात्मतत्त्व–मतत्त्ववादोपहताः पठन्ति।।
10. स्वयं विवादग्रहिले वितण्डा-पाण्डित्य-कण्डूल-मुखे जनेऽस्मिन्।
मायोपदेशात्परमर्मभिन्द–न्नहो! विरक्तो मुनिरन्यदीयः।।
11. न धर्महेतुर्विहिताऽपि हिंसा, नोत्सृष्टमन्यार्थमपोद्यते च।
स्व–पुत्रघातान्नृपतित्वलिप्सा–सब्रह्मचारि स्फुरितं परेषाम्।।
12. स्वार्थाऽवबोधक्षम एव बोधः, प्रकाशते नार्थकथाऽन्यथा तु।
परे परेभ्यो भयतस्तथाऽपि, प्रपेदिरे ज्ञानमनात्मनिष्ठम्।।
13. माया सती चेद् द्वयतत्त्वसिद्धि–रथासती हन्त! कुतः प्रपंचः?
मायैव चेदर्थसहा च तत्किं, माता च वन्ध्या च भवत्परेषाम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

14. अनेकमेकात्मकमेव वाच्यं, द्वयात्मकं वाचकमप्यऽवश्यम्।
अतोऽन्यथा वाचकवाच्यक्लृप्ता–वतावकानां प्रतिभाप्रमादः।।
15. चिदर्थशून्या च जडा च बुद्धिः, शब्दादितन्मात्रजमम्बरादि।
न बन्ध–मोक्षौ पुरुषस्य चेति, कियज्जडैर्न ग्रथितं विरोधि।।
16. न तुल्यकालः फलहेतुभावो, हेतौ विलीने न फलस्य भावः।
न संविदद्वैतपथेऽर्थसंविद्, विलून–शीर्णं सुगतेन्द्रजालम्।।
17. विना प्रमाणं परवन्न शून्यः, स्वपक्षसिद्धेः पदमश्नुवीत।
कुप्येत्कृतान्तः स्पृशते प्रमाण–महो! सुदृष्टं त्वदसूयिदृष्टम्।।
18. कृतप्रणाशाऽकृतकर्म–भोग–भव–प्रमोक्षस्मृति–भंगदोषान् ।
उपेक्ष्य साक्षात् क्षण–भंगमिच्छन्–नहो! महासाहसिकः परस्ते।।
19. सा वासना सा क्षणसन्ततिश्च, नाभेद–भेदानुभयैर्घटेते।
ततस्तटाऽदर्शिशकुन्तपोत–न्यायात्त्वदुक्तानि परे श्रयन्तु।।
20. विनाऽनुमानेन पराभिसन्धि–मसंविदानस्य तु नास्तिकस्य।
न साम्प्रतं वक्तुमपि क्व चेष्टा, क्व दृष्टमात्रं च हहा! प्रमादः।।
21. प्रतिक्षणोत्पाद–विनाशयोगि–स्थिरैकमध्यक्षमपीक्षमाणः।
जिन! त्वदाज्ञामवमन्यते यः, स वातकी नाथ! पिशाचकी वा।।
22. अनन्त–धर्मात्मकमेव तत्त्व–मतोऽन्यथा सत्त्वमसूपपादम्।
इति प्रमाणान्यपि ते कुवादि–कुरंग–संत्रासन–सिंहनादाः।।
23. अपर्ययं वस्तु समस्यमान–मद्रव्यमेतच्च विविच्यमानम्।
आदेश–भेदोदितसप्तभंग–मदीदृशस्त्वं बुधरूपवेद्यम्।।
24. उपाधि–भेदोपहितं विरुद्धं, नार्थेष्वसत्त्वं सद् वाच्यते च।
इत्यप्रबुद्धैव विरोधभीता, जडास्तदेकान्तहताः पतन्ति।।
25. स्यान्नाशि नित्यं सदृशं विरूपं, वाच्यं न वाच्यं सदसत्तदेव।
विपश्चितां नाथ! निपीततत्त्व–सुधोद्गतोद्गार–परम्परेयम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

26. य एव दोषाः किल नित्यवादे, विनाशवादेऽपि समास्त एव।
परस्परध्वंसिषु कण्टकेषु, जयत्यधृष्यं जिनशासनं ते।।
27. नैकान्तवादे सुखदुःखभोगौ, न पुण्यपापे न च बन्ध–मोक्षौ।
दुर्नीतिवाद–व्यसनासिनैवं, परैर्विलुप्तं जगदप्यशेषम्।।
28. सदेव सत् स्यात्सदिति त्रिधाऽर्थो, मीयेत दुर्नीति नय–प्रमाणैः।
यथार्थदर्शी तु नयप्रमाण–पथेन दुर्नीतिपथं त्वमारथः।।
29. मुक्तोऽपि वाऽभ्येतु भवं भवो वा, भवस्थशून्योऽस्तु मितात्मवादे।
षड्जीवकायं त्वमनन्तसंख्य–माख्यस्तथा नाथ! यथा न दोषः।।
30. अन्योन्य–पक्ष–प्रतिपक्ष–भावाद्, यथा परे मत्सरिणः प्रवादाः।
नयानशेषानविशेषमिच्छन्, न पक्षपाती समयस्तथा ते।।
31. वाग्वैभवं ते निखिलं विवेक्तु–माशास्महे चेन्महनीयमुख्य!
लंघेम जंघालतया समुद्रं, वहेम चन्द्रद्युतिपानतृष्णाम्।।
32. इदं तत्त्वातत्त्वव्यतिकरकरालेऽन्धतमसे,
जगन्मायाकारैरिव हतपरैर्हा! विनिहितम्!
तदुद्धर्त्तुंशक्तो नियतमविसंवादिवचन–
स्त्वमेवातस्त्रातस्त्वयि कृतसपर्याः कृतधियः।।

14. अयोगव्यवच्छेदिका

(महावीर–स्तोत्रम्)

–आचार्य हेमचन्द्र

1. अगम्यमध्यात्मविदामवाच्यं, वचस्विनामक्षवतां परोक्षम्।
श्री वर्द्धमानाभिधमात्मरूप–महं स्तुतेर्गोचरमानयामि।।
2. स्तुतावशक्तिस्तव योगिनां न किं, गुणानुरागस्तु ममापि निश्चलः।
इदं विनिश्चित्य तव स्तवं वदन्, न बालिशोऽप्येष जनोऽपराध्यति।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

3. क्व सिद्धसेनस्तुतयो महार्था, अशिक्षितालापकला क्व चैषा।
तथापि यूथाधिपतेः पथस्थः, स्खलद्गतिस्तस्यशिशुर्न शोच्यः।।
4. जिनेन्द्र! यानेव विबाधसे स्म, दुरन्तदोषान् विविधैरुपायैः।
त एव चित्रं त्वदसूययेव, कृताः कृतार्थाः परतीर्थनाथैः।।
5. यथास्थितं वस्तु दिशन्नधीश! न तादृशं कौशलमाश्रितोऽसि।
तुरंग–शृंगाण्युपपादयद्भ्यो, नमः परेभ्यो नवपण्डितेभ्यः।।
6. जगत्यनुध्यानबलेन शश्वत्, कृतार्थयत्सु प्रसभं भवत्सु।
किमाश्रितोऽन्यैः शरणं त्वदन्यः, स्वमांसदानेन वृथा कृपालुः।।
7. स्वयं कुमार्गं लपतां नु नाम, प्रलम्भमन्यानपि लम्भयन्ति।
सुमार्गगंतद्विदमादिशन्त–मसूययान्धा अवमन्वते च।।
8. प्रादेशिकेभ्यः परशासनेभ्यः, पराजयो यत्तव शासनस्य।
खद्योतपोतद्युतिडम्बरेभ्यो, विडम्बनेयं हरिमण्डलस्य।।
9. शरण्य! पुण्ये तव शासनेऽपि, संदेग्धि यो विप्रतिपद्यते वा।
स्वादौ स तथ्ये स्वहिते च पथ्ये, संदेग्धि वा विप्रतिपद्यते वा।।
10. हिंसाद्यसत्कर्मपथोपदेशा–दसर्वविन्मूलतया प्रवृत्तेः।
नृशंसदुर्बुद्धि–परिग्रहाच्च, ब्रूमस्त्वदन्यागममप्रमाणम्।।
11. हितोपदेशात्सकलज्ञक्लृप्ते–र्मुमुक्षु–सत्साधुपरिग्रहाच्च,
पूर्वापरार्थेऽप्यविरोधसिद्धे, स्त्वदागमा एव सतां प्रमाणम्।।
12. क्षिप्येत वान्यैः सदृशीक्रियेत वा, तवांघ्रिपीठे लुठनं सुरेशितुः।
इदं यथावस्थितवस्तुदेशनं, परैः कथंकारमपाकरिष्यते।।
13. तद्दुःषमाकाल–खलायितं वा, पचेलिमं कर्म भवानुकूलम्।
उपेक्षते यत्तव शासनार्थ–मयं जनो विप्रतिपद्यते वा।।
14. परःसहस्राः शरदस्तपांसि, युगान्तरं योगमुपासतां वा।
तथापि ते मार्गमनापतन्तो, न मोक्ष्यमाणा अपि यान्ति मोक्षम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

15. अनाप्तजाड्यादिविनिर्मितत्त्व–संभावना–संभविविप्रलम्भाः।
परोपदेशाः परमाप्त–क्लृप्त–पथोपदेशे किमु संरभन्ते।।
16. यदार्जवादुक्तमयुक्तमन्यै–स्तदन्यथाकारमकारि शिष्यैः।
न विप्लवोऽयं तव शासनेऽभू–दहो अधृष्या तव शासनश्रीः।।
17. देहाद्ययोगेन सदा शिवत्वं, शरीरयोगादुपदेशकर्म।
पररपररपर्धि कथं घटेत? परोपक्लृप्तेष्वधिदैवतेषु।।
18. प्रागेव देवान्तरसंश्रितानि, रागादिरूपाण्यवमान्तराणि।
न मोहजन्यां करुणामपीश! समाधिमाध्यस्थ्ययुगाश्रितोऽसि।।
19. जगन्ति भिन्दन्तु सृजन्तु वा पुन–र्यथातथा वा पतयः प्रवादिनाम्।
त्वदेकनिष्ठे भगवन्! भवक्षय–क्षमोपदेशे तु परं तपस्विनः।।
20. वपुश्च पर्यङ्कशयं श्लथं च, दृशौ च नासा नियते स्थिरे च।
न शिक्षितेयं परतीर्थनाथैः, जिनेन्द्र! मुद्रापि तवान्यदास्ताम्।।
21. यदीय–सम्यक्त्व–बलात्प्रतीमो, भवादृशानां परमस्वभावम्।
कुवासनापाशविनाशनाय, नमोऽस्तु तस्मै तव शासनाय।।
22. अपक्षपातेन परीक्षमाणा, द्वयं द्वयस्याप्रतिमं प्रतीमः।
यथास्थितार्थप्रथनं तवैत–दस्थाननिर्बन्धरसं परेषाम्।।
23. अनाद्यविद्योपनिषन्निषण्णै–र्विशृंखलैश्चापलमाचरद्भिः।
अमूढलक्ष्योऽपि पराक्रिये यत्,, त्वत्किंकरः किं करवाणि देव!।।
24. विमुक्तवैरव्यसनानुबन्धाः, श्रयन्ति यां शाश्वतवैरिणोऽपि।
परैरगम्यां तव योगिनाथ! तां देशनाभूमिमुपाश्रयेऽहम्।।
25. मदेन मानेन मनोभवेन, क्रोधेन लोभेन च संमदेन।
पराजितानां प्रसभं सुराणां, वृथैव साम्राज्यरुजा परेषाम्।।
26.. स्वकण्ठपीठे कठिनं कुठारं, परे किरन्तः प्रलपन्तु किंचित्।
मनीषिणां तु त्वयि वीतराग! न रागमात्रेण मनोऽनुरक्तम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

27. सुनिश्चितं मत्सरिणो जनस्य, न नाथ! मुद्रामतिशेरते ते।
माध्यस्थ्यमास्थाय परीक्षका ये, मणौ च काचे च समानुबन्धाः।।

28. इमां समक्षं प्रतिपक्षसाक्षिणा–मुदारघोषामवघोषणां ब्रुवे।
न वीतरागात्परमस्ति दैवतं, न चाप्यनेकान्तमृते नयस्थितिः।।

29. न श्रद्धयैव त्वयि पक्षपातो, न द्वेषमात्रादरुचिः परेषु।
यथावदाप्तत्वपरीक्षया तु, त्वामेव वीर! प्रभुमाश्रिताःस्म।।

30. तमःस्पृशामप्रतिभासभाजं, भवन्तमप्याशु विविन्दते याः।
महेम चन्द्रांशुदशावदाता–स्तास्तर्कपुण्या जगदीश! वाचः।।

31. यत्र तत्र समये यथा तथा, योऽसि सोऽस्यभिधया यया तया।
वीतदोषकलुषः स चेद्भवा–नेक एव भगवन्नमोऽस्तु ते।।

32. इदं श्रद्धामात्रं तदथ परनिन्दां मृदुधियो,
विगाहन्तां हन्त प्रकृतिपरवादव्यसनिनः।
अरक्तद्विष्टानां जिनवर! परीक्षाक्षमधिया–
मयं तत्त्वालोकः स्तुतिमयमुपाधिं विधृतवान्।।

15. कर्त्तव्य–षट्त्रिंशिका

–आचार्य तुलसी

1. स्वकर्त्तव्यमकर्त्तव्यं विदंति नहि ये जनाः।
यदा कदाप्यनिष्टं स्यादिह तेषामतर्कितम्।।

2. कृत्याकृत्यमजानानाः, पशूयन्ते नरा अपि।
कृत्याकृत्यविवेको हि, नृपश्वोरन्तरं विदुः।।

3. विहाय सकलं कार्यं, कार्य्यः कर्तव्यनिर्णयः।
सर्वतः प्राग् मनुष्येण, साधुभिस्तु विशेषतः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

4. साधोः साधुत्वसंरक्षा, कर्त्तव्यं प्रथमं मतम्।
तत्र क्षम्या क्षतिर्न स्याद्, मनागपि मनस्विनः।।
5. पदे पदे क्षतिं कुर्यात्, साधुत्वव्यपदेशभाक्।
ततस्तस्य कृते किं स्याल्लज्जास्पदमतोऽधिकम्।।
6. दद्याच्छिक्षां यथान्यस्मै, तथैवाचरणं निजम्।
केवलेनोपदेशेन, निश्चितं वाग्विडंबना।।
7. शास्त्रीयाः साम्प्रदायिक्यो, मर्यादा निर्मिता मताः।
तास्ताः प्राणाधिका मत्वा, वर्तितव्यं सदा बुधैः।।
8. कुर्यात् तुच्छत्वबुद्धिं यो, मर्यादायां महामदः।
तुच्छत्वं प्राप्नुयाल्लोके, सोऽतिशीघ्रं समंततः।।
9. गणोऽयमहमेवास्मि, अहमेव गणोऽस्त्ययम्।
ऐक्यं ममास्य चान्योन्यं, चिंतनीयमिति ध्रुवम्।।
10. शिरोरत्नमिवार्याज्ञां, धारयन्तः स्वमस्तके।
निर्मांतु निखिलं कार्यम्, आचार्याज्ञानुवर्तिनः।।
11. यस्योपरि यदा यत्र, यादृग् दृष्टिर्गणेशितुः।
तस्योपरि तदा तत्र, तादृग् दृष्टिर्भवेत् सताम्।।
12. गुरोर्दृष्टिमनुदृष्टिरिङ्गितं चेङ्गितं तथा।
विचारोऽनुविचारं स्याच्छिष्याणां दुर्गुणद्विषाम्।
13. चित्तवृत्तिमनुस्वीया, चित्तवृत्तिर्मतिस्तथा।
श्रीवीरप्रभुणा प्रोक्तम्–आचारांगे विलोक्यताम्।।**(युग्मम्)**
14. अप्रसन्नो गुरुर्भूयात्, किंचित् कारणमाश्रयन्।
प्रसन्नीकुरुतां शिष्यो, नम्रवाक्यनिवेदनात्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

15. विनेयो निजसर्वस्वं, मन्यते सर्वदा गुरुम्।
आराधयेत् यथा वह्निम्, आहिताग्निः कृतांजलिः।।
16. पृष्टो गुरुभिराहूतो, निर्दिष्टोऽभीष्टकर्मणि।
मन्वानो भागधेयं स्वं, धन्यं धन्यस्तथाचरेत्।।
17. बाढस्वरेण यत्रेष्टं, जल्पनं बाढमालपेत्।
मन्दस्थाने तथा मन्दं वर्तेताज्ञा यथा गुरोः।।
18. सूचनां सकृदाकर्ण्य, न द्विस्त्रिः श्रोतुमापतेत्।
संपादयेत्तथा कार्यं, यथा स्याद् विनयश्रुतिः।।
19. काये मनसि वाक्ये वा, प्रच्छन्ने प्रकटेऽपि वा।
न मनागपि मालिन्यमाचार्यैस्तनुते सुधीः।।
20. उपालम्भे प्रशंसायां चेतोवृत्तिः सदा सदृक्।
निरतः साधनामार्गे, निर्वाणं साधयेद्द्रुतम्।।
21. गुरोर्वाक्यं प्रतीक्षेत, मनस्यामोदमादधत्।
मुक्ताहार इवाकंठे, स्थापयेत् तत्समादरात्।।
22. पठने–पाठने चैव, लेखने प्रतिलेखने।
शिक्षणे वीक्षणे स्थाने, साधोः स्यात् सावधानता।।
23. सर्वव्रतशिरोरत्नं ब्रह्मचर्यमुदीरितम्।
वृतिभिर्नवभिस्तस्य, कार्या रक्षा महात्मभिः।।
24. भ्रूविक्षेपमनौचित्याद्, न सृजेदात्मयंत्रितः।
लोके हास्यं गृहे हानिः–येन भूयादचिंतिता।।
25. पृष्टे वा यदि वाऽपृष्टे, दृष्टेऽदृष्टेऽपि कर्मणि।
प्राणात्ययेऽपि नो ब्रूयाद्, मृषा सत्यव्रतो मुनिः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

26. धर्मोपकरणेऽपीत्थं, न ममत्वं समाचरेत्।
न हिंस्यात् प्राणिनः प्राणान् नादत्तमाददीत यत्।।
27. रत्नाधिका भवेयुर्ये, सर्वदा विनयोचिताः।
विनयं नातिवर्तेत, तेषामग्रे महामतिः।।
28. एते संति लघीयान्सस्तर्जनीयाः क्षणे क्षणे।
नेति निर्घृणता कार्या स्वात्मसाधनतत्परैः।।
29. कीदृग् प्रकृतिरेतस्य, पश्यैष कुरुते कथम्।
एतयोरैक्यमाचित्रं, धिगेष नहि लज्जते।।
30. इत्याद्यालोचनां त्यक्त्वा, परेषां स्वात्मदर्शिभिः।
स्वदोषा दर्शनीयाः स्युर्येन स्यान्निर्वृतिर्हृदि।।
31. लभेरन्नापदं दीर्घां, परदोषं दिदृक्षवः।
स्वात्मदर्शी सुखी सद्यो, वीर–वाणी श्रुतिश्रुता।।
32. शीघ्रं सद्धर्मसंघस्य, प्रचारःपृथ्वीतले।
कथं भूयादिति ध्यायेत्, सर्वदा स्वधिया सुधीः।।
33. सोढव्याः शक्तिमत्त्वेन, द्वाविंशतिः परीषहाः।
कातराः कष्टवेलायां, भ्रश्यंति संयमाद् भृशम्।।
34. हृद्दाढ्यं रक्षणीयं भो, भीतिमुत्सार्य भावतः।
नीतिन्याययुते मार्गे, सदा चेतःप्रसन्नता।।
35. अध्यात्मचिंता सुचिरं विधेया, कदापि हेया न विमोक्षवीथिः।
गेया गुरोः सद्गुणगीतिरेव, ध्येया कृतिः सद्विषणाधनेन।।
36. क्वचित् कलाया न मदो विधेयो, न दंभचर्या न च दोषवृद्धिः।
कृतातिचारस्य विशुद्धिराशु, कार्या विकार्या न विचारवृत्तिः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

37. साधूनां सुविवेकपूरितदृशां साध्वीसमाजस्य च।
किं ध्येयं सततं विचार–रुचिरं चादेयमप्यस्ति किम्।।
हेयं ज्ञेयमथेति संगमयितुं चैकाह्निकीयं कृता।
सद्बोधा वदनाङ्गजेन गणिना कर्त्तव्य–षट्त्रिंशिका।।

16. संघ–षट्त्रिंशिका

–आचार्य तुलसी

1. संघः शरणं त्राणं गतिः प्रतिष्ठा च साधनाधारः।
तस्माद् भूयो भद्रं भूयादनघाय धर्मसंघाय।।
2. तीर्थं–संघं संस्थाप्य, तीर्थकरत्वं प्रपेदिरे जिनाः सर्वे।
तस्माद् भूयो भद्रं भूयादनघाय धर्मसंघाय।।
3. संघतुलोत्तीर्णा ये, ते हि लभन्ते स्वसाध्यसंसिद्धिम्।
तस्माद् भूयो भद्रं भूयादनघाय धर्मसंघाय।।
4. कः संघः का स्थितिस्तस्य, किं वैशिष्ट्यं च विद्यते?
संक्षेपेण विवक्षामि, श्रूयतां मेऽनुशासनम्।।
5. सारणा वारणा यत्र, सर्वदा समयोचिता।
सापेक्षत्वेन जायेत, स संघः संघ उच्यते।।
6. प्रतिक्षणं प्रवर्तेत, घनं यत्र प्रशासनम्।
आत्मानुशासनासीनं स संघः संघ उच्यते।।
7. सामंजस्यं सहास्तित्वं, समेषां सहवर्तिनाम्।
अन्योन्यापेक्षता यत्र, स संघः संघ उच्यते।।
8. प्रस्तुता यत्र चैकार्थं सर्वे सर्वार्थमेककः।
स्वयं संभागिता सात्म्यं, स संघः संघ उच्यते।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

9. निपुणं यत्र नेतृत्वं, जागरूकमनीदृशम्।
निर्णायकमति ख्यातं, स संघः संघ उच्यते।।
10. दोषा न पालिता यत्र, न च दोषा उपेक्षिताः।
संशोधिता भवेयुस्ते, स संघः संघ उच्यते।।
11. न रूढतां समारूढः, मूढतां न समाश्रितः।
मुदा माध्यस्थ्यमापन्नः, स संघः संघ उच्यते।।
12. त्रुटावंगुलिनिर्देशः, यत्र जाग्रत् प्रजायते।
तूष्णीका न च द्रष्टारः, स संघः संघ उच्यते।।
13. नेर्ष्यासूया न मात्सर्यं, गुणिनां गुणगौरवे।
प्रमोदश्च प्रसृमरः, स संघः संघ उच्यते।।
14. विश्वस्ता यत्र स्वस्थाः स्युः, रुग्णा वृद्धास्तपस्विनः।
सुश्रूषया समाश्वस्ताः, स संघः संघ उच्यते।।
15. आस्थाभावः स्वभावाद्यो, नेतारं प्रति प्रत्यहम्।
यत्र प्रगतिमापन्नः, स संघः संघ उच्यते।।
16. विनीताः नम्रतां नीता, यत्र साध्व्यो मुमुक्षवः।
वात्सल्यवृद्धा वृद्धाश्च, स संघः संघ उच्यते।।
17. अध्यात्मरसिका यत्र, प्रेक्षाध्यानपरायणाः।
अनेके श्रमणाः सत्यः, स संघः संघ उच्यते।।
18. यत्रालस्य–प्रमिला–प्रमाद–परिपन्थिनः।
सन्तो जाग्रति सत्यश्च, स संघः संघ उच्यते।।
19. आचारनिष्ठा आचाराऽऽराधका मानिताःश्रुताः।
महत्त्वं प्राप्नुयुर्यत्र, स संघः संघ उच्यते।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

20. मूल्यं सुरक्षितं यत्र, परिवर्तनमीप्सितम्।
सावकाशं समर्यादं, स संघः संघ उच्यते।।
21. यत्र प्रवाहपातित्वं, नास्त्यस्तित्वप्रणाशकम्।
विचिन्तनपरा वृत्तिः, स संघः संघ उच्यते।।
22. मर्यादा सद्गुरोराज्ञा, यत्र प्राणाधिका मता।
आदृता व्यापृता स्फीता, स संघः संघ उच्यते।।
23. आज्ञासूत्रे निबद्धाः, स्युः सर्वेपि साधनाधनाः।
मणका इव मालायां, स संघः संघ उच्यते।।
24. महत्त्वाकांक्षिता–व्यक्तिश्रिता यत्र विवर्जिता।
सम्मुखीनो गणादर्शः, स संघः संघ उच्यते।।
25. विपत्तिरविनीतस्य, विनीतस्य च सम्पदा।
यत्र द्वयं सुविज्ञातं, स संघः संघ उच्यते।।
26. यत्र रत्नाधिका ज्येष्ठा, वन्द्यन्ते लघुभिः सदा।
लघवो लालिता ज्येष्ठैः, स संघः संघ उच्यते।।
27. साधूनामिव साध्वीनामन्योन्यमभिवादनम्।
यत्र स्यान्नम्रभावेन, स संघः संघ उच्यते।।
28. साधूनामिव साध्वीनां, वैशिष्ट्यं सर्वसम्मतम्।
पूज्यते संयमो यत्र, स संघः संघ उच्यते।।
29. लिंगभेदाच्चतुर्भेदो, द्विधाऽयं व्रतभेदतः।
आचार्योऽधिपतिर्यत्र, स संघः संघ उच्यते।।
30. समेषां सुलभो यत्र, विकासावसरो वरः।
पार्थक्यमर्हतायां स्यात्, स संघः संघ उच्यते।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

31. यत्र सर्वेऽपि नेतारः, सर्वे पण्डितमानिनः।
सर्वे महत्त्वमिच्छन्ति, स संघोऽसंघतां व्रजेत्।।
32. हीनामालोचनां नित्यं, कुर्वाणाः क्रमकर्षकाः।
तिष्ठन्ति तरुणा यत्र, स संघोऽसंघतां व्रजेत्।।
33. क्षुद्राश्छिद्रान्वेषिणः स्युर्यत्र स्वार्थपरायणाः।
सुखशीलाश्च निःशीलाः, स संघोऽसंघतां व्रजेत्।।
34. प्रदर्शनपराः प्रायो, दृष्टिशून्या गुरुद्विषः।
तुंदपरिमृजो यत्र, स संघोऽसंघतां व्रजेत्।।
35. तेरापंथः श्रेयः पंथा, एको नितरां यत्र नियन्ता।
अमलो यस्याचारः सारः, चिरजीवी स्यात् संघाकारः।।
36. भिक्षुचेतनावर्षे, महघवशताब्दिमहोत्सवावसरे।
संघषट्त्रिंशिकेयं, विहिता बीदासरे नवमगणिना।।

17. श्री भक्तामर स्तोत्रम्

–आचार्य मानतुंग

1. भक्तामर–प्रणत–मौलिमणि–प्रभाणा–
मुद्योतकं दलित–पाप–तमोवितानम्।
सम्यक् प्रणम्य जिनपादयुगं युगादा–
वालंबनं भवजले पततां जनानाम्।।
2. यःसंस्तुतः सकल–वाङ्मयतत्त्वबोधा–
दुद्भूतबुद्धिपटुभिः सुरलोकनाथैः।
स्तोत्रैर्जगत्त्रितयचित्तहरैरुदारैः
स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

3. बुद्ध्या विनाऽपि विबुधार्चितपादपीठ!
स्तोतुं समुद्यत–मतिर्विगत–त्रपोऽहम्।
बालं विहाय जलसंस्थितमिन्दुबिंब–
मन्यःक इच्छति जनःसहसा ग्रहीतुम्।।

4. वक्तुं गुणान् गुणसमुद्र! शशांककांतान्,
कस्ते क्षमः सुरगुरुप्रतिमोऽपि बुद्ध्या।
कल्पांत–काल–पवनोद्धतनक्रचक्रं,
को वा तरीतुमलमम्बुनिधिं भुजाभ्याम्।।

5. सोऽहं तथापि तव भक्तिवशान्मुनीश!
कर्तुं स्तवं विगतशक्तिरपि प्रवृत्तः।
प्रीत्याऽऽत्मवीर्यमविचार्य मृगो मृगेन्द्रं,
नाभ्येति किं निजशिशोः परिपालनार्थम्।।

6. अल्पश्रुतं श्रुतवतां परिहासधाम,
त्वद्भक्तिरेव मुखरीकुरुते बलान्माम्।
यत्कोकिलः किल मधौ मधुरं विरौति,
तच्चारु–चाम्र–कलिका–निकरैकहेतुः।।

7. त्वत्संस्तवेन भवसंतति–सन्निबद्धं,
पापं क्षणात्क्षयमुपैति शरीरभाजाम्।
आक्रांत–लोकमलिनीलमशेषमाशु–
सूर्यांशुभिन्नमिव शार्वरमंधकारम्।।

8. मत्वेति नाथ! तव संस्तवनं मयेद–
मारभ्यते तनुधियापि तव प्रभावात्।
चेतो हरिष्यति सतां नलिनीदलेषु
मुक्ताफल–द्युतिमुपैति ननूदबिंदुः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

9. आस्तां तव स्तवनमस्तसमस्त–दोषं
त्वत्संकथापि जगतां दुरितानि हन्ति।
दूरे सहस्रकिरणः कुरुते प्रभैव
पद्माकरेषु जलजानि विकासभांजि।।

10. नात्यद्भुतं भुवनभूषण! भूतनाथ!
भुतैर्गुणैर्भुवि भवंतमभिष्टुवंतः।
तुल्या भवंति भवतो ननु तेन किं वा
भूत्याश्रितं य इह नात्मसमं करोति।।

11. दृष्ट्वा भवंतमनिमेषविलोकनीयं
नान्यत्र तोषमुपयाति जनस्य चक्षुः।
पीत्वा पयः शशिकरद्युति–दुग्धसिंधोः
क्षारं जलं जलनिधेरसितुं क इच्छेत्।।

12. यैः शांतरागरुचिभिः परमाणुभिस्त्वं
निर्मापितस्त्रिभुवनैक–ललामभूत!
तावंत एव खलु तेऽप्यणवः पृथिव्यां
यत्ते समानमपरं नहि रूपमस्ति।।

13. वक्त्रं क्व ते सुरनरोरगनेत्रहारि
निःशेष–निर्जित–जगत्–त्रितयोपमानम्।
बिम्बं कलंकमलिनं क्व निशाकरस्य
यद् वासरे भवति पांडुपलाशकल्पम्।।

14. संपूर्णमंडल–शशांककलाकलाप–
शुभ्रा गुणास्त्रिभुवनं तव लंघयंति।
ये संश्रितास्त्रिजगदीश्वर–नाथमेकं
कस्तान् निवारयति संचरतो यथेष्टम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

15. चित्रं किमत्र यदि ते त्रिदशांगनाभि–
नीतं मनागपि मनो न विकार–मार्गम्।
कल्पांतकालमरुता चलिताचलेन
किं मंदराद्रिशिखरं चलितं कदाचित्।।

16. निर्धूमवर्तिरपवर्जित–तैलपूरः
कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि।
गम्यो न जातु मरुतां चलिताचलानां
दीपोऽपरस्त्वमसि नाथ! जगत्प्रकाशः।।

17. नास्तं कदाचिदुपयासि न राहुगम्यः,
स्पष्टीकरोषि सहसा युगपज्जगंति।
नाम्भोधरोदर–निरुद्धमहाप्रभावः
सूर्यातिशायिमहिमासि मुनीन्द्र! लोके।।

18. नित्योदयं दलितमोहमहांधकारं
गम्यं न राहुवदनस्य न वारिदानाम्।
विभ्राजते तव मुखाब्जमनल्पकांति
विद्योतयज्जगदपूर्व–शशांकबिंबम् ।।

19. किं शर्वरीषु शशिनाह्नि विवस्वता वा?
युष्मन्मुखेन्दु–दलितेषु तमस्सु नाथ!
निष्पन्नशालिवनशालिनि जीवलोके
कार्यं कियज्जलधरैर्जलभारनम्रैः।।

20. ज्ञानं यथा त्वयि विभाति कृतावकाशं
नैवं तथा हरिहरादिषु नायकेषु।
तेजः स्फुरन्मणिषु याति यथा महत्त्वं
नैवं तु काचशकले किरणाकुलेऽपि।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

21. मन्ये वरं हरिहरादय एव दृष्टा
दृष्टेषु येषु हृदयं त्वयि तोषमेति।
किं वीक्षितेन भवता भुवि येन नान्यः
कश्चिन्मनो हरति नाथ! भवान्तरेऽपि।।

22. स्त्रीणां शतानि शतशो जनयन्ति पुत्रान्
नान्या सुतं त्वदुपमं जननी प्रसूता।
सर्वा दिशो दधति भानि सहस्ररश्मिं,
प्राच्येव दिग् जनयति स्फुरदंशुजालम्।।

23. त्वामामनन्ति मुनयः परमं पुमांस–
मादित्यवर्णममलं तमसः परस्तात्।
त्वामेव सम्यगुपलभ्य जयन्ति मृत्युं
नान्यः शिवः शिवपदस्य मुनीन्द्र! पंथाः।।

24. त्वामव्ययं विभुमचिन्त्यमसंख्यमाद्यं
ब्रह्माणमीश्वरमनन्तमनंगकेतुम्।
योगीश्वरं विदितयोगमनेकमेकं
ज्ञानस्वरूपममलं प्रवदन्ति सन्तः।।

25. बुद्धस्त्वमेव विबुधार्चितबुद्धि–बोधात्
त्वं शंकरोऽसि भुवनत्रय–शंकरत्वात्।
धाताऽसि धीर! शिवमार्गविधेर्विधानात्
व्यक्तं त्वमेव भगवन्! पुरुषोत्तमोऽसि।।

26. तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ!
तुभ्यं नमः क्षितितलामलभूषणाय।
तुभ्यं नमस्त्रिजगतः परमेश्वराय
तुभ्यं नमो जिन! भवोदधि–शोषणाय।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

27. को विस्मयोऽत्र यदि नाम गुणैरशेषै–
स्त्वं संश्रितो निरवकाशतया मुनीश!
दोषैरुपात्त–विविधाश्रय–जातगर्वैः
स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि।।

28. उच्चैरशोकतरुसंश्रितमुन्मयूख–
माभाति रूपममलं भवतो नितान्तम्।
स्पष्टोल्लसत् किरणमस्ततमोवितानं
बिम्बं रवेरिव पयोधर–पार्श्ववर्ति।।

29. सिंहासने मणिमयूखशिखाविचित्रे
विभ्राजते तव वपुः कनकावदातम्।
बिम्बं वियद्–विलसदंशुलता–वितानं
तुंगोदयाद्रि–शिरसीव सहस्ररश्मेः।।

30. कुन्दावदात–चलचामर–चारुशोभं
विभ्राजते तव वपुः कलधौतकान्तम्।
उद्यच्छशांक–शुचिनिर्झर–वारिधार–
मुच्चैस्तटं सुरगिरेरिव शातकौम्भम्।।

31. छत्रत्रयं तव विभाति शशांककांत–
मुच्चैः स्थितं स्थगितभानुकर–प्रतापम्।
मुक्ताफल–प्रकरजाल–विवृद्धशोभं
प्रख्यापयत् त्रिजगतः परमेश्वरत्वम्।।

32. उन्निद्रहेम–नवपंकजपुंजकांती
पर्युल्लसन्–नखमयूखशिखाभिरामौ।
पादौ पदानि तव यत्र जिनेन्द्र! धत्तः
पद्मानि तत्र विबुधाः परिकल्पयन्ति।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

33. इत्थं यथा तव विभूतिरभूज्जिनेन्द्र!
धर्मोपदेशनविधौ न तथा परस्य।
यादृक् प्रभा दिनकृतः प्रहतान्धकारा
तादृक् कुतो ग्रह–गणस्य विकाशिनोऽपि।।

34. श्च्योतन्मदाविलविलोलकपोलमूल–
मत्तभ्रमद्–भ्रमरनाद–विवृद्धकोपम्।
ऐरावताभमिभमुद्धतमापतन्तं
दृष्ट्वा भयं भवति नो भवदाश्रितानाम्।।

35. भिन्नेभ–कुंभ–गलदुज्ज्वल–शोणिताक्त–
मुक्ताफल–प्रकर–भूषितभूमिभागः।
बद्धक्रमः क्रमगतं हरिणाधिपोऽपि
नाक्रामति क्रमयुगाचलसंश्रितं ते।।

36. कल्पांतकाल–पवनोद्धत–वह्निकल्पं
दावानलं ज्वलितमुज्ज्वलमुत्स्फुलिंगम्।
विश्वं जिघत्सुमिव सम्मुखमापतन्तं
त्वन्नामकीर्तनजलं शमयत्यशेषम्।।

37. रक्तेक्षणं समदकोकिल–कण्ठनीलं
क्रोधोद्धतं फणिनमुत्फणमापतन्तम्।
आक्रामति क्रमयुगेन निरस्तशंकस्
त्वन्नामनागदमनी हृदि यस्य पुंसः।।

38. वल्गत्तुरंग–गजगर्जित–भीमनाद–
माजौ बलं बलवतामपि भूपतीनाम्।
उद्यद्दिवाकरमयूख–शिखापविद्धं
त्वत्कीर्तनात् तम इवाशु भिदामुपैति।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

39. कुन्ताग्रभिन्न–गजशोणित–वारिवाह–
वेगावतार–तरणातुरयोध–भीमे।
युद्धे जयं विजितदुर्जयजेयपक्षास्–
त्वत्पाद–पंकजवनाश्रयिणो लभन्ते।।

40. अम्भोनिधौ क्षुभितभीषणनक्रचक्र–
पाठीन–पीठभयदोल्वणवाडवाग्नौ।
रंगत्तरंग–शिखरस्थित–यानपात्रास्
त्रासं विहाय भवतः स्मरणाद् व्रजन्ति।।

41. उद्भूतभीषणजलोदर–भारभुग्नाः
शोच्यां दशामुपगताश्च्युतजीविताशाः।
त्वत्पाद–पंकजरजोऽमृतदिग्धदेहा
मर्त्या भवंति मकरध्वजतुल्यरूपाः।।

42. आपाद–कण्ठमुरुशृंखल–वेष्टितांगा
गाढं बृहन्निगडकोटि–निघृष्टजंघाः।
त्वन्नाममन्त्रमनिशं मनुजाः स्मरन्तः,
सद्यः स्वयं विगतबंधभया भवंति।।

43. मत्तद्विपेन्द्र–मृगराज–दवानलाहि–
संग्राम–वारिधि–महोदर–बंधनोत्थम्।
तस्याशु नाशमुपयाति भयं भियेव
यस्तावकं स्तवमिमं मतिमानधीते।।

44. स्तोत्रस्रजं तव जिनेन्द्र! गुणैर्निबद्धां,
भक्त्या मया रुचिरवर्णविचित्रपुष्पाम्।
धत्ते जनो य इह कंठगतामजस्रं
तं मानतुंगमवशा समुपैति लक्ष्मीः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

18. कल्याण–मंदिर–स्तोत्रम्

–आचार्य सिद्धसेन

1. कल्याण–मंदिरमुदारमवद्य–भेदि,
भीताभय–प्रदमनिन्दित–मङ्घ्रिपद्म।
संसार–सागर–निमज्जदशेष–जन्तु–
पोतायमानमभिनम्य जिनेश्वरस्य।।

2. यस्य स्वयं सुरगुरुर्गरिमाम्बुराशेः,
स्तोत्रं सुविस्तृतमतिर् न विभुर् विधातुम्।
तीर्थेश्वरस्य कमठस्मय–धुमकेतोस्,
तस्याहमेष किल संस्तवनं करिष्ये।।

3. सामान्यतोऽपि तव वर्णयितुं स्वरूप–
मस्मादृशाः कथमधीश! भवन्त्यधीशाः।
धृष्टोऽपि कौशिक–शिशुर् यदि वा दिवान्धो,
रूपं प्ररूपयति किं किल घर्मरश्मेः।।

4. मोहक्षयादनुभवन्नपि नाथ! मर्त्यो,
नूनं गुणान् गणयितुं न तव क्षमेत।
कल्पान्त–वान्तपयसः प्रकटोऽपि यस्मान्
मीयेत केन जलधेर् ननु रत्नराशिः।।

5. अभ्युद्यतोऽस्मि तव नाथ! जडाशयोऽपि
कर्तुं स्तवं लसदसंख्यगुणाकरस्य।
बालोऽपि किं न निजबाहुयुगं वितत्य,
विस्तीर्णतां कथयति स्वधियाम्बुराशेः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

6. ये योगिनामपि न यान्ति गुणास्तवेश!
वक्तुं कथं भवति तेषु ममावकाशः।
जाता तदेवमसमीक्षित–कारितेयं,
जल्पन्ति वा निज–गिरा ननु पक्षिणोऽपि।।

7. आस्तामचिन्त्यमहिमा जिन! संस्तवस्ते,
नामाऽपि पाति भवतो भवतो जगन्ति।
तीव्रातपोपहत–पान्थजनान् निदाघे,
प्रीणाति पद्मसरसः सरसोऽनिलोऽपि।।

8. हृद्वर्तिनि त्वयि विभो! शिथिलीभवंति,
जन्तोः क्षणेन निबिडा अपि कर्म–बन्धाः।
सद्यो भुजंगममया इव मध्यभाग–
मभ्यागते वनशिखंडिनि चन्दनस्य।।

9. मुच्यन्त एव मनुजाः सहसा जिनेन्द्र!
रोद्रैरुपद्रवशतैस् त्वयि वीक्षितेऽपि।
गो–स्वामिनि स्फुरित–तेजसि दृष्टमात्रे,
चोरैरिवाशु पशवः प्रपलायमानैः।।

10. त्वं तारको जिन! कथं भविनां त एव,
त्वामुद्वहन्ति हृदयेन यदुत्तरन्तः।
यद् वा दृतिस्तरति यज्जलमेष नून–
मंतर्गतस्य मरुतः स किलानुभावः।।

11. यस्मिन् हर–प्रभृतयोऽपि हतप्रभावाः,
सोऽपि त्वया रतिपतिः क्षपितः क्षणेन।
विध्यापिता हुतभुजः पयसाथ येन,
पीतं न किं तदपि दुर्धर–वाडवेन।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

12. स्वामिन्ननल्प–गरिमाणमपि प्रपन्नं
त्वां जन्तवः कथमहो हृदये दधानाः।
जन्मोदधिं लघु तरन्त्यतिलाघवेन,
चिन्त्यो न हन्त महतां यदि वा प्रभावः।।
13. क्रोधस्त्वया यदि विभो! प्रथमं निरस्तो,
ध्वस्तास्तदा बत कथं किल कर्मचौराः।
प्लोषत्यमुत्र यदि वा शिशिरापि लोके,
नीलद्रुमाणि विपिनानि न किं हिमानी।।
14. त्वां योगिनो जिन! सदा परमात्मरूप–
मन्वेषयन्ति हृदयाम्बुज–कोशदेशे।
पूतस्य निर्मलरुचेर्यदि वा किमन्य–
दक्षस्य संभवि पदं ननु कर्णिकायाः।।
15. ध्यानाज्जिनेश! भवतो भविनः क्षणेन,
देहं विहाय परमात्मदशां व्रजंति।
तीव्रानलादुपल–भावमपास्य लोके,
चामीकरत्वमचिरादिव धातुभेदाः।।
16. अन्तः सदैव जिन! यस्य विभाव्यसे त्वं,
भव्यैः कथं तदपि नाशयसे शरीरम्।
एतत्स्वरूपमथ मध्यविवर्तिनो हि,
यद्विग्रहं प्रशमयन्ति महानुभावाः।।
17. आत्मा मनीषिभिरयं त्वदभेदबुद्ध्या,
ध्यातो जिनेन्द्र! भवतीह भवत्प्रभावः।
पानीयमप्यमृतमित्यनुचिन्त्यमानं,
किं नाम नो विषविकारमपाकरोति।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

18. त्वामेव वीततमसं परवादिनोऽपि,
नूनं विभो! हरिहरादिधिया प्रपन्नाः।
किं काचकामलिभिरीश! सितोऽपि शंखो,
नो गृह्यते विविध–वर्णविपर्ययेण।।

19. धर्मोपदेशसमये सविधानुभावा–
दास्तां जनो भवति ते तरुरप्यशोकः।
अभ्युद्गते दिनपतौ समहीरुहोऽपि,
किं वा विबोधमुपयाति न जीवलोकः।।

20. चित्रं विभो! कथमवाङ्मुखवृन्तमेव,
विष्वक् पतत्यविरला सुरपुष्पवृष्टिः।
त्वद्गोचरे सुमनसां यदि वा मुनीश!
गच्छन्ति नूनमध एव हि बन्धनानि।।

21. स्थाने गभीरहृदयोदधि–सम्भवा याः,
पीयूषतां तव गिरः समुदीरयन्ति।
पीत्वा यतः परमसम्मद–संग–भाजो,
भव्या व्रजन्ति तरसाऽप्यजरामरत्वम्।।

22. स्वामिन्! सुदूरमवनम्य समुत्पतन्तो,
मन्ये वदन्ति शुचयः सुरचामरौघाः।
येऽस्मै नतिं विदधते मुनिपुंगवाय,
ते नूनमूर्ध्वगतयः खलु शुद्धभावाः।।

23. श्यामं गभीर–गिरमुज्ज्वल–हेमरत्न–
सिंहासनस्थमिह भव्यशिखण्डिनस्त्वाम्।
आलोकयन्ति रभसेन नदन्तमुच्चैश्
चामीकराद्रि–शिरसीव नवाम्बुवाहम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

24. उद्गच्छता तव सितद्युति–मंडलेन,
लुप्तच्छदच्छविरशोकतरुर्बभूव।
सान्निध्यतोऽपि यदि वा तव वीतराग!
नीरागतां व्रजति को न सचेतनोऽपि।।
25. भो! भो! प्रमादमवधूय भजध्वमेन–
मागत्य निर्वृतिपुरीं प्रति सार्थवाहम्।
एतन्निवेदयति देव! जगत्त्रयाय,
मन्ये नदन्नभिनभः सुरदुन्दुभिस्ते।।
26. उद्योतितेषु भवता भुवनेषु नाथ!
तारान्वितो विधुरयं विहताधिकारः।
मुक्ताकलाप–कलितोल्लसितातपत्र–
व्याजात् त्रिधा धृततनुर्ध्रुवमभ्युपेतः।।
27. स्वेन प्रपूरित–जगत्त्रय–पिण्डितेन,
कांति–प्रताप–यशसामिव संचयेन।
माणिक्य–हेम–रजत–प्रविनिर्मितेन,
सालत्रयेण भगवन्नभितो विभासि।।
28. दिव्यस्रजो जिन! नमत्–त्रिदशाधिपाना–
मुत्सृज्य रत्नरचितानपि मौलिबन्धान्।
पादौ श्रयन्ति भवतो यदि वा परत्र,
त्वत्संगमे सुमनसो न रमन्त एव।।
29. त्वं नाथ! जन्म–जलधेर्विपराङ्मुखोऽपि,
यत् तारयस्यसुमतो निजपृष्ठलग्नान्।
युक्तं हि पार्थिव–निपस्य–सतस्तवैव,
चित्रं विभो! यदसि कर्मविपाकशून्यः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

30. विश्वेश्वरोऽपि जनपालक! दुर्गतस्त्वं,
किं वाऽक्षर–प्रकृति–रप्यलिपिस्त्वमीश!
अज्ञानवत्यपि सदैव कथंचिदेव,
ज्ञानं त्वयि स्फुरति विश्वविकासहेतुः।।

31. प्राग्भार–संभृत–नभांसि रजांसि रोषा–
दुत्थापितानि कमठेन शठेन यानि।
छायाऽपि तैस्तव न नाथ! हता हताशो–
ग्रस्तस्त्वमीभिरयमेव परं दुरात्मा।।

32. यद्गर्जदूर्जित–घनौघमदभ्र–भीमं,
भ्रश्यत्–तडिन्मुसल–मांसल–घोरधारम्।
दैत्येन मुक्तमथ दुस्तरवारि दध्रे,
तेनैव तस्य जिन! दुस्तरवारि कृत्यम्।।

33. ध्वस्तोर्ध्व–केश–विकृताकृति–मर्त्यमुण्ड–
प्रालम्बभृद्–भयद–वक्त्रविनिर्यदग्निः।
प्रेतव्रजः प्रति भवन्तमपीरितो यः,
सोऽस्याऽभवत्, प्रतिभवं भवदुःख–हेतुः।।

34. धन्यास्त एव भुवनाधिप! ये त्रिसन्ध्य–
माराधयन्ति विधिवद् विधुतान्यकृत्याः।
भक्त्योल्लसत्–पुलक–पक्ष्मल–देहदेशाः,
पाद–द्वयं तव विभो! भुवि जन्मभाजः।।

35. अस्मिन्नपार–भववारिनिधौ मुनीश!
मन्ये न मे श्रवण–गोचरतां गतोऽसि।
आकर्णिते तु तव गोत्र–पवित्र–मंत्रे,
किं वा विपद्–विषधरी सविधं समेति।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

36. जन्मान्तरेऽपि तव पादयुगं न देव!
मन्ये मया महितमीहित–दान–दक्षम्।
तेनेह जन्मनि मुनीश! पराभवानां
जातो निकेतनमहं मथिताशयानाम्।।

37. नूनं न मोह–तिमिरावृत–लोचनेन,
पूर्वं विभो! सकृदपि प्रविलोकितोऽसि।
मर्माविधो विधुरयन्ति हि मामनर्थाः,
प्रोद्यत्प्रबंध–गतयः कथमन्यथैते।।

38. आकर्णितोऽपि महितोऽपि निरीक्षितोऽपि,
नूनं न चेतसि मया विधृतोऽसि भक्त्या।
जातोऽस्मि तेन जनबांधव! दुःख पात्रं,
यस्मात् क्रियाः प्रतिफलंति न भावशून्याः।।

39. त्वं नाथ! दुःखिजनवत्सल! हे शरण्य!
कारुण्य–पुण्यवसते! वशिनां वरेण्य!
भक्त्या नते मयि महेश! दयां विधाय,
दुःखांकुरोद्दलन–तत्परतां विधेहि।।

40. निःसंख्य–सार–शरणं शरणं शरण्य–
मासाद्य सादितरिपु–प्रथितावदातम्।
त्वत्पाद–पंकजमपि प्रणिधानवन्ध्यो,
वध्योऽस्मि चेद् भुवन–पावन! हा हतोस्मि।।

41. देवेन्द्रवन्द्य! विदिताखिल–वस्तु–सार!
संसार–तारक! विभो! भुवनाधिनाथ!
त्रायस्व देव! करुणाह्रद! मां पुनीहि,
सीदंतमद्य भयद–व्यसनाम्बुराशेः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

42. यद्यस्ति नाथ! भवदंघ्रि–सरोरुहाणां,
भक्तेः फलं किमपि सन्ततसंचितायाः।
तन्मे त्वदेक–शरणस्य शरण्य! भूयाः,
स्वामी त्वमेव भुवनेऽत्र भवान्तरेऽपि।।
43. इत्थं समाहितधियो विधिवज्जिनेन्द्र!
सान्द्रोल्लसत् पुलक–कंचुकितांगभागाः।
त्वद् बिम्ब–निर्मल–मुखाम्बुज–बद्धलक्ष्या,
ये संस्तवं तव विभो! रचयन्ति भव्याः।।
44. जन–नयन–कुमुदचन्द्र!
प्रभास्वराः स्वर्ग–सम्पदो भुक्त्वा।
ते विगलितमलनिचया,
अचिरान्मोक्षं प्रपद्यन्ते।।

19. चतुर्विंशति–गुण–गेय–गीतिः

–आचार्य तुलसी

1. अयि! प्रथमाप्त! समाप्त–समक्रिय! नाभितनुद्भव! भुवनपते!
वृषभस्वामिन्नन्तर्यामिन्! देहि निजाश्रयममितमते!
प्रथम–जिनेश्वर! गुरुतरभक्त्या, तव चरणस्मरणं विदधे।
कुरु कुरु करुणामपहर विपदं,
देहि शिवास्पदममृतनिधे।।ध्रुवपद।।
2. जितशत्रोर्विजयायाः सूनुः, सिद्धस्त्रिजगत्यजितस्त्वम्।
नाम्नाप्यजितो धाम्नाप्यजितः, स्थाम्नाप्यजितोऽस्यजितस्त्वम्।।
अजित जिनेश्वर!

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

3. कार्यमसंभवमपि तव कृपया, संभव! संभवतामयते।
तर्हि भवाब्धेर्मे निस्तरणं, तव कृपया को विस्मयते।।
संभव जिनवर!

4. चिरमभिनन्दय मामभिनन्दन! संवर–नन्दन! सिद्धि–सखे!
भगवंस्त्वमसि सहायो भविनां, जाते चेतसि भव–विमुखे।।
अभिनन्दन जिन!

5. तव जननी-जठर-स्थित-सुमतेः, शिशुरपि निज-मातुर्मिलितः।
मह्यमपीश! समर्पय सुमतिं, शिव–मिलितः स्यां शीघ्रमितः।।
सुमति जिनेश्वर!

6. तव संज्ञार्धमवाप्य स्वामिन्! पङ्केरुहमृषिणोपमितम्।
किन्त्वहकं तां पूर्णां प्राप्य, त्वत्तामभिलप्स्ये त्वरितम्।।
पद्मप्रभजिन!

7. देहि सुपार्श्व! सुपार्श्वमहो ते, ज्ञानाद्यमित–गुणोपचितम्।
राग–द्वेष–विशेष–विरहितं, महितं मनुजैर्मघवनुतम्।।
सुपार्श्व–जिनवर!

8. चन्द्रस्त्वमसि किलाष्टमजिनवर! न क्षयमेषि न वृद्धिमिति।
वृद्धि–क्षयवानयमपि चंद्रो, नामैकत्वे विषमगतिः।।
चंद्रप्रभजिन!

9. तव सुविधे! साविध्यमुपासितु–मभिधावति बत मम हृदयम्।
कथमथ फलितार्थं प्रविलोके, विधिमुपदिश विज्ञानमयम्।।
सुविधि–जिनेश्वर!

10. शीतल–शीतलताऽग्रे कीदृक्, शशि–मलयजयोः शीतलता।
कुट्टितकांचन–कांचनताग्रे, यादृक् पित्तल–पित्तलता।।
शीतल–जिनवर!

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

11. श्रेयांसः जगदेकश्रेयान्, श्रेयः–सन्तति–सन्धाता।
ध्यानकृतां मुद्रामुपधाय, सहजं जातोऽसौ धाता।।
श्रेयांस–जिनवर!

12. वसुनृप–वेश्मनि वासुपूज्य–नाम्ना वसुमत्यामवतीर्णः।
अविदित्वा वसु हित्वा जगतीं, भव–जलराशिं निस्तीर्णः।।
वासुपूज्य–जिन!

13. विमल–विमलतामहमुपयाचे, रचितांजलिरतिहृष्टमतिः।
श्रुत्वा सनतिं विनतिं विभुवर! कार्या करुणा दृग् महती।।
विमल–जिनेश्वर!

14. ज्ञानाद् दृष्टि–गुणात्त्वमनन्तो, नाम्नानन्तो युक्तमिति।
किन्त्वाकाशं शून्यमनन्तं, कथमिति मान्या कविभणितिः।।
अनन्त–जिनवर!

15. धर्म! यया चतुरङ्गे धर्मे, प्रसरेत् मे प्रतिभा प्रचुरम्।
दर्शय दर्शय तामिह दृष्टिं, वर्षय वाक्यममृतमधुरम्।।
धर्म–जिनेश्वर!

16. शान्ति–जिनेश! समर्थय शान्तिं, कलुषकदर्थित–मद्–हृदये।
व्यर्थय विदित–मथाधिं, व्याधिं, सार्थय सततं सुकृतमये।।1
शान्ति–जिनेश्वर!

17. कुन्थो! तव चरणाब्जनिषेवी, भ्रमरोस्मीति मया वाच्यम्।
ओमसि ओमसि एवमुरीकुरु, नातः परतोऽभ्युपयाच्यम्।।
कुन्थु–जिनेश्वर!

18. त्वरितं तारय तारय तारक! मामरनाथ! जिनेश्वर! रे!
तवशरणागतमवनतमस्तक–मेतं प्रोद्धर प्रोद्धर रे!।।
श्रीअर–जिनवर!

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

19. अङ्गीकृत्य स्त्रीत्वं मल्ले! दर्शितवानिति नयसरणिम्।
आत्मोद्धरणे स्त्रीपुरुषाणां, साम्यमतः कुरुतां करणीम्।।
मल्लि–जिनेश्वर!

20. सुव्रतनाथ! सनाथय सहसा, मादृगशरणं धृतचरणम्।
भवदन्यं कं शरणं मन्ये, त्रोटय मे कर्मावरणम्।।
मुनिसुव्रतजिन!

21. नमो नमस्ते नमिपरमात्म–न्नविकाराय निराकृतये।
सर्वज्ञाय शिवाय भगवते, चिन्मयरूपायामृतये।।
श्रीनमिजिनवर!

22. त्वां नेमीश! समुद्र–शिवा–सुत! ध्येयधिया ध्यायन् ध्यायन्।
स्वात्मन्यवलोके रममाणं, तद्वद्–गुण–गाथां गायन्।।
नेमिजिनेश्वर!

23. पार्श्वय पार्श्वय पार्श्व–प्रभुवर! मामतिदूरे स्थितवन्तम्।
अयस्कान्त इव द्रुतमाकर्षय, दर्शय दर्शय जगदन्तम्।।
पार्श्व–जिनेश्वर!

24. अयि! जगदेकवीर! वीरेश्वर! त्रिशलानन्दन! तीर्थपते!
त्रिकरण–शुद्ध्या त्वामभिवन्दे,
स्तुति–विषयोऽसि न मेऽल्पमतेः।।
वीर–जिनेश्वर!

25. गौतमादिगणभृतां श्रीमतां, चरणाम्भोज–परागपराम्।
मधुकरतां गुणपरिमल–निरतां, लप्स्ये हित्वा कृतिमपराम्।।
प्राप्तानन्दोऽहं ध्यायन् धर्माचार्यम्।
दुष्कृत–संदोहं, सपदि भिनद्मि विकार्यम्।।ध्रुपदम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

26. धर्मधुरीण! परमपथगामिन्! स्वामिन्! श्रीदैपेय!
मा विस्मर मामादृतचरणं, धृतशरणं श्रद्धेय!।।
प्राप्तानन्दोऽहं

27. अये! भारमल! विमल–विभान्वित! सतताध्यात्मरताशय!
भिक्षोर्द्वैतीयीक–पदाश्रित! मामनिशं प्रोल्लासय।।
प्राप्तानन्दोऽहं

28. ब्रह्मचर्य–चरितेन निजेन, प्रमथितमन्मथराज!
रायचन्द्र! गणिराज! निवाजय, मामनिशं निर्व्याज।।
प्राप्तानन्दोऽहं

29. जय! जयताज्जय जगतामीश्वर! त्वं साक्षाज्जिनमूर्तिः।
तव गुणगाने भवति विचित्रा, मामकवदन–स्फूर्तिः।।
प्राप्तानन्दोऽहं

30. जय–पट्टासीनं गुणपीनं, शिवशर्मैकनिदानम्।
श्रीमघवानं ध्यायन् विध्यति, प्राणी कलुषवितानम्।।
प्राप्तानन्दोऽहं

31. यस्य समक्षेऽयान्मणिरूपं, माणिक्यं ह्युपलाभाम्।
यश्च मघवपदधारी तनुते, सुकृतैषी तच्छ्लाघाम्।।
प्राप्तानन्दोऽहं

32. दूरस्थोऽपि यको मुनिसंघे, सूरिपदे ह्यभिषिक्तः।
तद्डालिम–गुण–कुसुम–षडंघ्रि–रहमस्मीति विविक्तः।।
प्राप्तानन्दोऽहं

33. कलानिधिः कलिमलापहारी, छद्मच्छिच्छौगेयः।
कालुः परमकृपालुः सततं, श्रेयोऽर्थं संध्येयः।।
प्राप्तानन्दोऽहं

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

34. जीवनविभव! हृदयसदनेश्वर! प्राणप्रिय! सर्वस्व!
श्रीकालुप्रभुवर! निज शिष्यं, प्रोद्धर्तुं प्रयतस्व।।
35. सर्वे कृपापरा मयि सन्तु, स्मृताऽस्मृता जिनवरगुरवः।
भवतां करुणाकांक्षी सुतरा–महमस्मीति विनीतरवः।।
जिनवर! गुरुवर!
36. अशुभानि प्रलयन्त्वखिलानि, त्वत्स्मरणार्जित–सुकृत–भरैः।
वदनासूनोः शिवगमनाशा, सफला द्रुतमशुभान्तकरैः।।
37. सर्वेऽर्हन्तः केवलज्ञानवन्तः, सर्वे सिद्धाः सिद्धि–सौध–प्रसिद्धाः।
धर्माचार्या ये ह्युपाध्यायवर्याः,
सर्वे सन्तो वन्दनीया महान्तः।।

20. आलंबन–सूत्र

1. जो पुव्वरत्तावररत्तकाले, संपिक्खई अप्पगमप्पएणं।
किं मे कडं किं च मे किच्च सेसं? किं सक्कणिज्जं न समायरामि।।
2. किं मे परो पासइ? किं व अप्पा? किं वाहं खलियं न विवज्जयामि।
इच्चेव सम्मं अणुपासमाणो, अणागयं नो पडिबंध कुज्जा।।
3. जत्थेव पासे कइ दुप्पउत्तं, काएण वाया अदु माणसेणं।
तत्थेव धीरो पडिसाहरेज्जा, आइन्नओ खिप्पमिवक्खलीणं।।
4. अणिएयवासो समुयाणचरिया, अन्नायउंछं पइरिक्कया य।
अप्पोवही कलह–विवज्जणा य, विहारचरिया इसिणं पसत्था।।
5. चरे पयाइं परिसंकमाणो, जं किंचि पासं इह मण्णमाणो।
लाभंतरे जीविय बूहइत्ता, पच्छा परिन्नाय मलावधंसी।।
6. छंदं निरोहेण उवेइ मोक्खं, आसे जहा सिक्खियवम्मधारी।
पुव्वाइं वासाइं चरप्पमत्तो, तम्हा मुणी खिप्पमुवेइ मोक्खं।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

7. खिप्पं न सक्केइ विवेगमेउं, तम्हा समुट्ठाय पहाय कामे।
समिच्च लोयं समया महेसी, अप्पाणरक्खी चरमप्पमत्तो।।
8. बहिया उड्ढमादाय, नावकंखे कयाइ वि।
पुव्वकम्मखयट्ठाए, इमं देहं समुद्धरे।।
9. सरीरमाहु नाव त्ति, जीवो वुच्चइ नाविओ।
संसारो अण्णवो वुत्तो, जं तरंति महेसिणो।।
10. उवेहमाणो उ परिव्वएज्जा, पियमप्पियं सव्व तितिक्खएज्जा।
न सव्व सव्वत्थऽभिरोयएज्जा, न यावि पूयं गरहं च संजए।।
11. जम्म दुक्खं जरा दुक्खं, रोगा य मरणाणि य।
अहो दुक्खो हु संसारो, जत्थ कीसंति जंतवो।।
12. न तस्स दुक्खं विभयंति नाइओ, न मित्तवग्गा न सुया न बंधवा।
एक्को सयं पच्चणुहोइ दुक्खं, कत्तारमेवं अणुजाइ कम्मं।।
13. न मे चिरं दुक्खमिणं भविस्सई, असासया भोगपिवास जंतुणो।
न चे सरीरेण इमेणवेस्सई, अविस्सई जीवियपज्जवेण मे।।
14. रागो य दोसो वि य कम्मबीयं, कम्मं च मोहप्पभवं वयंति।
कम्मं च जाईमरणस्स मूलं, दुक्खं च जाईमरणं वयंति।।
15. दुखं हयं जस्स न होइ मोहो, मोहो हओ जस्स न होइ तण्हा।
तण्हा हया जस्स न होइ लोहो, लोहो हओ जस्स न किंचणाइं।।
16. अधुवे असासयम्मि, संसारम्मि दुक्खपउराए।
किं नाम होज्ज तं कम्मयं, जेणाहं दोग्गइं न गच्छेज्जा।।
17. पूयणट्ठी जसोकामी, माणसम्माणकामए।
बहुं पसवई पावं, मायासल्लं च कुव्वई।।
18. जा जा वच्चइ रयणी, न सा पडिनियत्तई।
धम्मं च कुणमाणस्स, सफला जंति राइओ।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

19. सुहसायगस्स समणस्स, सायाउलगस्स निगामसाइस्स।
उच्छोलणापहोइस्स, दुलहा सुग्गइ तारिसगस्स।।
20. तवोगुणपहाणस्स, उज्जुमई खंतिसंजमरयस्स।
परीसहे जिणंतस्स, सुलहा सुग्गइ तारिसगस्स।।
21. सव्वभूयप्पभूयस्स, सम्मं भूयाइ पासओ।
पिहियासवस्स दंतस्स, पावं कम्मं न बंधई।।
22. जरामरणवेगेणं, वुज्झमाणाण पाणिणं।
धम्मो दीवो पइट्ठा य, गई सरणमुत्तमं।।
23. सोही उज्जुयभूयस्स, धम्मो सुद्धस्स चिट्ठई।
निव्वाणं परमं जाइ, घयसित्त व्व पावए।।
24. उवलेवो होइ भोगेसु, अभोगी नोवलिप्पई।
भोगी भमई संसारे, अभोगी विप्पमुच्चई।।
25. जहा किंपागफलाणं, परिणामो न सुंदरो।
एवं भुत्ताण भोगाणं, परिणामो न सुंदरो।।
26. सल्लं कामा विसं कामा, कामा आसीविसोवमा।
कामे पत्थेमाणा, अकामा जंति दोग्गइं।।
27. रसा पगामं न निसेवियव्वा, पायं रसा दित्तिकरा नराणं।
दित्तं च कामा समभिद्दवंति, दुमं जहा साउफलं व पक्खी।।
28. जे य कंते पिए भोए, लद्धे विपिट्ठिकुव्वई।
साहीणे चयइ भोए, से हु चाइ त्ति वुच्चइ।।
29. सुवण्णरुप्पस्स उ पव्वया भवे, सिया हु केलाससमा असंखया।
नरस्स लुद्धस्स न तेहिं किंचि, इच्छा उ आगाससमा अणंतिया।।
30. सक्का सहेउं आसाए कंटया, अओमया उच्छहया नरेणं।
अणासए जो उ सहेज्ज कंटए, वईमए कण्णसरे स पुज्जो।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

31. समावयंता वयणाभिघाया, कण्णंगया दुम्मणियं जणंति।
धम्मो त्ति किच्चा परमग्गसूरे,, जिइंदिए जो सहई स पुज्जो।।
32. हओ न संजले भिक्खू, मणं पि न पओसए।
तितिक्खं परमं नच्चा, भिक्खुधम्मं विचिंतए।।
33. जो सहस्सं सहस्साणं, संगामे दुज्जए जिणे।
एगं जिणेज्ज अप्पाणं, एस से परमो जओ।।
34. न तं अरी कंठछेत्ता करेइ, जं से करे अप्पणिया दुरप्पा।
से नाहिई मच्चुमुहं तु पत्ते, पच्छाणुतावेण दयाविहूणो।।
35. अप्पा कत्ता विकत्ता य, दुहाण य सुहाण य।
अप्पा मित्तममित्तं च, दुप्पट्ठिय सुपट्ठिओ।।
36. एगप्पा अजिए सत्तू, कसाया इंदियाणि य।
ते जिणित्तु जहानायं, विहरामि अहं मुणी।।
37. अप्पाणमेव जुज्झाहि, किं ते जुज्झेण बज्झओ।
अप्पाणमेव अप्पाणं, जइत्ता सुहमेहए।।
38. अप्पा चेव दमेयव्वो, अप्पा हु खलु दुद्दमो।
अप्पा दंतो सुही होइ, अस्सिं लोए परत्थ य।।
39. वरं मे अप्पा दंतो, संजमेण तवेण य।
माहं परेहिं दम्मंतो, बंधणेहि वहेहि य।।
40. एगो मे सासओ अप्पा, नाण–दंसण–संजुओ।
सेसा मे बाहिरा भावा, सव्वे, संजोगलक्खणा।।
41. अप्पा खलु सययं रक्खियव्वो, सव्विंदिएहिं सुसमाहिएहिं।
अरक्खिओ जाइपहं उवेइ, सुरक्खिओ सव्वदुहाण मुच्चई।।
42. खवेंति अप्पाणममोहदंसिणो, तवे रया संजम अज्जवे गुणे।
धुणंति पावाइं पुरेकडाइं, नवाइं पावाइं न ते करेंति।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

43. जस्सेवमप्पा उ हवेज्ज निच्छिओ, चएज्ज देहं न हु धम्मसासणं।
तं तारिसं नो पयलेंति इंदिया, उवेंतवाया व सुदंसंणं गिरिं।।

44. नाणस्स होइ भागी, थिरयरओ दंसणे चरित्ते य।
धन्ना आवकहाए, गुरुकुलवासं न मुंचंति।।

45. जावन्तऽविज्जापुरिसा, सव्वे ते दुक्खसंभवा।
लुप्पंति बहुसो मूढा, संसारंमि अणंतए।।

46. समिक्ख पंडिए तम्हा, पास–जाईपहे बहू।
अप्पणा सच्चमेसेज्जा, मेत्तिं भूएसु कप्पए।।

47. सज्झायसज्झाणरयस्स ताइणो, अपावभावस्स तवे रयस्स।
विसुज्झई जं सि मलं पुरेकडं, समीरियं रुप्पमलं व जोइणा।।

48. नाणस्स सव्वस्स पगासणाए, अन्नाणमोहस्स विवज्जणाए।
रागस्स दोसस्स य संखएणं, एगंतसोक्खं समुवेइ मोक्खं।।

49. नाणेणं दंसणेणं च, चरित्तेण तहेव य।
खंतीए मुत्तीए, वड्ढमाणो भवाहि य।।

50. सुत्तेसु यावी पडिबुद्धजीवी, न वीससे पंडिए आसुपन्ने।
घोरा मुहुत्ता अबलं सरीरं,, भारुंडपक्खी व चरप्पमत्तो।।

51. जागरह णरा णिच्चं, जागरमाणस्स वड्ढते बुद्धी।
जो सुवइ ण सो धन्नो, जो जग्गई सो सया धन्नो।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

21. नीति–शतकम्

–भर्तृहरि

1. यां चिन्तयामि सततं मयि सा विरक्ता,
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः।
अस्मत्कृते च परितुष्यति काचिदन्या,
धिक् तां च तं च मदनं च इमां च मां च।।
2. अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्मापि तं नरं न रंजयति।।
3. प्रसह्य मणिमुद्धरेन् मकरवक्त्रदंष्ट्रांकुरात्,
समुद्रमपि संतरेत् प्रचलदुर्मिमालाकुलम्।
भुजंगमपि कोपितं शिरसि पुष्पवद्धारयेन्
न तु प्रतिनिविष्टमूर्खजन–चित्तमाराधयेत्।।
4. शशी दिवसधूसरो गलितयौवनाकामिनी,
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो,
नृपांगणगतः खलो मनसि सप्त शल्यानि मे।।
5. मणिः शाणोल्लीढ़ः समरविजयी हेति–निहतो,
मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता,
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नराः।।
6. परिक्षीणः कश्चित् स्पृहयति यवानां प्रसृतये,
स पश्चात् तत्पूर्णः कलयति धरित्रीं तृणसमाम्।
अतश्चानैकान्त्याद् गुरुलघुतयाऽर्थेषु धनिना–
मवस्था वस्तूनि प्रथयति च संकोचयति च।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

7. शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमाः,
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः।
तज्जाड्यं वसुधाधिपस्य कवयो ह्यर्थं विनाऽपीश्वराः,
कुत्स्याः स्युः कुपरीक्षका हि मणयो यैरर्घतः पातिताः।।

8. विपदि धैर्यमथाभ्युदये क्षमा, सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ, प्रकृतिसिद्धमिदं हि महात्मनाम्।।

9. निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु,
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा,
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः।।

10. एक एव खगो मानी, चिरं जीवतु चातकः।
पिपासितो वा म्रियते, याचते वा पुरन्दरम्।।

11. नीचा दुःखेन याच्यन्ते, प्रयच्छन्ति न याचिताः।
अथ किंचित् प्रयच्छन्ति न गले न च तालुके।।

12. हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत् सर्वदा–
प्यर्थिभ्यः प्रतिपद्यमानमनिशं प्राप्नोति वृद्धिं पराम्।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं,
येषां तान्प्रति मानमुज्झत नृपाः! कस्तैः सह स्पर्धते।।

13. अधिगतपरमार्थान् पण्डितान् मावमंस्था–
स्तृणमिव लघु लक्ष्मीर्नैव तान् संरुणद्धि।
अभिनवमदलेखाश्यामगंडस्थलानां,
न भवति विसतन्तुर्वारणं वारणानाम्।।

14. क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्राणोऽपि कष्टां दशा–
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि।
मत्तेभेन्द्रविभिन्नकुंभकवल–ग्रासैकबद्धस्पृहः,
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

15. प्रिया न्यायावृत्तिर्मलिनमसुभंगेप्यसुकर–
मसन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः।
विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां,
सतां केनोद्दिष्टं विषममसिधारा व्रतमिदम्।।

16. मनसि वचसि काये, पुण्यपीयूषपूर्णा–
स्त्रिभुवनमुपकार–श्रेणिभिः प्रीणयन्तः।
परगुणपरमाणून् पर्वतीकृत्य नित्यम्,
निज–हृदि विकसन्तः सन्ति सन्तः कियन्तः।।

17. इतः स्वपिति केशवः कुलमितस्तदीयद्विषा–
मितश्च शरणार्थिनः शिखरिपत्रिणः शेरते।
इतश्च वडवानलः सहसमस्तसंवर्तकै–
रहो! विततमूर्जितं भरसहं च सिन्धोर्वपुः।।

18. क्वचित् भूमौ शय्या क्वचिदपि च पर्यंकशयनं,
क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः।
क्वचित् कन्थाधारी क्वचिदपि च दिव्याम्बरधरो,
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्।।

19. ये संतोष–सुखप्रमोदमुदितास्तेषां न भिन्ना मुदो,
ये त्वन्ये धनलोभसंकुलधियस्तेषां न तृष्णा हता।
इत्थं कस्य कृते कृतः सविधिना तादृक् पदं संपदां,
स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते।।

20. नमस्यामो देवान् ननु हतविधेस्तेऽपि वशगाः,
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः।
फलं कर्मायत्तं यदि किममरैः किं च विधिना,
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

21. दौर्मन्त्र्यान् नृपतिर्विनश्यति यतिः संगात् सुतो लालनाद्,
विप्रोऽनध्ययनात् कुलं कुतनयात् शीलं खलोपासनात्।
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रया–
न्मैत्री चाऽप्रणयात् समृद्धिरनयात् त्यागात् प्रमादाद् धनम्।।

22. जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवं,
शूरे निर्घृणता ऋजौ विमतिता दैन्यं प्रियालापिनि।
तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे,
तत्को नाम गुणो भवेत् स गुणिनां यो दुर्जनैर्नांकितः।।

23. जातिर्यातु रसातलं गुणगणस्तस्याप्यधो गच्छतां,
शीलं शैलतटात्पतत्वभिजनः संदह्यतां वह्निना।
शौर्ये वैरिणि वज्रमाशुनिपतत्त्वर्थोऽस्तु नः केवलं,
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे।।

24. भग्नाशस्य करण्डपिण्डिततनोर्म्लानेन्द्रियस्य क्षुधा,
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा,
लोकाः पश्यत दैवमेव हि नृणां वृद्धौ क्षये कारणम्।।

25. पातितोऽपि कराघातैरुत्पतत्येव कन्दुकः।
प्रायेण साधुवृत्तानामस्थायिन्यो विपत्तयः।।

26. प्रायः कन्दुकपातेनोत्पतत्यार्यः पतन्नपि।
तथा त्वनार्यः पतति, मृत्पिंडपतनं यथा।।

27. प्रीणाति यः सुचरितैः पितरं स पुत्रो,
यद् भर्तुरेव हितमिच्छति तत् कलत्रम्।
तन्मित्रमापदि सुखे च समक्रियं य–
देतत्त्रयं जगति पुण्यकृतो लभन्ते।।

28. दुर्जनः परिहर्तव्यो विद्ययाऽलंकृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयंकरः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

29. क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः,
क्षीरे तापमवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः।
गन्तुं पावकमुन्मनस्तदभवद् दृष्ट्वा तु मित्रापदं,
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी।।

30. या साधूंश्च खलान् करोति विदुषो मूर्खान् हितान् द्वेषिणः,
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात्।
तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वांछितं,
हे साधो! त्वमतो गुणेषु विपुलेष्वास्थां वृथा मा कृथाः।।

31. कृमिकुलचितं लालाक्लिन्नं विगन्धिजुगुप्सितं,
निरुपमरसं प्रीत्या खादन्नरास्थि निरामिषम्।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य विशङ्कते,
न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम्।।

32. स्वल्पस्नायुवसावशेषमलिनं निर्मांसमप्यस्थिकं,
श्वा लब्ध्वा परितोषमेति न तु तत्तस्य क्षुधाशान्तये।
सिंहो जम्बुकमंकमागतमपि त्यक्त्वा निहन्ति द्विपं,
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम्।।

33. पापान्निवारयति योजयते हिताय,
गुह्यानि गूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले,
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।

34. मृगमीनसज्जनानां, तृणजलसन्तोषविहितवृत्तीनाम्।
लुब्धक–धीवर–पिशुना, निष्कारणवैरिणो जगति।।

35. सन्तप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते,
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते।
स्वात्यां सागरशुक्तिसंपुटगतं तत् जायते मौक्तिकं,
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

36. ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे,
विष्णुर्येन दशावतारगहने क्षिप्तो महासंकटे।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः,
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे।।

37. सुतारा विक्रीता स्वजनविरहः पुत्रमरणं,
विनीतायास्त्यागो रिपु–बहुल–देशे च गमनम्।
हरिश्चन्द्रो राजा वहति सलिलं प्रेतसदने,
ह्यवस्था तस्यैषाप्यहह विषमाः कर्मगतयः।।

38. कुसुमस्तबकस्येव, द्वयी वृत्तिर्मनस्विनः।
मूर्ध्नि वा सर्वलोकस्य, शीर्यते वन एव वा।।

39. मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा,
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः।
धृष्टः पार्श्वे वसति च सदा दूरतश्चाऽप्रगल्भः,
सेवाधर्मः परमगहनो योगिनामप्यगम्यः।।

40. नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान् गुणान् ख्यापयन्तः,
स्वार्थान्सम्पादयन्तो विततपृथुतरारम्भयत्नाः परार्थे।
क्षान्त्यैवाक्षेपरूक्षाक्षर–मुखरमुखान् दुर्जनान् दूषयन्तः,
सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्चनीयाः।।

41. लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः,
सत्यं चेत्तपसा च किं शुचिमनो यद्यस्ति तीर्थेन किम्।
सौजन्यं यदि किं गुणैः सुमहिमा यद्यस्ति किं मण्डनैः,
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना।।

42. अम्भोजिनी वनविहारविलासमेव,
हंसस्य हन्ति नितरां कुपितो विधाता।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां,
वैदग्ध्य–कीर्तिमपहर्तुमसौ समर्थः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

43. खल्वाटो दिवसेश्वरस्य किरणैः सन्तापितो मस्तके,
वाञ्छन् देशमनातपं विधिवशात्तालस्य मूलं गतः।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः,
प्रायो गच्छति यत्र भाग्यरहितः तत्रैव यान्त्यापदः।।

44. नैवाऽऽकृतिः फलति नैव कुलं न शीलं,
विद्या न चापि न च यत्नकृताऽपि सेवा।
भाग्यानि पूर्वतपसा किल संचितानि,
काले फलन्ति पुरुषस्य यथैव वृक्षाः।।

45. ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो,
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः।
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता,
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम्।।

46. कृशोपि सिंहो न समो गजेन्द्रैः सत्त्वं प्रधानं न च मांसराशिः।
अनेकवृन्दानि वने गजानां, सिंहस्य नादेन मदं त्यजन्ति।।

47. एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये,
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये,
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे।।

48. जाड्यं धियो हरति सिञ्चति वाचि सत्यं,
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं,
सत्संगतिः कथय किं न करोति पुंसाम्।।

49. वांछा सज्जनसंगमे परगुणे प्रीतिर्गुरौ नम्रता,
विद्यायां व्यसनं स्वयोषिति रति–र्लोकापवादाद् भयम्।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले,
येष्वेते निवसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

50. विरुद्धस्तथ्यो वा भवतु वितथो वा यदि परं,
प्रसिद्धः सर्वस्मिन् हरति महिमानं जनरवः।
तुलोत्तीर्णस्यापि प्रकटनिहताशेषतमसो,
रवेस्तादृक् तेजो नहि भवति कन्यां गत इति।।

51. आवर्तः संशयानामविनयभवनं पत्तनं साहसानां,
दोषाणां संनिधानं कपटशतगृहक्षेत्रमप्रत्ययानाम्।
स्वर्गद्वारस्य विघ्नं नरकपुरमुखं सर्वमायाकरण्डम्,
स्त्रीयंत्रं केन सृष्टं विषममृतमयं प्राणिलोकस्य पाशः।।

52. दुर्ग्राह्यं हृदयं यथैव वदनं यद्दर्पणान्तर्गतं,
भावः पर्वत–सूक्ष्ममार्ग–विषमः स्त्रीणां न विज्ञायते।
चित्तं पुष्कर–पत्रतोय–तरलं विद्वद्भिराशङ्कितं,
नारी नाम विषांकुरैरिव लता दोषैः समं वर्द्धिता।।

53. तृष्णां छिन्धि भज क्षमां जहि मदं पापे मतिं मा कृथाः,
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान्।
मान्यान्मानय विद्विषोऽप्यनुनय प्रच्छादय स्वान् गुणान्,
कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां लक्षणम्।।

54. गुणवदगुणवद्वा कुर्वता कार्यमादौ परिणतिरवधार्या यत्नतः पण्डितेन।
अतिरभसकृतानां कर्मणामाविपत्तेर्भवति
हृदयदाही शल्यतुल्यो विपाकः।।

55. वने रणे शत्रुजलाग्निमध्ये, महार्णवे पर्वतमस्तके वा।
सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि।।

56. भीमं वनं भवति तस्य पुरं प्रधानं,
सर्वो जनः स्वजनतामुपयाति तस्य।
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा,
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

57. मज्ज्त्वम्भसि यातु मेरुशिखरं शत्रुंजयत्वाहवे,
वाणिज्यं कृषिसेवने च सकला विद्याः कलाः शिक्षताम्।
आकाशं विपुलं प्रयातु खगवत् कृत्वा प्रयत्नं परं,
नाभाव्यं भवतीह कर्म–वशतो भाव्यस्य नाशः कुतः।।

58. वरं पक्षच्छेदः समदमघवन्मुक्तकुलिशं,
प्रहारैरुद्गच्छद् बहलदहनोद्गारगुरुभिः।
तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे,
न चासौ सम्पातः पयसि पयसां पत्युरुचितः।।

59. नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः,
स्वर्गो दुर्गमनुग्रहः किल हरैरैरावतो वारणः।
इत्यैश्वर्यबलान्वितोऽपि बलभिद् भग्नः परैः संगरे,
तद् युक्तं ननु दैवमेव शरणं धिग् धिग् वृथा पौरुषम्।।

60. न निर्मिता केन च दृष्टपूर्वा, न श्रूयते हेममयी कुरंगी।
तथापि तृष्णा रघुनन्दनस्य, विनाशकाले विपरीतबुद्धिः।।

61. कर्मायत्तं फलं पुंसां, बुद्धिः कर्मानुसरिणी।
तथापि सुधिया भाव्यं, सुविचार्यैव कुर्वता।।

62. आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

63. दानं भोगो नाशस्तिस्रो, गतयो भवन्ति वित्तस्य।
यो न ददाति न भुङ्क्ते, तस्य तृतीया गतिर्भवति।।

64. यस्यास्ति वित्तं स नरः कुलीनः, स पंडितः स श्रुतवान् गुणज्ञः।
स एव वक्ता स च दर्शनीयः, सर्वे गुणाः कांचनमाश्रयन्ति।।

65. रत्नैर्महार्हैस्तुतुषुर्न देवा, न भेजिरे भीमविषेण भीतिम्।
सुधां विना न प्रययुर्विरामं, न निश्चितार्थाद् विरमन्ति धीराः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

66. सन्त्यन्येऽपि बृहस्पतिप्रभृतयः सम्भाविताः पञ्चषा–
स्तान् प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते।
द्वावेव ग्रसते दिनेश्वरनिशाप्राणेश्वरौ भास्वरौ।
भ्रातः पर्वणि पश्य दानवपतिः शीर्षावशेषाकृतिः।।

67. श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेन पाणिर्न तु कंकणेन।
विभाति कायः करुणापराणां, परोपकारैर्न तु चन्दनेन।।

68. जयन्ति ते सुकृतिनो, रससिद्धाः कवीश्वराः।
नास्ति येषां यशःकाये, जरामरणजं भयम्।।

69. यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं,
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम्।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः,
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम्।।

70. लांगूल–चालनमधश्चरणावपातं, भूमौ निपत्य वदनोदरदर्शनं च।
श्वा पिण्डदस्य कुरुते गजपुंगवस्तु,
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते।।

71. राजन्! दुधुक्षसि यदि क्षितिधेनुमेतां,
तेनाद्य वत्समिव लोकममुं पुषाण।
तस्मिंश्च सम्यगनिशं परिपोष्यमाणे,
नानाफलैः फलति कल्पलतेव भूमिः।।

72. सत्यानृता च परुषा प्रियवादिनी च,
हिंस्रा दयालुरपि चाऽर्थपरा वदान्या।
नित्यव्यया प्रचुरनित्यधनागमा च,
वारांगनेव नृपनीतिरनेकरूपा।।

73. न कश्चित् चण्डकोपानामात्मीयो नाम भूभुजाम्।
होतारमपि जुह्वानं, स्पृष्टो दहति पावकः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

74. विरमविरमामुष्मान् नूनं दुरध्यवसायतो,
विपदि महतां धैर्यध्वंसं यदीक्षितुमीहसे।
अयि जड़विधे! कल्पाऽपाये व्यपेत निजक्रमाः,
कुल–शिखरिणः क्षुद्रा नैते न वा जलराशयः।।

75. अकरुणत्वमकारणविग्रहः परधने परयोषिति च स्पृहा।
सुजनबन्धुजनेष्वसहिष्णुता, प्रकृतिसिद्धमिदं हि दुरात्मनाम्।।

76. कान्ताकटाक्षविशिखा न लुनन्ति यस्य,
चित्तं न निर्दहति कोपकृशानुतापः।
कर्षन्ति भूरिविषयाश्च न लोभ–पाशै–
र्लोकत्रयं जयति कृत्स्नमिदं स धीरः।।

77. आरम्भगुर्वी क्षयिणी क्रमेण, लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्ध–परार्द्धभिन्ना, छायेव मैत्री खल–सज्जनानाम्।।

78. प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः,
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः।
अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः,
सतां केनोद्दिष्टं विषममसिधारा व्रतमिदम्।।

79. छिन्नोऽपि रोहति तरुः, क्षीणोऽप्युपचीयते पुनश्चन्द्रः।
इति विमृशन्तः सन्तः, सन्तप्यन्ते न विधुरेषु।।

80. भवन्ति नम्रास्तरवः फलोद्गमै–र्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्।।

81. कदर्थितस्यापि हि धैर्यवृत्तेर्न शक्यते धैर्यगुणः प्रमार्ष्टुम्।
अधोमुखस्यापि कृतस्य वह्नेर्नाधः शिखा याति कदाचिदेव।।

82. अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः।
परपरिवादनिवृत्तैः क्वचित्–क्वचिन्मण्डिता वसुधा।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

83. पद्माकरं दिनकरो विकचीकरोति,
चन्द्रो विकाशयति कैरवचक्रवालम्।
नाभ्यर्थितोऽपि जलदः सलिलं ददाति,
सन्तः स्वयं परहितेषु कृताभियोगाः।।

84. एकेनापि हि शूरेण, पादाक्रान्तं महीतलम्।
क्रियते भास्करेणेव स्फारस्फुरित–तेजसा।।

85. वरं शृंगोत्तुंगाद् गुरुशिखरिणः क्वापि विषमे,
पतित्वायं कायः कठिनदृषदन्तर्विदलितः।
वरं न्यस्तो हस्तः फणिपतिमुखे तीक्ष्णदशने,
वरं वह्नौ पातस्तदऽपि न कृतः शीलविलयः।।

86. वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणा–
न्मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरंगायते।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते,
यस्यांगेऽखिललोकवल्लभतमं शीलं समुन्मीलति।।

87. यदचेतनोऽपि पादैः, स्पृष्टः प्रज्वलति सवितुरिनकान्तः।
तत्तेजस्वी पुरुषः, परकृतनिकृतिं कथं सहते।।

88. आज्ञा कीर्तिः पालनं ब्राह्मणानां, दानं भोगो मित्रसंरक्षणं च।
येषामेते षड्गुणा न प्रवृत्ताः कोऽर्थस्तेषां पार्थिवोपाश्रयेण।।

89. व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते,
छेत्तुं वज्रमणीन् शिरीषकुसुमप्रान्तेन सन्नह्यते।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते,
नेतुं वांछति यः सतां पथि खलान् सूक्तैः सुधास्यन्दिभिः।।

90. स्वायत्तमेकान्तहितं विधात्रा, विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे, विभूषणं मौनमपण्डितानाम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

91. उद्भासिताऽखिल–खलस्य विशृंखलस्य,
प्राग्जातविस्तृतनिजाधमकर्मवृत्तेः।
दैवादवाप्तविभवस्य गुणद्विषोऽस्य,
नीचस्य गोचरगतैः सुखमास्यते कैः।।

92. विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं,
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।
विद्या बंधुजनो विदेशगमने विद्या परं दैवतं,
विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः।।

93. दाक्षिण्यं स्वजने दया परजने शाठ्यं सदा दुर्जने,
प्रीतिः साधुजने नयो नृपजने विद्वज्जनेष्वार्जवम्।
शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता,
ये चैवं पुरुषाः कलासु कुशलास्तेष्वैव लोकस्थितिः।।

94. करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणमनं,
मुखे सत्या वाणी विजयि भुजयो–र्वीर्यमतुलम्।
हृदि स्वच्छावृत्तिः श्रुतमधिगतं च श्रवणयो–
र्विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम्।।

95. वहति भुवनश्रेणिं शेषः फणाफलकस्थितां,
कमठपतिना मध्ये पृष्ठं सदा स च धार्यते।
तमपि कुरुते क्रोडाधीनं पयोधिरनादरा–
दहह महतां निःसीमानश्चरित्रविभूतयः।।

96. स जातो येन जातेन, याति वंशः समुन्नतिम्।
परिवर्तिनि संसारे, मृतः को वा न जायते।।

97. लज्जा–गुणौघ–जननीं जननीमिवार्या–
मत्यन्त–शुद्ध–हृदयामनुवर्तमानाम्।
तेजस्विनः सुखमसूनपि संत्यजन्ति,
सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

98. सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः।।

99. किं कूर्मस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येषयत्,
किं वा नास्ति परिश्रमो दिनपते–रास्ते न यो निश्चलः।
किं चांगीकृतमुत्सृजन् जन इव श्लाघ्यो जनो लज्जते,
निर्वाहः प्रतिपन्न–वस्तुनि सतामेतद्धि गोत्रव्रतम्।।

100. दूरादर्थं घटयति नवं दूरतश्चापशब्दं,
त्यक्त्वा भूयो भवति निरतः सत्कथापादनेषु।
मन्दं मन्दं रचयति पदं लोकचित्तानुवृत्त्या,
कामं मंत्री कविरिव सदा स्वेदभारैरमुक्तः।।

101. अद्यापि नोज्झति हरः किल कालकूटं,
कूर्मो बिभर्ति धरणिं निजपृष्ठभागे।
अम्भोनिधि–र्वहति दुस्सहवाडवाग्नि–
मंगीकृतं सुकृतिनः परिपालयन्ति।।

102. दैवेन प्रभुणा सदा जगति यद् यस्य प्रमाणीकृतं,
तत् तस्योपनयेन्मनागपि महान् नैवाश्रयेत् कारणम्।
सर्वाशां परिपूरके जलधरे वर्षत्यपि प्रत्यहं,
सूक्ष्मा एव पतन्ति चातकमुखे द्वित्राः पयोबिन्दवः।।

103. अभिमुखनिहतस्य सतस्तिष्ठतु तावज्जयोऽथ वा स्वर्गः।
उभयबलसाधुवादः श्रवणसुखोऽस्त्येव चात्यर्थम्।।

104. केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः,
न स्नानं न विलेपनं न कुसुमं नाऽलंकृता मूर्धजाः।
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते,
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।।

105. भर्तृहरि–भूमिपतिना रचितमिदं नीति–रीति–विज्ञेन।
ज्ञाते यत्र न मुह्यति धीरो धीरः प्रमाणं स्यात्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

22. षड्दर्शन–समुच्चयः

–आचार्य हरिभद्र

1. सद्दर्शनं जिनं नत्वा वीरं स्याद्वाददेशकम्।
   सर्वदर्शनवाच्योऽर्थः संक्षेपेण निगद्यते।।
2. दर्शनानि षडेवात्र मूलभेदव्यपेक्षया।
   देवतातत्त्वभेदेन ज्ञातव्यानि मनीषिभिः।।
3. बौद्धं नैयायिकं सांख्यं जैनं वैशेषिकं तथा।
   जैमिनीयं च नामानि दर्शनानाममून्यहो।।

बौद्ध दर्शन

4. तत्र बौद्धमते तावद्देवता सुगतः किल।
   चतुर्णामार्यसत्यानां दुःखादीनां प्ररूपकः।।
5. दुःखं संसारिणः स्कन्धास्ते च पंच प्रकीर्तिताः।
   विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च।।
6. समुदेति यतो लोके रागादीनां गणोऽखिलः।
   आत्मात्मीयस्वभावाख्यः समुदायः स सम्मतः।।
7. क्षणिकाः सर्वसंस्कारा इत्येवं वासना तु या।
   स मार्ग इति विज्ञेयो निरोधो मोक्ष उच्यते।।
8. पंचेन्द्रियाणि शब्दाद्या विषयाः पंच मानसम्।
   धर्मायतनमेतानि द्वादशायतनानि च।।
9. प्रमाणे द्वे च विज्ञेये तथा सौगतदर्शने।
   प्रत्यक्षमनुमानं च सम्यग्ज्ञानं द्विधा यतः।।
10. प्रत्यक्षं कल्पनापोढमभ्रान्तं तत्र बुध्यताम्।
    त्रिरूपाल्लिङ्गतो लिङ्गिज्ञानं त्वनुमानसंज्ञितम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

11. रूपाणि पक्षधर्मत्वं सपक्षे विद्यमानता।
विपक्षे नास्तिता हेतोरेवं त्रीणि विभाव्यताम्।।
12. बौद्धराद्धान्तवाच्यस्य संक्षेपोऽयं निवेदितः।
नैयायिकमतस्येत कथ्यमानो निशम्यताम्।।

नैयायिक दर्शन

13. अक्षपादमते देवः सृष्टिसंहारकृच्छिवः।
विभुर्नित्यैकसर्वज्ञो नित्यबुद्धिसमाश्रयः।।
14. तत्त्वानि षोडशामुत्र प्रमाणादीनि तद्यथा।
प्रमाणं च प्रमेयं च संशयश्च प्रयोजनम्।।
15. दृष्टान्तोऽप्यथ सिद्धान्तोऽवयवास्तर्कनिर्णयौ।
वादो जल्पो वितण्डा च हेत्वाभासाश्छलानि च।।
16. जातयो निग्रहस्थानान्येषामेवं प्ररूपणा।
अर्थोपलब्धिहेतुः स्यात् प्रमाणं तच्चतुर्विधम्।।
17. प्रत्यक्षमनुमानं चोपमानं शाब्दिकं तथा।
तत्रेन्द्रियार्थसंपर्कोत्पन्नमव्यभिचारि च।।
18. व्यवसायात्मकं ज्ञानं व्यपदेशविवर्जितम्।
प्रत्यक्षमनुमानं तु तत्पूर्वं त्रिविधं भवेत्।।
19. पूर्ववच्छेषवच्चैव दृष्टं सामान्यतस्तथा।
तत्राद्यं कारणात्कार्यमनुमानमिहोदितम्।।
20. रोलम्बगवलव्यालतमालमलिनत्विषः।
वृष्टिं व्यभिचरन्तीह नैवंप्रायाः पयोमुचः।।
21. कार्यात्कारणानुमानं यच्च तच्छेषवन्मतम्।
तथाविधनदीपूरान्मेघो वृष्टो यथोपरि।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

22. यच्च सामान्यतो दृष्टं तदेवं गतिपूर्विका।
पुंसि देशान्तरप्राप्तिर्यथा सूर्येऽपि सा तथा।।
23. प्रसिद्धवस्तुसाधर्म्यादप्रसिद्धस्य साधनम्।
उपमानं समाख्यातं यथा गौर्गवयस्तथा।।
24. शाब्दमाप्तोपदेशस्तु मानमेवं चतुर्विधम्।
प्रमेयं त्वात्मदेहाद्यं बुद्धीन्द्रियसुखादि च।।
25. किमेतदिति सन्दिग्धप्रत्ययः संशयो मतः।
प्रवर्तते यदर्थित्वात्तत्तु साध्यं प्रयोजनम्।।
26. दृष्टान्तस्तु भवेदेष विवादविषयो न यः।
सिद्धान्तस्तु चतुर्भेदः सर्वतन्त्रादिभेदतः।।
27. प्रतिज्ञाहेतुदृष्टान्तोपनया निगमस्तथा।
अवयवाः पंच तर्कः संदेहोपरमो भवेत्।।
28. यथा काकादिसंपातात् स्थाणुना भाव्यमत्र हि।
ऊर्ध्वं सन्देहतर्काभ्यां प्रत्ययो निर्णयो मतः।।
29. आचार्यशिष्ययोः पक्षप्रतिपक्षपरिग्रहात्।
या कथाऽभ्यासहेतुः स्यादसौ वाद उदाहृतः।।
30. विजिगीषुकथा या तु छलजात्यादिदूषणा।
स जल्पः सा वितण्डा तु या प्रतिपक्षवर्जिता।।
31. हेत्वाभासा असिद्धाद्याश्छलं कूपो नवोदकः।
जातयो दूषणाभासाः पक्षादिर्दूष्यते न यैः।।
32. निग्रहस्थानमाख्यातं परो येन निगृह्यते।
प्रतिज्ञाहानिसंन्यासविरोधादिविभेदतः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

33. नैयायिकमतस्यैष समासः कथितोऽधुना।
सांख्याभिमतभावानामिदानीमयमुच्यते।।

सांख्य दर्शन

34. सांख्या निरीश्वराः केचित्केचिदीश्वरदेवताः।
सर्वेषामपि तेषां स्यात्तत्त्वानां पंचविंशतिः।।
35. सत्त्वं रजस्तमश्चेति ज्ञेयं तावद् गुणत्रयम्।
प्रसादतापदैन्यादिकार्यलिंगं क्रमेण तत्।।
36. एतेषां या समावस्था सा प्रकृतिः किलोच्यते।
प्रधानाव्यक्तशब्दाभ्यां वाच्या नित्यस्वरूपिका।।
37. ततः संजायते बुद्धिर्महानिति यकोच्यते।
अहंकारस्ततोऽपि स्यात्तस्मात्षोडशको गणः।।
38. स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रं च पंचमम्।
पंच बुद्धीन्द्रियाण्यत्र तथा कर्मेन्द्रियाणि च।।
39. पायूपस्थवचः पाणिपादाख्यानि मनस्तथा।
अन्यानि पंचरूपाणि तन्मात्राणीति षोडश।।
40. रूपात्तेजो रसादापो गन्धाद् भूमिः स्वरान्नभः।
स्पर्शाद्वायुस्तथैवं च पंचभ्यो भूतपंचकम्।।
41. एवं चतुर्विंशतितत्त्वरूपं निवेदितं सांख्यमते प्रधानम्।
अन्यस्त्वकर्ताविगुणस्तुभोक्ता तत्त्वंपुमान्नित्यचिदभ्युपेतः।।
42. पंचविंशतितत्त्वानि सांख्यस्यैवं भवन्ति च।
प्रधाननरयोश्चात्र वृत्तिः पंगवन्धयोरिव।।
43. प्रकृतिवियोगो मोक्षः पुरुषस्य बतैतदन्तरज्ञानात्।
मानं त्रितयं चात्र प्रत्यक्षं लैङ्गिकं शाब्दम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

44. एवं सांख्यमतस्यापि समासो गदितोऽधुना।
जैनदर्शनसंक्षेपः कथ्यते सुविचारवान्।।

जैन दर्शन

45. जिनेन्द्रो देवता तत्र रागद्वेषविवर्जितः।
हतमोहमहामल्लः केवलज्ञानदर्शनः।।
46. सुरासुरेन्द्रसंपूज्यः सद्भूतार्थोपदेशकः।
कृत्स्नकर्मक्षयं कृत्वा संप्राप्तः परमं पदम्।।
47. जीवाजीवौ तथा पुण्यं पापमाश्रवसंवरौ।
बन्धो विनिर्जरामोक्षौ नव तत्त्वानि तन्मते।।
48. तत्र ज्ञानादिधर्मेभ्यो भिन्नाभिन्नो विवृत्तिमान्।
शुभाशुभं कर्म कर्ता भोक्ता कर्मफलस्य च।।
49. चैतन्यलक्षणो जीवो यश्चैतद्विपरीतवान्।
अजीवः स समाख्यातः पुण्यं सत्कर्मपुद्गलाः।।
50. पापं तद्विपरीतन्तु मिथ्यात्वाद्यास्तु हेतवः।
यो बन्धस्य स विज्ञेय आश्रवो जिनशासने।।
51. संवरस्तन्निरोधस्तु बन्धो जीवस्य कर्मणः।
अन्योन्यानुगमात्मा तु यः सम्बन्धो द्वयोरपि।।
52. बद्धस्य कर्मणः शाटो यस्तु सा निर्जरा मता।
आत्यन्तिको वियोगस्तु देहादेर्मोक्ष उच्यते।।
53. एतानि नव तत्त्वानि यः श्रद्धत्ते स्थिराशयः।
सम्यक्त्वज्ञानयोगेन तस्य चारित्रयोग्यता।।
54. तथा भव्यत्वपाकेन यस्यैतत् त्रितयं भवेत्।
सम्यग्ज्ञानक्रियायोगाज्जायते मोक्षभाजनम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

55. प्रत्यक्षं च परोक्षं च द्वे प्रमाणे तथा मते।
अनन्तधर्मकं वस्तु प्रमाणविषयस्त्विह।।
56. अपरोक्षतयाऽर्थस्य ग्राहकं ज्ञानमीदृशम्।
प्रत्यक्षमितरज् ज्ञेयं परोक्षं ग्रहणेक्षया।।
57. येनोत्पादव्ययध्रौव्ययुक्तं यत् तत् सदिष्यते।
अनन्तधर्मकं वस्तु तेनोक्तं मानगोचरः।।
58. जैनदर्शनसंक्षेप इत्येष कथितोऽनघः।
पूर्वापरपराघातो यत्र क्वापि न विद्यते।।
59. देवताविषये भेदो नास्ति नैयायिकैः समम्।
वैशेषिकाणां तत्त्वे तु विद्यतेऽसौ निदर्श्यते।।

वैशेषिक दर्शन

60. द्रव्यं गुणस्तथा कर्म सामान्यं च चतुर्थकम्।
विशेषसमवायौ च तत्त्वषट्कं हि तन्मते।।
61. तत्र द्रव्यं नवधा भूजलतेजोऽनिलान्तरिक्षाणि।
कालदिगात्ममनांसि च, गुणाः पुनः पंचविंशतिधा।।
62. स्पर्शरसरूपगन्धाः शब्दः संख्या विभागसंयोगौ।
परिमाणं च पृथक्त्वं तथा परत्वापरत्वे च।।
63. बुद्धिः सुखदुःखेच्छा धर्माधर्मौ प्रयत्नसंस्कारौ।
द्वेषः स्नेहगुरुत्वे द्रवत्ववेगौ गुणा एते।।
64. उत्क्षेपावक्षेपावाकुञ्चनकं प्रसारणं गमनम्।
पंचविधं कर्मैतत् परापरे द्वे तु सामान्ये।।
65. तत्र परं सत्ताख्यं द्रव्यत्वाद्यपरमथ विशेषस्तु।
निश्चयतो नित्यद्रव्यवृत्तिरन्त्यो विनिर्दिष्टः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

66. य इहायुतसिद्धानामाधाराधेयभूतभावानाम्।
सम्बन्ध इहप्रत्यहेतुः स हि भवति समवायः।।
67. प्रमाणं च द्विधाऽमीषां प्रत्यक्षं लैङ्गिकं तथा।
वैशेषिकमतस्यैवं संक्षेपः परिकीर्त्तितः।।

जैमिनीय दर्शन

68. जैमिनीयाः पुनः प्राहुः सर्वज्ञादिविशेषणः।
देवो न विद्यते कोऽपि यस्य मानं वचो भवेत्।।
69. तस्मादतीन्द्रियार्थानां साक्षात् द्रष्टुरभावतः।
नित्येभ्यो वेदवाक्येभ्यो यथार्थत्वविनिश्चयः।।
70. अत एव पुरा कार्यो वेदपाठः प्रयत्नतः।
ततो धर्मस्य जिज्ञासा कर्त्तव्या धर्मसाधनी।।
71. नोदनालक्षणो धर्मो, नोदना तु क्रियां प्रति।
प्रवर्त्तकं वचः प्राहुः स्वःकामोऽग्निं यथा यजेत्।।
72. प्रत्यक्षमनुमानं च शाब्दं चोपमया सह।
अर्थापत्तिरभावश्च षट् प्रमाणानि जैमिनेः।।
73. तत्र प्रत्यक्षमक्षाणां संप्रयोगे सतां सति।
आत्मानो बुद्धिजन्मेत्यनुमानं लैंगिकं पुनः।।
74. शाब्दं शाश्वतवेदोत्थमुपमानं प्रकीर्त्तितम्।
प्रसिद्धार्थस्य साधर्म्यादप्रसिद्धस्य साधनम्।।
75. दृष्टार्थानुपपत्त्या तु कस्याप्यर्थस्य कल्पना।
क्रियते यद्बलेनासावर्थापत्तिरुदाहृता।।
76. प्रमाणपंचकं यत्र वस्तुरूपे न जायते।
वस्तुसत्ताऽवबोधार्थः तत्राभावप्रमाणता।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

77. जैमिनीयमतस्यापि संक्षेपोऽयं निवेदितः।
एवमास्तिकवादानां कृतं संक्षेपकीर्त्तनम।।
78. नैयायिकमतादन्ये भेदं वैशेषिकैः सह।
न मन्यन्ते मते तेषां पंचैवास्तिकवादिनः।।
79. षष्ठदर्शनसंख्या तु पूर्यते तन्मते किल।
लोकायतमतक्षेपात् कथ्यते तेन तन्मतम्।।

लोकायत दर्शन

80. लोकायता वदन्त्येवं नास्ति जीवो न निर्वृतिः।
धर्माधर्मौ न विद्येते न फलं पुण्यपापयोः।।
81. एतावानेव लोकोऽयं यावानिन्द्रियगोचरः।
भद्रे! वृकपदं पश्य यद्वदन्त्यबहुश्रुताः।।
82. पिब खाद च चारुलोचने! यदतीतं वरगात्रि! तन्न ते।
न हि भीरु! गतं निवर्तते समुदयमात्रमिदं कलेवरम्।।
83. पृथ्वी जलं तथा तेजो वायुर्भूतचतुष्टयम्।
चैतन्यभूमिरेतेषां मानं त्वक्षजमेव हि।।
84. पृथ्व्यादिभूतसंहत्यां तथा देहादिसम्भवः।
मदशक्तिः सुरांगेभ्यो यद्वत्तद्वत् चिदात्मनि।।
85. तस्माद् दृष्टपरित्यागाद् यददृष्टे प्रवर्तनम्।
लोकस्य तद्विमूढत्वं चार्वाकाः प्रतिपेदिरे।।
86. साध्यावृत्तिनिवृत्तिभ्यां या प्रीतिर्जायते जने।
निरर्था सा मते तेषां धर्मः कामात् परो न हि।।
87. लोकायतमतेऽप्येवं संक्षेपोऽयं निवेदितः।
अभिधेयतात्पर्यार्थः पर्यालोच्यः सुबुद्धिभिः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

23 शांत–सुधारस–भावना

–उपाध्याय विनयविजय

1. अनित्य भावना

1. नीरन्ध्रे भवकानने परिगलत्पंचाऽऽश्रवाम्भोधरे,
नानाकर्मलतावितानगहने मोहान्धकारोद्धुरे।
भ्रान्तानामिह देहिनां स्थिरकृते कारुण्यपुण्यात्मभि–
स्तीर्थेशैः प्रथिताः सुधारसकिरो रम्या गिरः पान्तु वः।।
2. स्फुरति चेतसि भावनया विना, न विदुषामपि शान्तसुधारसः।
न च सुखं कृशमप्यमुना विना जगति मोहविषादविषाऽऽकुले।।
3. यदि भवभ्रमखेदपराङ्मुखं, यदि च चित्तमनन्तसुखोन्मुखम्।
शृणुत तत्सुधियः! शुभभावनाभृतरसं मम शान्तसुधारसम्।।
4. सुमनसो! मनसि श्रुतपावना, निदधतां द्वयधिका दश भावनाः।
यदिह रोहति मोहतिरोहिताऽद्भुतगतिर्विदिता समतालता।।
5. आर्त्तरौद्रपरिणामपावक–प्लुष्टभावुकविवेकसौष्ठवे।
मानसे विषयलोलुपात्मनां, क्व प्ररोहतितमां शमाऽङ्कुरः।।
6. यस्याशयं श्रुतकृताऽतिशयं विवेक–पीयूषवर्षरमणीयरमं श्रयन्ते।
सद्भावनाः सुरलता न हि तस्य दूरे,
लोकोत्तरप्रशमसौख्यफलप्रसूतिः।।
7. अनित्यताऽशरणते, भवमेकत्वमन्यतां।
अशौचमाश्रवं चाऽऽत्मन्! संवरं परिभावय।।
8. कर्मणो निर्जरां धर्मं, सुकृतां लोकपद्धतिम्।
बोधिदुर्लभतामेताः, भावयन् मुच्यसे भवात्।।युग्मम्।।
9. वपुरवपुरिदं विदभ्रलीलापरिचितमप्यतिभङ्गुरं नराणाम्।
तदतिभिदुरयौवनाऽविनीतं, भवति कथं विदुषां महोदयाय?।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

10. आयुर्वायुतरत्तरङ्गतरलं लग्नापदः संपदः,
सर्वेऽपीन्द्रियगोचराश्च चटुलाः संध्याभ्ररागादिवत्
मित्रस्त्रीस्वजनादिसंगमसुखं स्वप्नेन्द्रजालोपमं,
तत्किं वस्तु भवे भवेदिह मुदामालम्बनं यत्सताम्।।1
11. प्रातर्भ्रातरिहावदातरुचयो ये चेतनाऽचेतनाः।
दृष्टा विश्वमनोविनोदविदुरा भावाः स्वतः सुन्दराः।
तांस्तत्रैव दिने विपाकविरसान् हा! नश्यतः पश्यत–
श्चेतः प्रेतहतं जहाति न भवप्रेमानुबन्धं मम।।

1. मूढ! मुह्यसि मुधा मूढ! मुह्यसि मुधा,
विभवमनुचिन्त्य हृदि सपरिवारम्।
कुशशिरसि नीरमिव गलदनिलकम्पितं,
विनय! जानीहि जीवितमसारम्।।
2. पश्य भङ्गुरमिदं विषयसुखसौहृदं, पश्यतामेव नश्यति सहासम्।
एतदनुहरति संसाररूपं रया–
ज्ज्वलज्जलबालिकारुचिविलासम्।।
3. हन्त! हतयौवनं पुच्छमिव शौवनं,
कुटिलमति तदपि लघु दृष्टनष्टम्।
तेन बत! परवशाः परवशाहतधियः,
कटुकमिह किन्न कलयन्ति कष्टम्।।
4. यदपि पिण्याकतामङ्गमिदमुपगतं, भुवनदुर्जयजरापीतसारम्।
तदपि गतलज्जमुज्झति मनो नाङ्गिनां,
वितथमति कुथितमन्मथविकारम्।।
5. सुखमनुत्तरसुराऽवधि यदतिमेदुरं,, कालतस्तदपि कलयति विरामम्।
कतरदितरत्तदा वस्तु सांसारिकं,
स्थिरतरं भवति चिन्तय निकामम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

6. यैः समं क्रीडिता ये च भृशमीडिताः, यैः सहाऽकृष्महि प्रीतिवादम्।
तान् जनान् वीक्ष्य बत! भस्मभूयं गतान्,
निर्विशङ्काः स्म इति धिक् प्रमादम्।।
7. असकृदुन्मिष्य निमिषन्ति सिन्धू–र्मिवच्चेतनाऽचेतनाः सर्वभावाः।
इन्द्रजालोपमाः स्वजनधनसङ्गमा–
रतेषु रज्यन्ति मूढस्वभावाः।।
8. कवलयन्नविरतं जङ्गमाजङ्गमं, जगदहो! नैव तृप्यति कृतान्तः।
मुखगतान् खादतस्तस्य करतलगतै–
र्न कथमुपलप्स्यतेऽस्माभिरन्तः?।।
9. नित्यमेकं चिदानन्दमयमात्मनो, रूपमभिरूप्य सुखमनुभवेयम्।
प्रशमरसनवसुधापानविनयोत्सवो,
भवतु सततं सतामिह भवेऽयम्।।

2. अशरण भावना

1. ये षट्खण्डमहीमहीनतरसा निर्जित्य बभ्राजिरे,
ये च स्वर्गभुजो भुजोर्जितमदा मेदुर्मुदा मेदुराः।
तेऽपि क्रूरकृतान्तवक्त्ररदनैर्निर्दल्यमाना हठा–
दत्राणाः शरणाय हा! दश दिशः प्रैक्षन्त दीनाऽऽननाः।।
2. तावदेव मदविभ्रममाली, तावदेव गुणगौरवशाली।
यावदऽक्षमकृतान्तकटाक्षैर्नेक्षितो विशरणो नरकीटः।।
3. प्रतापैर्व्यापन्नं गलितमथ तेजोभिरुदितै–
र्गतं धैर्योद्योगैः श्लथितमपि पुष्टेन वपुषा।
प्रवृत्तं तद्द्रव्यग्रहणविषये बान्धवजनैः,
जने कीनाशेन प्रसभमुपनीते निजवशम्।।
1. स्वजनजनो बहुधा हितकामं प्रीतिरसैरभिरामं,
मरणदशावशमुपगतवन्तं रक्षति कोऽपि न सन्तम्।
विनय! विधीयतां रे! श्रीजिनधर्मः शरणं,
अनुसंधीयतां रे! शुचितरचरणस्मरणम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

2. तुरगरथेभनराऽऽवृतिकलितं, दधतं बलमरखलितम्।
हरति यमो नरपतिमपि दीनं, मैनिक इव लघु मीनम्।।
3. प्रविशति वज्रमये यदि सदने, तृणमथ घटयति वदने।
तदपि न मुंचति हतसमवर्त्ती, निर्दयपौरुषनर्त्ती।।
4. विद्यामन्त्रमहौषधिसेवां, सृजतु वशीकृतदेवाम्।
रसतु रसायनमुपचयकरणं तदपि न मुंचति मरणम्।।
5. वपुषि चिरं निरुणद्धि समीरं, पतति जलधिपरतीरम्।
शिरसि गिरेरधिरोहति तरसा, तदपि स जीर्यति जरसा।।
6. सृजतीमसितशिरोरुहललितं, मनुजशिरो वलिपलितम्।
को विदधानां भूघनमरसं प्रभवति रोद्धुं जरसम्।।
7. उद्यत उग्ररुजा जनकायः, कः स्यात्तत्र सहायः।
एकोऽनुभवति विधुरुपरागं, विभजति कोऽपि न भागम्।।
8. शरणमेकमनुसर चतुरंगं, परिहर ममतासङ्गम्।
विनय! रचय शिवसौख्यनिधानं, शान्तसुधारसपानम्।।

3. संसार भावना

1. इतो लोभः क्षोभं जनयति दुरंतो दव इवो–
ल्लसल्लाभाम्भोभिः कथमपि न शक्यः शमयितुम्।
इतस्तृष्णाऽक्षाणां तुदति मृगतृष्णेव विफला,
कथं स्वस्थैः स्थेयं विविधभयभीमे भववने?।।
2. गलत्येका चिन्ता भवति पुनरन्या तदधिका,
मनोवाक्कायेहाविकृतिरतिरोषात्तरजसः।
विपद्गर्त्ताऽऽवर्ते झटिति पतयालोः प्रतिपदं,
न जन्तोः संसारे भवति कथमप्यर्तिविरतिः।।
3. सहित्वा सन्तापानशुचिजननीकुक्षिकुहरे,
ततो जन्म प्राप्य प्रचुरतरकष्टक्रमहतः।
सुखाऽऽभासैर्यावत् स्पृशति कथमप्यर्तिविरतिं,
जरा तावत् कायं कवलयति मृत्योः सहचरी।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

4. विभ्रान्तचित्तो बत! बम्भ्रमीति, पक्षीव रुद्धस्तनुपंजरेंऽगी।
नुन्नो नियत्याऽतनुकर्मतन्तुसन्दानितः सन्निहितान्तकौतुः।।
5. अनन्तान् पुद्गलावर्त्ताननन्तानन्तरूपभृत्।
अनन्तशो भ्रमत्येव, जीवोऽनादिभवार्णवे।।
1. कलय संसारमतिदारुणं, जन्ममरणादिभयभीत रे!
मोहरिपुणेह सगलग्रहं, प्रतिपदं विपदमुपनीत रे!।।
2. स्वजनतनयादिपरिचयगुणैरिह मुधा बध्यसे मूढ रे!।
प्रतिपदं नवनवैरनुभवैः, परिभवैरसकृदुपगूढ रे।।
3. घटयसि क्वचन मदमुन्नतेः क्वचिदहो! हीनतादीन रे!।
प्रतिभवं रूपमपरापरं, वहसि बत! कर्मणाऽधीन रे!।।
4. जातु शैशवदशापरवशो, जातु तारुण्यमदमत्त रे!।
जातु दुर्जयजराजर्जरो, जातु पितृपतिकराऽऽयत्त रे!।।
5. व्रजति तनयोऽपि ननु जनकतां, तनयतां व्रजति पुनरेष रे!।
भावयन् विकृतिमिति भवगतेस्त्यजतमां नृभवशुभशेष रे!।।
6. यत्र दुःखार्तिगददवलवैरनुदिनं दह्यसे जीव रे!।
हन्त! तत्रैव रज्यसि चिरं, मोहमदिरामदक्षीव रे!।।
7. दर्शयन् किमपि सुखवैभवं, संहरंस्तदथ सहसैव रे!
विप्रलम्भयति शिशुमिव जनं, कालबटुकोऽयमत्रैव रे!।।
8. सकलसंसारभयभेदकं जिनवचो मनसि निदधान रे!
विनय! परिणमय निःश्रेयसं, विहितशमरससुधापान रे!।।

4. एकत्व भावना

1. एक एव भगवानयमात्मा, ज्ञानदर्शनतरंगसरंगः।
सर्वमन्यदुपकल्पितमेतद्, व्याकुलीकरणमेव ममत्वम्।।
2. अबुधैः परभावलालसा–लसदऽज्ञानदशावशात्मभिः।
परवस्तुषु हा! स्वकीयता, विषयाऽऽवेशवशाद् विकल्प्यते।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

3. कृतिनां दयितेति चिन्तनं, परदारेषु यथा विपत्तये।
विविधार्तिभयावहं तथा, परभावेषु ममत्वभावनम्।।
4. अधुना परभावसंवृतिं, हर चेतःपरितोऽवगुण्ठिताम्।
क्षणमात्मविचारचन्दन–द्रुमवातोर्मिरसाः स्पृशन्तु माम्।।
5. एकतां समतोपेतामेनामात्मन्! विभावय।
लभस्व परमानन्दसंपदं नमिराजवत्।।
1. विनय! चिन्तय वस्तुतत्त्वं, जगति निजमिह कस्य किम्।
भवति मतिरिति यस्य हृदये, दुरितमुदयति तस्य किम्।।
2. एक उत्पद्यते तनुमानेक एव विपद्यते।
एक एव हि कर्म चिनुते, सैककः फलमश्नुते।।
3. यस्य यावान् परपरिग्रह–विविधममतावीवधः।
जलधिविनिहितपोतयुक्त्या, पतति तावदसावधः।।
4. स्वस्वभावं मद्यमदितो, भुवि विलुप्य विचेष्टते।
दृश्यतां परभावघटनात् पतति लुठति विजृम्भते।।
5. पश्य कांचनमितरपुद्गलमिलितमंचति कां दशाम्।
केवलस्य तु तस्य रूपं, विदितमेव भवादृशाम्।।
6. एवमात्मनि कर्मवशतो, भवति रूपमनेकधा।
कर्ममलरहिते तु भगवति, भासते कांचनविधा।।
7. ज्ञानदर्शनचरणपर्यवपरिवृतः परमेश्वरः।
एक एवानुभवसदने, स रमतामविनश्वरः।।
8. रुचिरसमताऽमृतरसं क्षणमुदितमास्वादय मुदा।
विनय! विषयातीतसुखरसरतिरुदंचतु ते सदा।।

5. अन्यत्व भावना

1. परः प्रविष्टः कुरुते विनाशं, लोकोक्तिरेषा न मृषेति मन्ये।
निर्विश्य कर्माणुभिरस्य किं किं, ज्ञानात्मनो नो समपादि कष्टम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

2. खिद्यसे ननु किमन्यकथार्त्तः, सर्वदैव ममतापरतन्त्रः।
चिन्तयस्यनुपमान् कथमात्मन्! आत्मनो गुणमणीन्न कदापि।।
3. यस्मै त्वं यतसे विभेषि च यतो यत्राऽनिशं मोदसे,
यद्यच्छोचसि यद्यदिच्छसि हृदा यत्प्राप्य पेप्रीयसे।
स्निग्धो येषु निजस्वभावममलं निर्लोठ्य लालप्यसे,
तत्सर्वं परकीयमेव भगवन्नात्मन्! न किंचित्तव।।
4. दुष्टाःकष्टकदर्थनाः कति न ताः सोढास्त्वया संसृतौ,
तिर्यग्नारकयोनिषु प्रतिहतश्छिन्नो विभिन्नो मुहुः।
सर्वं तत्परकीयदुर्विलसितं विस्मृत्य तेष्वेव हा!
रज्यन् मुह्यसि मूढ! तानुपचरन्नात्मन्! न किं लज्जसे?।।
5. ज्ञानदर्शनचारित्रकेतनां चेतनां विना।
सर्वमन्यद् विनिश्चित्य, यतस्व स्वहिताऽऽप्तये।।
1. विनय! निभालय निजभवनं, तनुधनसुतसदनस्वजनादिषु।
किं निजमिह कुगतेरवनम्।।
2. येन सहाश्रयसेऽतिविमोहादिदमहमित्यविभेदम्।
तदपि शरीरं नियतमधीरं, त्यजति भवन्तं धृतखेदम्।।
3. जन्मनि जन्मनि विविधपरिग्रहमुपचिनुषे च कुटुम्बम्।
तेषु भवन्तं परभवगमने, नानुसरति कृशमपि शुम्बम्।।
4. त्यज ममतां परितापनिदानं, परपरिचयपरिणामम्।
भज निस्संगतया विशदीकृतमनुभवसुखरसमभिरामम्।।
5. पथि पथि विविधपथैः पथिकैः सह, कुरुते कः प्रतिबन्धम्।
निजनिजकर्मवशैः स्वजनैः सह, किं कुरुषे ममताबन्धम्।।
6. प्रणयविहीने दधदभिषंगं, सहते बहुसंतापम्।
त्वयि निष्प्रणये पुद्गलनिचये, वहसि मुधा ममतातापम्।।
7. त्यज संयोगं नियतवियोगं, कुरु निर्मलमवधानम्।
नहि विदधानः कथमपि तृप्यसि, मृगतृष्णाघनरसपानम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

8. भज जिनपतिमसहायसहायं, शिवगतिसुगमोपायम्।
पिब गदशमनं परिहृतवमनं, शान्तसुधारसमनपायम्।।

6. अशौच भावना

1. सच्छिद्रो मदिराघटः परिगलत्तल्लेशसंगाऽशुचिः,
शुच्याऽऽमृद्य मृदा बहिः स बहुशो धौतोऽपि गंगोदकैः।
नाधत्ते शुचितां यथा तनुभृतां कायो निकायो महान्,
बीभत्साऽस्थिपुरीषमूत्ररजसां नाऽयं तथा शुद्ध्यति।।
2. स्नायं स्नायं पुनरपि पुनः स्नान्ति शुद्धाभिरद्भि–
र्वारं वारं बत! मलतनुं चन्दनैरर्चयन्ते।
मूढात्मानो वयमपमलाः प्रीतिमित्याश्रयन्ते,
नो शुद्ध्यन्ते कथमवकरः शक्यते शोद्धुमेवम्?।।
3. कर्पूरादिभिरर्चितोऽपि लशुनो नो गाहते सौरभं,
नाजन्मोपकृतोऽपि हन्त! पिशुनः सौजन्यमालम्बते।
देहोप्येष तथा जहाति न नृणां स्वाभाविकीं विस्रतां,
नाभ्यक्तोऽपि विभूषितोऽपि बहुधा पुष्टोऽपि विश्वस्यते।।
4. यदीयसंसर्गमवाप्य सद्यो, भवेच्छुचीनामशुचित्वमुच्चैः।
अमेध्ययोनेर्वपुषोऽस्य शौचसंकल्पमोहोऽयमहो! महीयान्।।
5. इत्यवेत्य शुचिवादमतथ्यं, पथ्यमेव जगदेकपवित्रम्।
शोधनं सकलदोषमलानां, धर्ममेव हृदये निदधीथाः।।

1. भावय रे! वपुरिदमतिमलिनं, विनय! विबोधय मानसनलिनम्।
पावनमनुचिन्तय विभुमेकं, परममहोमयमुदितविवेकम्।।
2. दम्पतिरेतोरुधिरविवर्त्ते, किं शुभमिह मलकश्मलगर्त्ते।
भृशमपि पिहितं स्रवति विरूपं, को बहु मनुतेऽवरकरकूपम्।।
3. भजति सचन्द्रं शुचिताम्बूलं, कर्तुं मुखमारुतमनुकूलम्।
तिष्ठति सुरभि कियन्तं कालं, मुखमसुगन्धि जुगुप्सितलालम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

4. असुरभिगन्धवहोऽन्तरचारी, आवरितुं शक्यो न विकारी।
वपुरुपजिघ्रसि वारं वारं, हसति बुधस्तव शौचाचारम्।।
5. द्वादशनवरन्ध्राणि निकामं, गलदशुचीनि न यान्ति विरामम्।
यत्र वपुषि तत्कलयसि पूतं, मन्ये तव नूतनमाकूतम्।।
6. अशितमुपस्करसंस्कृतमन्नं, जगति जुगुप्सां जनयति हन्नम्।
पुंसवनं धैनवमपि लीढं, भवति विगर्हितमति जनमीढम्।।
7. केवलमलमयपुद्गलनिचये, अशुचीकृतशुचिभोजनसिचये।
वपुषि विचिन्तय परमिह सारं, शिवसाधनसामर्थ्यमुदारम्।।
8. येन विराजितमिदमतिपुण्यं, तच्चिन्तय चेतननैपुण्यम्।
विशदागममधिगम्य निपानं, विरचय शान्तसुधारसपानम्।।

7. आश्रव भावना

1. यथा सर्वतो निर्झरैरापतद्भिः, प्रपूर्येत सद्यः पयोभिस्तटाकः।
तथैवाश्रवैः कर्मभिः संभृतोऽङ्गी,
भवेद् व्याकुलश्चंचलः पङ्किलश्च।।
2. यावत्किंचिदिवानुभूय तरसा कर्मेह निर्जीर्यते,
तावच्चाश्रवशत्रवोऽनुसमयं, सिंचन्ति भूयोऽपि तत्।
हा! कष्टं कथमाश्रवप्रतिभटाः शक्या निरोद्धुं मया?
संसारादतिदारुणान्मम हहा! मुक्तिः कथं भाविनी?।।
3. मिथ्यात्वाऽविरतिकषाय–योगसंज्ञा–
श्चत्वारः सुकृतिभिराश्रवाः प्रदिष्टाः।
कर्माणि प्रतिसमयं स्फुटैरमीभि–
र्बध्नन्तो भ्रमवशतो भ्रमन्ति जीवाः।।
4. इन्द्रियाऽव्रतकषाययोगजाः पंचपंचचतुरन्वितास्त्रयः।
पंचविंशतिरसत्क्रिया इति, नेत्रवेदपरिसंख्ययाप्यमी।।
5. इत्याश्रवाणामधिगम्य तत्त्वं, निश्चित्य सत्त्वं श्रुतिसन्निधानात्।
एषां निरोधे विगलद्विरोधे, सर्वात्मना द्राग्यतितव्यमात्मन्!।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

1. परिहरणीया रे! सुकृतिभिराश्रवा, ह्रदि समतामवधाय।
प्रभवन्त्येते रे! भृशमुच्छृङ्खला, विभुगुणविभववधाय।।
2. कुगुरुनियुक्ता रे! कुमतिपरिप्लुता, शिवपुरपथमपहाय।
प्रयतन्तेऽमी रे! क्रियया दुष्टया, प्रत्युत शिवविरहाय।।
3. अविरतचित्ता रे! विषयवशीकृता, विषहन्ते विततानि।
इह परलोके रे! कर्मविपाकजान्यविरलदुःखशतानि।।
4. करिझषमधुपा रे! शलभमृगादयो, विषयविनोदरसेन।
हन्त! लभन्ते रे! विविधा वेदना, बत! परिणतिविरसेन।।
5. उदितकषाया रे! विषयवशीकृता, यान्ति महानरकेषु।
परिवर्तन्ते रे! नियतमनन्तशो, जन्मजरामरकेषु।।
6. मनसा वाचा रे! वपुषा चंचला, दुर्जयदुरितभरेण।
उपलिप्यन्ते रे! तत आश्रवजये, यततां कृतमपरेण।।
7. शुद्धा योगा रे! यदपि यतात्मनां, स्रवन्ते शुभकर्माणि।
कांचननिगडांस्तान्यपि जानीयाद्, हतनिर्वृतिशर्माणि।।
8. मोदस्वैवं रे! साश्रवपाप्मनां, रोधे धियमाधाय।
शान्तसुधारसपानमनारतं, विनय! विधाय विधाय।।

8. संवर भावना

1. येन येन य इहाश्रवरोधः, संभवेन्नियतमौपयिकेन।
आद्रियस्व विनयोद्यतचेतास्तत्तदान्तरदृशा परिभाव्य।।
2. संयमेन विषयाऽविरतत्वं, दर्शनेन वितथाऽभिनिवेशम्।
ध्यानमार्तमथ रौद्रमजस्रं, चेतसः स्थिरतया च निरुन्ध्याः।।
3. क्रोधं क्षान्त्या मार्दवेनाभिमानं, हन्या मायामार्जवेनोज्ज्वलेन।
लोभं वारांराशिरौद्रं निरुन्ध्याः सन्तोषेण प्रांशुना सेतुनेव।।
4. गुप्तिभिस्तिसृभिरेवमजय्यान् त्रीन् विजित्य तरसाऽधमयोगान्।
साधु संवरपथे प्रयतेथा, लप्स्यसे हितमनीहितमिद्धम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

5. एवं रुद्धैष्वमलह्रदयैराश्रवेष्वाप्तवाक्य–

श्रद्धाचंचत्सितपटपटुः सुप्रतिष्ठानशाली।
शुद्धैर्योगैर्जवनपवनैः प्रेरितो जीवपोतः,
स्रोतस्तीर्त्वा भवजलनिधेर्याति निर्वाणपुर्य्याम्।।

1. शृणु शिवसुखसाधनसदुपायं, सदुपायं रे! सदुपायम्।
ज्ञानादिकपावनरत्नत्रय–परमाराधनमनपायम् ।।
2. विषयविकारमपाकुरु दूरं, क्रोधं मानं सहमायम्।
लोभरिपुं च विजित्य सहेलं, भज संयमगुणमकषायम्।।
3. उपशमरसमनुशीलय मनसा, रोषदहनजलदप्रायम्।
कलय विरागं धृतपरभागं, ह्रदि विनयं नायं नायम्।।
4. आर्त्तं रौद्रं ध्यानं मार्जय, दह विकल्परचनानायम्।
यदियमरुद्धा मानसवीथी, तत्त्वविदः पन्था नाऽयम्।।
5. संयमयोगैरवहितमानसशुद्ध्या चरितार्थय कायम्।
नानामतरुचिगहने भुवने, निश्चिनु शुद्धपथं नायम्।।
6. ब्रह्मव्रतमङ्गीकुरु विमलं बिभ्राणं गुणसमवायम्।
उदितं गुरुवदनादुपदेशं, संगृहाण शुचिमिव रायम्।।
7. संयमवाङ्गमयकुसुमरसैरति सुरभय निजमध्यवसायम्।
चेतनमुपलक्षय कृतलक्षणज्ञानचरणगुणपर्यायम्।।
8. वदनमलंकुरु पावनरसनं, जिनचरितं गायं गायम्।
सविनयशान्तसुधारसमेनं, चिरं नन्द पायं पायम्।।

9. निर्जरा भावना

1. यन्निर्जरा द्वादशधा निरुक्ता, तद् द्वादशानां तपसां विभेदात्।
हेतुप्रभेदादिह कार्यभेदः, स्वातन्त्र्यतस्त्वेकविधैव सा स्यात्।।
2. काष्ठोपलादिरूपाणां, निदानानां विभेदतः।
वह्निर्यथैकरूपोऽपि पृथग्रूपो विवक्ष्यते।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

3. निर्जराऽपि द्वादशधा, तपोभेदैरतथोदिता।
कर्मनिर्जरणात्मा तु, सैकरूपैव वस्तुतः।।
4. निकाचितानामपि कर्मणां यद्, गरीयसां भूधरदुर्द्धराणाम्।
विभेदने वज्रमिवातितीव्रं, नमोस्तु तस्मै तपसेऽद्भुताय।।
5. किमुच्यते सत्तपसः प्रभावः, कठोरकर्मार्जितकिल्विषोऽपि।
दृढप्रहारीव निहत्य पापं, यतोऽपवर्गं लभतेऽचिरेण।।
6. यथा सुवर्णस्य शुचि स्वरूपं, दीप्तः कृशानुः प्रकटीकरोति।
तथात्मनः कर्मरजो निहत्य, ज्योतिस्तपस्तद् विशदीकरोति।।
7. बाह्येनाभ्यन्तरेण प्रथितबहुभिदा जीयते येन शत्रु–
श्रेणी बाह्यान्तरंगा भरतनृपतिवद् भावलब्धद्रढिम्ना।
यस्मात् प्रादुर्भवेयुः प्रकटितविभवा लब्धयः सिद्धयश्च,
वन्दे स्वर्गाऽपवर्गाऽर्पणपटु सततं तत्तपो विश्ववन्द्यम्।।
1. विभावय विनय! तपोमहिमानं,
बहुभवसंचितदुष्कृतममुना, लभते लघु लघिमानम्।।
2. याति घनाऽपि घनाघनपटली, खरपवनेन विरामम्।
भजति तथा तपसा दुरिताली, क्षणभङ्गुरपरिणामम्।।
3. वांछितमाकर्षति दूरादपि, रिपुमपि सृजति वयस्यम्।
तप इदमाश्रय निर्मलभावादागमपरमरहस्यम्।।
4. अनशनमूनोदरतां वृत्तिह्रासं रसपरिहारम्।
भज सांलीन्यं कायक्लेशं, तप इति बाह्यमुदारम्।।
5. प्रायश्चित्तं वैयावृत्यं, स्वाध्यायं विनयं च।
कायोत्सर्गं शुद्धं ध्यानमाभ्यन्तरमिदमंच।।
6. शमयति तापं गमयति पापं, रमयति मानसहंसम्।
हरति विमोहं दूरारोहं, तप इति विगताशंसम्।।
7. संयमकमलाकार्मणमुज्ज्वलशिवसुखसत्यंकारम्।
चिन्तितचिन्तामणिमाराधय, तप इह वारं वारम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

8. कर्मगदौषधमिदमिदमरय च, जिनपतिमतमनुपानम्।
विनय! समाचर सौख्यनिधानं, शान्तसुधारसपानम्।।

10. धर्म भावना

1. दानं च शीलं च तपश्च भावो, धर्मश्चतुर्धा जिनबान्धवेन।
निरूपितो यो जगतां हिताय, स मानसे मे रमतामजस्रम्।।
2. सत्यक्षमामार्दवशौचसंगत्यागार्जवब्रह्मविमुक्तियुक्तः।
यः संयमोऽकिंचनतोपगूढश्चारित्रधर्मो दशधाऽयमुक्तः।।
3. यस्य प्रभावादिह पुष्पवन्तौ, विश्वोपकाराय सदोदयेते।
ग्रीष्मोष्मभीष्मामुदितस्तडित्वान्, काले समाश्वासयति क्षितिं च।।
4. उल्लोलकल्लोलकलाविलासैर्नाप्लावयत्यम्बुनिधिः क्षितिं यत्।
न घ्नन्ति यद्व्याघ्रमरुद्दवाद्याः धर्मस्य सर्वोऽप्यनुभाव एषः।।
5. यस्मिन्नेव पिताऽहिताय यतते भ्राता च माता सुतः,
सैन्यं दैन्यमुपैति चापचपलं यत्राऽफलं दौर्बलम्।
तस्मिन् कष्टदशाविपाकसमये धर्मस्तु संवर्मितः,
सज्जः सज्जन एष सर्वजगतस्त्राणाय बद्धोद्यमः।।
6. त्रैलोक्यं सचराचरं विजयते यस्य प्रसादादिदं,
योऽत्राऽमुत्र हितावहस्तनुभृतां सर्वार्थसिद्धिप्रदः।
येनाऽनर्थकदर्थना निजमहःसामर्थ्यतो व्यर्थिता,
तस्मै कारुणिकाय धर्मविभवे भक्तिप्रणामोऽस्तु मे।।
7. प्राज्यं राज्यं सुभगदयिता नन्दना नन्दनानां,
रम्यं रूपं सरसकविताचातुरी सुस्वरत्वम्।
नीरोगत्वं गुणपरिचयः सज्जनत्वं सुबुद्धिः,
किन्नु ब्रूमः फलपरिणतिं धर्मकल्पद्रुमस्य।।
1. पालय पालय रे! पालय मां जिनधर्म!
मंगलकमलाकेलिनिकेतन! करुणाकेतन! धीर!

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

शिवसुखसाधन! भवभयबाधन! जगदाधार! गभीर!।।

2. सिंचति पयसा जलधरपटली, भूतलममृतमयेन।
सूर्याचन्द्रमसावुदयेते, तव महिमातिशयेन।।

3. निरालम्बमियमसदाधारा, तिष्ठति वसुधा येन।
तं विश्वस्थितिमूलस्तम्भं, संसेवे विनयेन।।

4. दानशीलशुभभावतपोमुख–चरितार्थीकृतलोकः।
शरणस्मरणकृतामिह भविनां, दूरीकृतभयशोकः।।

5. क्षमासत्यसन्तोषदयादिक–सुभगसकलपरिवारः।
देवासुरनरपूजितशासन–कृतबहुभवपरिहारः ।।

6. बन्धुरबन्धुजनस्य दिवानिशमसहायस्य सहायः।
भ्राम्यति भीमे भवगहनेऽङ्गी, त्वां बांधवमपहाय।।

7. द्रंगति गहनं जलति कृशानुः, स्थलति जलधिरचिरेण।
तव कृपयाऽखिलकामितसिद्धिर्बहुना किन्नु परेण।।

8. इह यच्छसि सुखमुदितदशाङ्गं, प्रेत्येन्द्रादिपदानि।
क्रमतो ज्ञानादीनि च वितरसि, निःश्रेयससुखदानि।।

9. सर्वतंत्रनवनीत! सनातन! सिद्धिसदनसोपान!
जय जय विनयवतां प्रतिलम्भितशान्तसुधारसपान!।।

11. लोक भावना

1. सप्ताऽधोऽधो विस्तृता याः पृथिव्यश्छत्राकाराः सन्ति रत्नप्रभाद्याः।
ताभिः पूर्णो योऽस्त्यधोलोक एतौ,
पादौ यस्य व्यायतौ सप्तरज्जूः।।

2. तिर्यग्लोको विस्तृतो रज्जुमेकां, पूर्णो द्वीपैरर्णवान्तैरसंख्यैः।
यस्य ज्योतिश्चक्रकांचीकलापं,
मध्ये कार्श्यं श्रीविचित्रं कटित्रम्।।

3. लोकेऽथोर्ध्वे ब्रह्मलोके द्युलोके, यस्य व्याप्तौ कूर्परौ पंचरज्जूः।
लोकस्यान्तो विस्तृतो रज्जुमेकां,
सिद्धज्योतिश्चित्रको यस्य मौलिः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

4. यो वैशाखस्थानकस्थायिपादः, श्रोणीदेशे न्यस्तहस्तद्वयश्च।
कालेऽनादौ शश्वदूर्ध्वंदमत्वाद्, बिभ्राणोऽपि श्रान्तमुद्रामखिन्नः।।
5. सोऽयं ज्ञेयः पूरुषो लोकनामा, षड्द्रव्यात्माऽकृत्रिमोऽनाद्यनन्तः।
धर्माऽधर्माकाशकालात्मसंज्ञै–र्द्रव्यैः पूर्णः सर्वतः पुद्गलैश्च।।
6. रङ्गस्थानं पुद्गलानां नटानां, नानारूपैर्नृत्यतामात्मनां च।
कालोद्योगस्वस्वभावादिभावैः, कर्मातोद्यैर्नर्त्तितानां नियत्या।।
7. एवं लोको भाव्यमानो विविक्त्या, विज्ञानां स्यान्मानसस्थैर्यहेतुः।
स्थैर्यं प्राप्ते मानसे चात्मनीनां, सुप्राप्यैवाऽध्यात्मसौख्यप्रसूतिः।।
1. विनय! विभावय शाश्वतं, ह्रदि लोकाकाशम्।
सकलचराचरधारणे, परिणमदवकाशम्।।
2. लसदलोकपरिवेष्टितं, गणनाऽतिगमानम्।
पंचभिरपि धर्मादिभिः, सुघटितसीमानम्।।
3. समवघातसमये जिनैः, परिपूरितदेहम्।
असुमदणुकविविधक्रियागुणगौरवगेहम् ।।
4. एकरूपमपि पुद्गलैः, कृतविविधविवर्तम्।
क्वचन शैलशिखरोन्नतं, क्वचिदवनतगर्तम्।।
5. क्वचन तविषमणिमंदिरैरुदितोदितरूपम्।
घोरतिमिरनरकादिभिः, क्वचनाऽतिविरूपम्।।
6. क्वचिदुत्सवमयमुज्ज्वलं, जयमङ्गलनादम्।
क्वचिदमन्दहाहारवं पृथुशोकविषादम्।।
7. बहुपरिचितमनन्तशो, निखिलैरपि सत्त्वैः।
जन्ममरणपरिवर्त्तिभिः, कृतमुक्तममत्वैः।।
8. इह पर्यटनपराङ्मुखाः, प्रणमत भगवन्तम्।
शान्तसुधारसपानतो, धृतविनयमवन्तम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

12. बोधिदुर्लभ भावना

1. यस्माद् विस्मापयितसुमनःस्वर्गसम्पद्विलास–
प्राप्तोल्लासाः पुनरपि जनिः सत्कुले भूरिभोगे।
ब्रह्माद्वैतप्रगुणपदवीप्रापकं निःसपत्नं,
तद्दुष्प्रापं भृशमुरुधियः! सेव्यतां बोधिरत्नम्।।
2. अनादौ निगोदान्धकूपे स्थिताना-मजस्रं जनुर्मृत्युदुःखार्दितानाम्।
परीणामशुद्धिः कुतस्तादृशी स्याद्,
यया हन्त! तस्माद् विनिर्यान्ति जीवाः।।
3. ततो निर्गतानामपि स्थावरत्वं, त्रसत्वं पुनर्दुर्लभं देहभाजाम्।
त्रसत्वेऽपि पंचाक्षपर्याप्तसंज्ञि–स्थिरायुष्यवद् दुर्लभं मानुषत्वम्।।
4. तदेतन्मनुष्यत्वमाप्याऽपि मूढो, महामोहमिथ्यात्वमायोपगूढः।
भ्रमन् दूरमग्नो भवागाधगर्त्ते, पुनः क्व प्रपद्येत तद् बोधिरत्नम्।।
5. विभिन्नाः पंथानः प्रतिपदमनल्पाश्च मतिनः,
कुयुक्तिव्यासंगैर्निजनिजमतोल्लासरसिकाः ।
न देवाः सान्निध्यं विदधति न वा कोऽप्यतिशय–
स्तदेवं कालेस्मिन् य इह दृढ़धर्मा स सुकृती।।
6. यावद्देहमिदं गदैर्न मृदितं नो वा जराजर्जरं,
यावत्त्वक्षकदम्बकं स्वविषयज्ञानावगाहक्षमम्।
यावच्चायुरभङ्गुरं निजहिते तावद् बुधैर्यत्यतां,
कासारे स्फुटिते जले प्रचलिते पालिः कथं बध्यते?।।
7. विविधोपद्रवं देहमायुश्च क्षणभङ्गुरम्।
कामालम्ब्य धृतिं मूढैः स्वश्रेयसि विलम्ब्यते।।

1. बुध्यतां बुध्यतां बोधिरतिदुर्लभा, जलधि–जलपतितसुररत्नयुक्त्या।
सम्यगाराध्यतां स्वहितमिह साध्यतां,
बाध्यतामधरगतिरात्मशक्त्या।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

2. चक्रिभोज्यादिरिव नरभवो दुर्लभो, भ्राम्यतां घोरसंसारकक्षे।
बहुनिगोदादिकायस्थितिर्व्यायते, मोहमिथ्यात्वमुखचौरलक्षे।।
3. लब्ध इह नरभवोऽनार्यदेशेषु यः, स भवति प्रत्युताऽनर्थकारी।
जीवहिंसादिपापाश्रवव्यसनिनां, माघवत्यादिमार्गाऽनुसारी।।
4. आर्यदेशस्पृशामपि सुकुलजन्मनां, दुर्लभा विविदिषा धर्मतत्त्वे।
रतपरिग्रहभयाहारसंज्ञार्तिभिः, हन्त! मग्नं जगद्दुःस्थितत्त्वे।।
5. विविदिषायामपि श्रवणमति दुर्लभं, धर्मशास्त्रस्य गुरुसन्निधाने।
वितथविकथादितत्तद्रसावेशतो, विविध विक्षेप मलिनेऽवधाने।।
6. धर्ममाकर्ण्य संबुध्य तत्रोद्यमं, कुर्वतो वैरिवर्गोऽन्तरङ्गः।
रागरोषश्रमालस्य निद्रादिको, बाधते निहतसुकृतप्रसङ्गः।।
7. चतुरशीतावहो! योनिलक्षेष्वियं, क्व त्वयाकर्णिता धर्मवार्ता।
प्रायशो जगति जनता मिथो विवदते,
ऋद्धि–रस–शात–गुरु–गौरवार्ता।।
8. एवमतिदुर्लभात्प्राप्य दुर्लभतमं, बोधिरत्नं सकलगुणनिधानम्।
कुरु गुरु–प्राज्य–विनय–प्रसादोदितं,
शान्तरससरसपीयूषपानम्।।

13. मैत्री भावना

1. सद्धर्मध्यानसंधान–हेतवः श्रीजिनेश्वरैः।
मैत्रीप्रभृतयः प्रोक्ताश्चतस्रो भावनाः पराः।।
2. मैत्रीप्रमोदकारुण्य–माध्यस्थ्यानि नियोजयेत्।
धर्मध्यानमुपस्कर्तुं, तद्धि तस्य रसायनम्।।
3. मैत्री परेषां हितचिन्तनं यद्, भवेत् प्रमोदो गुणपक्षपातः।
कारुण्यमार्ताऽऽङ्गिरुजां जिहीर्षेत्युपेक्षणं दुष्टधियामुपेक्षा।।
4. सर्वत्र मैत्रीमुपकल्पयात्मन्!, चिन्त्यो जगत्यत्र न कोऽपि शत्रुः।
कियद्दिनस्थायिनि जीविते ऽस्मिन्
किं खिद्यसे वैरिधिया परस्मिन्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

5. सर्वेऽप्यमी बन्धुतयाऽनुभूताः, सहस्रशोऽस्मिन् भवता भवाब्धौ।
जीवास्ततो बन्धव एव सर्वे, न कोऽपि ते शत्रुरिति प्रतीहि।।
6. सर्वे पितृभ्रातृपितृव्यमातृ–पुत्राङ्गजास्त्रीभगिनीस्नुषात्वम्।
जीवाः प्रपन्ना बहुशस्तदेतत्, कुटुम्बमेवेति परो न कश्चित्।।
7. एकेन्द्रियाद्या अपि हन्त! जीवाः पंचेन्द्रियत्वाद्यधिगत्य सम्यक्।
बोधिं समाराध्य कदा लभन्ते, भूयो भवभ्रान्तिभियाविरामम्।।
8. या रागरोषादिरुजो जनानां, शाम्यन्तु वाक्कायमनोद्रुहस्ताः।
सर्वेऽप्युदासीनरसं रसन्तु, सर्वत्र सर्वे सुखिनो भवन्तु।।
1. विनय! विचिन्तय मित्रतां, त्रिजगति जनतासु।
कर्मविचित्रतया गतिं, विविधां गमितासु।।
2. सर्वे ते प्रियबान्धवा, नहि रिपुरिह कोऽपि।
मा कुरु कलिकलुषं मनो, निजसुकृतविलोपि।।
3. यदि कोपं कुरुते परो, निजकर्मवशेन।
अपि भवता किं भूयते हृदि रोषवशेन।।
4. अनुचितमिह कलहं सतां, त्यज समरसमीन!।
भज विवेककलहंसतां, गुणपरिचयपीन!।।
5. शत्रुजनाः सुखिनः समे, मत्सरमपहाय।
सन्तु गन्तुमनसोऽप्यमी, शिवसौख्यगृहाय।।
6. सकृदपि यदि समतालवं, हृदयेन लिहन्ति।
विदितरसास्तत इह रतिं, स्वत एव वहन्ति।।
7. किमुत कुमतमदमूर्च्छिता, दुरितेषु पतन्ति।
जिनवचनानि कथं हहा! न रसादुपयन्ति।।
8. परमात्मनि विमलात्मना, परिणम्य वसन्तु।
विनय! समामृतपानतो जनता विलसन्तु।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

14. प्रमोद भावना

1. धन्यास्ते वीतरागाः क्षपकपथगतिक्षीणकर्मोपरागा–
स्त्रैलोक्ये गन्धनागाः सहजसमुदितज्ञानजाग्रद्विरागाः।
अध्यारुह्यात्मशुद्ध्या सकलशशिकलानिर्मलध्यानधारा–
मारान्मुक्तेः प्रपन्नाः कृतसुकृतशतोपार्जितार्हन्त्यलक्ष्मीम्।।
2. तेषां कर्मक्षयोत्थै–रतनुगुणगणैर्निर्मलात्मस्वभावै–
र्गायं गायं पुनीमः स्तवनपरिणतैरष्टवर्णास्पदानि।
धन्यां मन्ये रसज्ञां जगति भगवतः स्तोत्रवाणीरसज्ञा–
मज्ञां मन्ये तदन्यां वितथजनकथाकार्यमौखर्यमग्नाम्।।
3. निर्ग्रन्थास्तेऽपि धन्या गिरिगहनगुहागह्वरान्तर्निविष्टाः,
धर्मध्यानाऽवधानाः समरससुहिताः पक्षमासोपवासाः।
येऽन्येऽपि ज्ञानवन्तः श्रुतविततधियो दत्तधर्मोपदेशाः,
शान्ता दान्ता जिताक्षा जगति जिनपतेः शासनं भासयन्ति।।
4. दानं शीलं तपो ये विदधति गृहिणो भावनां भावयन्ति,
धर्मं धन्याश्चतुर्धा श्रुतसमुपचितश्रद्धयाराधयन्ति।
साध्व्यःश्राद्ध्यश्च धन्याः श्रुतविशदधिया शीलमुद्भावयन्त्य–
स्तान् सर्वान्मुक्तगर्वाः प्रतिदिनमसकृद् भाग्यभाजः स्तुवन्ति।।
5. मिथ्यादृशामप्युपकारसारं, संतोषसत्यादिगुणप्रसारम्।
वदान्यतावैनयिकप्रकारं, मार्गानुसारीत्यनुमोदयामः।।
6. जिह्वे! प्रह्वीभव त्वं सुकृतिसुचरितोच्चारणे सुप्रसन्ना,
भूयास्तामन्यकीर्त्तिश्रुतिरसिकतया मेऽद्य कर्णौ सुकर्णौ।
वीक्ष्याऽन्यप्रौढलक्ष्मीं द्रुतमुपचिनुतं लोचने! रोचनत्वं,
संसारेऽस्मिन्नसारे फलमिति भवतां जन्मनो मुख्यमेव।।
7. प्रमोदमासाद्य गुणैः परेषां, येषां मतिर्मज्जति साम्यसिन्धौ।
देदीप्यते तेषु मनःप्रसादो, गुणास्तथैते विशदीभवन्ति।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

1. विनय! विभावय गुणपरितोषं, निजसुकृताप्तवरेषु परेषु।
परिहर दूरं मत्सरदोषं, विनय! विभावय गुणपरितोषम्।।
2. दिष्ट्याऽयं वितरति बहुदानं, वरमयमिह लभते बहुमानम्।
किमिति न विमृशसि परपरभागं, यद्विभजसि तत्सुकृतविभागम्।।
3. येषां मन इह विगतविकारं, ये विदधति भुवि जगदुपकारम्।
तेषां वयमुचिताचरितानां, नाम जपामो वारं वारम्।।
4. अहह! तितिक्षागुणमसमानं, पश्यत भगवति मुक्तिनिदानम्।
येन रुषा सह लसदऽभिमानं, झटिति विघटते कर्मवितानम्।।
5. अदधुः केचन शीलमुदारं, गृहिणोऽपि परिहृतपरदारम्।
यश इह संप्रत्यपि शुचि तेषां, विलसति फलिताऽफलसहकारम्।।
6. या वनिता अपि यशसा साकं, कुलयुगलं विदधति सुपताकम्।
तासां सुचरितसंचितराकं, दर्शनमपि कृतसुकृतविपाकम्।।
7. तात्त्विक–सात्त्विक–सुजन–वतंसाः, केचन युक्तिविवेचनहंसाः।
अलमकृषत किल भुवनाभोगं, स्मरणममीषां कृतशुभयोगम्।।
8. इति परगुणपरिभावनसारं, सफलय सततं निजमवतारम्।
कुरु सुविहितगुणनिधिगुणगानं, विरचय शान्तसुधारसपानम्।।

15. कारुण्य भावना

1. प्रथममशनपानप्राप्तिवांछाविहस्ता–
स्तदनु वसनवेश्माऽलङ्कृतिव्यग्रचित्ताः।
परिणयनमपत्याऽवाप्तिमिष्टेन्द्रियाऽर्थान्,
सततमभिलषन्तः स्वस्थतां क्वाऽश्नुवीरन्?।।
2. उपायानां लक्षैः कथमपि समासाद्य विभवं,
भवाऽभ्यासात् तत्र ध्रुवमिति निबध्नाति हृदयम्।
अथाऽकस्मादस्मिन् विकिरति रजः क्रूरहृदयो,
रिपुर्वा रोगो वा भयमुत जरा मृत्युरथवा।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

3. स्पर्धन्ते केऽपि केचिद् दधति हृदि मिथो मत्सरं क्रोधदग्धाः,
युध्यन्ते केऽप्यरुद्धा धनयुवतिपशुक्षेत्रपद्रादिहेतोः।
केचिल्लोभाल्लभन्ते विपदमनुपदं दूरदेशानटन्तः,
किं कुर्मः किं वदामो भृशमरतिशतैर्व्याकुलं विश्वमेतत्।।
4. स्वयं खनन्तः स्वकरेण गर्तां, मध्ये स्वयं तत्र तथा पतन्ति।
यथा ततो निष्क्रमणं तु दूरेऽधोऽधः प्रपाताद् विरमन्ति नैव।।
5. प्रकल्प्य यन्नास्तिकतादिवादमेवं प्रमादं परिशीलयन्तः।
मग्ना निगोदादिषु दोषदग्धाः दुरन्तदुःखानि हहा! सहन्ते।।
6. शृण्वन्ति ये नैव हितोपदेशं, न धर्मलेशं मनसा स्मरन्ति।
रुजः कथंकारमथाऽपनेयास्तेषामुपायस्त्वयमेक एव।।
7. परदुःखप्रतीकारमेवं ध्यायन्ति ये हृदि।
लभन्ते निर्विकारं ते, सुखमायतिसुन्दरम्।।

1. सुजना! भजत मुदा भगवन्तं, सुजना! भजत मुदा भगवन्तम्।
शरणागतजनमिह निष्कारणकरुणावन्तमवन्तं रे!।।
2. क्षणमुपधाय मनः स्थिरतायां, पिबत जिनागमसारम्।
कापथघटनाविकृतविचारं, त्यजत कृतान्तमसारं रे!।।
3. परिहरणीयो गुरुरविवेकी भ्रमयति यो मतिमन्दम्।
सुगुरुवचः सकृदपि परिपीतं, प्रथयति परमानन्दं रे!।।
4. कुमततमोभरमीलितनयनं किमु पृच्छत पन्थानम्।
दधिबुद्ध्या नर! जलमंथन्यां, किमु निदधत मंथानं रे!।।
5. अनिरुद्धं मन एव जनानां, जनयति विविधातङ्कम्।
सपदि सुखानि तदेव विधत्ते, आत्माराममशङ्कं रे!।।
6. परिहरताश्रवविकथागौरव–मदनमनादिवयस्यम्।
क्रियतां सांवरसाप्तपदीनं, ध्रुवमिदमेव रहस्यं रे!।।
7. सह्यत इह किं भवकान्तारे, गदनिकुरंबमपारम्।
अनुसरताहितजगदुपकारं, जिनपतिमगदंकारं रे!।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

8. शृणुतैकं विनयोदितवचनं नियताऽऽयतिहितरचनम्।
रचयत सुकृतसुखशतसंधानं, शान्तसुधारसपानं रे!।।

16. माध्यस्थ्य भावना

1. श्रान्ता यस्मिन् विश्रमं संश्रयन्ते, रुग्णाः प्रीतिं यत्समासाद्य सद्यः।
लभ्यं रागद्वेषविद्वेषिरोधा–दौदासीन्यं सर्वदा तत्प्रियं नः।।
2. लोके लोका भिन्नभिन्नस्वरूपा, भिन्नै–र्भिन्नैः कर्मभिर्मर्मभिद्भिः।
रम्याऽरम्यैश्चेष्टितैः कस्य कस्य, तद्विद्वद्भिः तुष्यते रुष्यते वा।।
3. मिथ्यां शंसन् वीरतीर्थेश्वरेण, रोद्धुं शेके न स्वशिष्यो जमालिः।
अन्यः को वा रोत्स्यते केन पापात्, तस्मादौदासीन्यमेवात्मनीनम्।।
4. अर्हन्तोऽपि प्राज्यशक्तिस्पृशः किं, धर्मोद्योगं कारयेयुः प्रसह्य।
दद्युः शुद्धं किन्तु धर्मोपदेशं, यत्कुर्वाणा दुस्तरं निस्तरन्ति।।
5. तस्मादौदासीन्यपीयूषसारं, वारं वारं हन्त सन्तो लिहन्तु।
आनन्दानामुत्तरङ्गत्तरंगै–र्जीवद्भिर्यद् भुज्यते मुक्तिसौख्यम्।।
1. अनुभव विनय! सदा सुखमनुभव औदासीन्यमुदारं रे!।
कुशलसमागममागमसारं, कामितफलमन्दारं रे!।।
2. परिहर परचिन्तापरिवारं, चिन्तय निजमधिकारं रे!।
तव किं कोऽपि चिनोति करीरं, चिनुतेऽन्यः सहकारं रे।।
3. योऽपि न सहते हितमुपदेशं तदुपरि मा कुरु कोपं रे!
निष्फलया किं परजनतप्त्या, कुरुषे निजसुखलोपं रे!।।
4. सूत्रमपास्य जडा भाषन्ते, केचन मतमुत्सूत्रं रे!
किं कुर्मस्ते परिहृतपयसो, यदि पीयन्ते मूत्रं रे!।।
5. पश्यसि किं न मनःपरिणामं, निजनिजगत्यनुसारं रे!
येन जनेन यथा भवितव्यं, तद् भवता दुर्वारं रे!।।
6. रमय हृदा हृदयंगमसमतां, संवृणु मायाजालं रे!
वृथा वहसि पुद्गलपरवशतामायुः परिमितकालं रे!।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

7. अनुपमतीर्थमिदं स्मर चेतन–मन्तःस्थितमभिरामं रे!
चिरंजीव! विशदपरिणामं, लभसे सुखमविरामं रे!।।
8. परब्रह्मपरिणामनिदानं, स्फुटकेवलविज्ञानं रे!
विरचय विनय! विवेचितगानं, शान्तसुधारसपानं रे!।।

24. सिन्दूरप्रकर

–आचार्य सोमप्रभ

मंगलाचरणम्

1. सिन्दूरप्रकरस्तपः करिशिरःक्रोडे कषायाटवी–
दावार्चिर्निचयः प्रबोधदिवसप्रारम्भसूर्योदयः।
मुक्तिस्त्रीवदनैककुंकुमरसः श्रेयस्तरोः पल्लव–
प्रोल्लासः क्रमयोर्नखद्युतिभरः पार्श्वप्रभोः पातु वः।।

ग्रन्थकर्तुरावेदनम्

2. सन्तः सन्तु मम प्रसन्नमनसो वाचां विचारोद्यताः,
सूतेऽम्भः कमलानि तत्परिमलं वाता वितन्वन्ति यद्।
किंवाऽभ्यर्थनयाऽनया यदि गुणोऽस्त्यासां ततस्ते स्वयं,
कर्त्तारः प्रथनं न चेदथ यशःप्रत्यर्थिना तेन किम्।।

धर्मस्य प्राधान्यम्

3. त्रिवर्गसंसाधनमन्तरेण, पशोरिवायुर्विफलं नरस्य।
तत्रापि धर्मं प्रवरं वदन्ति, न तं विना यद् भवतोऽर्थकामौ।।

मनुष्यजन्मनो दुर्लभता

4. यः प्राप्य दुष्प्रापमिदं नरत्वं, धर्मं न यत्नेन करोति मूढः।
क्लेशप्रबन्धेन स लब्धमब्धौ, चिन्तामणिं पातयति प्रमादात्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

5. स्वर्णस्थाले क्षिपति स रजः पादशौचं विधत्ते,
पीयूषेण प्रवरकरिणं वाहयत्येधभारम्।
चिन्तारत्नं विकिरति कराद्वायसोड्डायनार्थम्
यो दुष्प्रापं गमयति मुधा मर्त्यजन्म प्रमत्तः।।
6. ते धत्तूरतरुं वपन्ति भवने प्रोन्मूल्य कल्पद्रुमं,
चिन्तारत्नमपास्य काचशकलं स्वीकुर्वते ते जडाः।
विक्रीय द्विरदं गिरीन्द्रसदृशं क्रीणन्ति ते रासभं,
ये लब्धं परिहृत्य धर्ममधमा धावन्ति भोगाशया।।
7. अपारे संसारे कथमपि समासाद्य नृभवं,
न धर्मं यः कुर्याद्विषयसुखतृष्णातरलितः।
ब्रुडन् पारावारे प्रवरमपहाय प्रवहणं,
स मुख्यो मूर्खाणामुपलमुपलब्धुं प्रयतते।।

एकविंशतिः प्रकरणानि

8. भक्तिं तीर्थकरे गुरौ जिनमते संघे च हिंसानृत–
स्तेयाब्रह्मपरिग्रहव्युपरमं क्रोधाद्यरीणां जयम्।
सौजन्यं गुणिसंगमिन्द्रियदमं दानं तपोभावनां,
वैराग्यं च कुरुष्व निर्वृतिपदे यद्यस्ति गन्तुं मनः।।

1. जिनपूजनप्रकरणम्

9. पापं लुम्पति दुर्गतिं दलयति व्यापादयत्यापदं,
पुण्यं संचिनुते श्रियं वितनुते पुष्णाति नीरोगताम्।
सौभाग्यं विदधाति पल्लवयति प्रीतिं प्रसूते यशः
स्वर्गं यच्छति निर्वृतिं च रचयत्यर्चार्हतां निर्मिता।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

10. स्वर्गस्तस्य गृहाङ्गणं सहचरी साम्राज्यलक्ष्मीः शुभा,
सौभाग्यादि–गुणावलिर्विलसति स्वैरं वपुर्वेश्मनि।
संसारः सुतरः शिवं करतलक्रोडे लुठत्यंजसा,
यः श्रद्धाभरभाजनं जिनपतेः पूजां विधत्ते जनः।।
11. कदाचिन्नातङ्कः कुपित इव पश्यत्यभिमुखं,
विदूरे दारिद्र्यं चकितमिव नश्यत्यनुदिनम्।
विरक्ता कान्तेव त्यजति कुगतिः सङ्गमुदयो,
न मुंचत्यभ्यर्णं सुहृदिव जिनार्चां रचयतः।।
12. यः पुष्पैर्जिनमर्चति स्मितसुरः स्त्रीलोचनैः सोऽर्च्यते,
यस्तं वन्दत एकशस्त्रिजगता सोऽहर्निशं वन्द्यते।
यस्तं स्तौति परत्र वृत्रदमनस्तोमेन स स्तूयते,
यस्तं ध्यायति क्लृप्तकर्मनिधनः स ध्यायते योगिभिः।।

2. गुरुमहत्त्वप्रकरणम्

13. अवद्यमुक्ते पथि यः प्रवर्तते, प्रवर्तयत्यन्यजनं च निःस्पृहः।
स एव सेव्यः स्वहितैषिणा गुरुः
स्वयं तरंस्तारयितुं क्षमः परम्।।
14. विदलयति कुबोधं बोधयत्यागमार्थं,
सुगतिकुगति मार्गौ पुण्यपापे व्यनक्ति।
अवगमयति कृत्याकृत्यभेदं गुरुर्यो
भवजलनिधिपोतस्तं विना नास्ति कश्चित्।।1
15. पिता माता भ्राता प्रियसहचरी सूनुनिवहः,
सुहृत्स्वामी माद्यत्करिभटरथाश्वः परिकरः।
निमज्जन्तं जन्तुं नरककुहरे रक्षितुमलं,
गुरोर्धर्माधर्मप्रकटनपरात्कोऽपि न परः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

16. किं ध्यानेन भवत्वशेषविषयत्यागैस्तपोभिः कृतं,
पूर्णं भावनयालमिन्द्रियदमैः पर्याप्तमाप्तागमैः।
किंत्वेकं भवनाशनं कुरु गुरुप्रीत्या गुरोः शासनं,
सर्वे येन विना विनाथबलवत्स्वार्थाय नालं गुणाः।।

3. जिनमतप्रकरणम्

17. न देवं नादेवं न शुभगुरुमेवं न कुगुरुं,
न धर्मं नाधर्मं न गुणपरिणद्धं न विगुणम्।
न कृत्यं नाकृत्यं न हितमहितं नापि निपुणं,
विलोकन्ते लोका जिनवचनचक्षुर्विरहिताः।।

18. मानुष्यं विफलं वदन्ति हृदयं व्यर्थं वृथा श्रोत्रयो–
र्निर्माणं गुणदोषभेदकलनां तेषामसंभाविनीम्।
दुर्वारं नरकान्धकूपपतनं मुक्तिं बुधा दुर्लभां,
सार्वज्ञः समयो दयारसमयो येषां न कर्णातिथिः।।1

19. पीयूषं विषवज्जलं ज्वलनवत्तेजस्तमस्तोमव–
न्मित्रं शात्रववत्स्रजं भुजगवच्चिन्तामणिं लोष्ठवत्।
ज्योत्स्नां ग्रीष्मजघर्मवत् स मनुते कारुण्यपण्यापणं,
जैनेन्द्रं मतमन्यदर्शनसमं यो दुर्मतिर्मन्यते।।1

20. धर्मं जागरयत्यघं विघटयत्युत्थापयत्युत्पथं,
भिन्ते मत्सरमुच्छिनत्ति कुनयं मथ्नाति मिथ्यामतिम्।
वैराग्यं वितनोति पुष्यति कृपां मुष्णाति तृष्णां च य–
त्तज्जैनं मतमर्चति प्रथयति ध्यायत्यधीते कृती।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

4. संघप्रकरणम्

21. रत्नानामिव रोहणक्षितिधरः खं तारकाणामिव,
स्वर्गः कल्पमहीरुहामिव सरः पंकेरुहाणामिव।
पाथोधिः पयसामिवेन्दुमहसां स्थानं गुणानामसा–
वित्यालोच्य विरच्यतां भगवतः संघस्य पूजाविधिः।।

22. यः संसारनिरासलालसमतिर्मुक्त्यर्थमुत्तिष्ठते,
यं तीर्थं कथयन्ति पावनतया येनास्ति नान्यः समः।
यस्मै तीर्थपतिर्नमस्यति सतां यस्माच्छुभं जायते,
स्फूर्तिर्यस्य परा वसन्ति च गुणा यस्मिन् स संघोऽर्च्यताम्।।

23. लक्ष्मीस्तं स्वयमभ्युपैति रभसा कीर्तिस्तमालिङ्गते,
प्रीतिस्तं भजते मतिः प्रयतते तं लब्धुमुत्कण्ठया।
स्वःश्रीस्तं परिरब्धुमिच्छति मुहुर्मुक्तिस्तमालोकते,
यः संघं गुणराशिकेलिसदनं श्रेयोरुचिः सेवते।।

24. यद्भक्तेः फलमर्हदादिपदवी मुख्यं कृषेः सस्यव–
च्चक्रित्वत्रिदशेन्द्रतादि तृणवत्प्रासंगिकं गीयते।
शक्तिं यन्महिमस्तुतौ न दधते वाचोऽपि वाचस्पतेः,
संघः सोऽघहरः पुनातु चरणन्यासैः सतां मन्दिरम्।।

5. अहिंसाप्रकरणम्

25. क्रीडाभूः सुकृतस्य दुष्कृतरजःसंहारवात्या भवो–
दन्वन्नौर्व्यसनाग्निमेघपटली संकेतदूती श्रियः।
निःश्रेणिस्त्रिदिवौकसः प्रियसखी मुक्तेः कुगत्यर्गला,
सत्त्वेषु क्रियतां कृपैव भवतु क्लेशैरशेषैः परैः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

26. यदि ग्रावा तोये तरति तरणिर्यद्युदयति,
प्रतीच्यां सप्तार्चिर्यदि भजति शैत्यं कथमपि।
यदि क्ष्मापीठं स्यादुपरि सकलस्यापि जगतः,
प्रसूते सत्त्वानां तदपि न वधः क्वापि सुकृतम्।।

27. स कमलवनमग्नेर्वासरं भास्वदस्ता–
दमृतमुरगवक्त्रात् साधुवादं विवादात्।
रुगपगममजीर्णाज्जीवितं कालकूटा–
दभिलषति वधाद्यः प्राणिनां धर्ममिच्छेत्।।

28. आयुर्दीर्घतरं वपुर्वरतरं गोत्रं गरीयस्तरं,
वित्तं भूरितरं बलं बहुतरं स्वामित्वमुच्चैस्तरम्।
आरोग्यं विगतान्तरं त्रिजगति श्लाघ्यत्वमल्पेतरं,
संसाराम्बुनिधिं करोति सुतरं चेतः कृपार्द्रान्तरम्।।

6. सत्यप्रकरणम्

29. विश्वासायतनं विपत्तिदलनं देवैः कृताराधनं,
मुक्तेः पथ्यदनं जलाग्निशमनं व्याघ्रोरगस्तम्भनम्।
श्रेयःसंवननं समृद्धिजननं सौजन्यसंजीवनं,
कीर्तेःकेलिवनं प्रभावभवनं सत्यं वचः पावनम्।।

30. यशो यस्माद् भस्मीभवति वनवह्नेरिव वनं,
निदानं दुःखानां यदवनिरुहाणां जलमिव।
न यत्र स्याच्छायाऽतप इव तपःसंयमकथा,
कथंचित्तन्मिथ्यावचनमभिधत्ते न मतिमान्।।

31. असत्यमप्रत्ययमूलकारणं, कुवासनासद्म समृद्धिवारणम्।
विपन्निदानं परवंचनोर्जितं, कृतापराधं कृतिभिर्विवर्जितम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

32. तस्याग्निर्जलमर्णवः स्थलमरिर्मित्रं सुराः किङ्कराः,
कान्तारं नगरं गिरिर्गृहमहिर्माल्यं मृगारिर्मृगः।
पातालं बिलमस्त्रमुत्पलदलं व्यालः शृगालो विषं,
पीयूषं विषमं समं च वचनं सत्यांचितं वक्ति यः।।

7. अस्तेयप्रकरणम्

33. तमभिलषति सिद्धिस्तं वृणीते समृद्धि–
स्तमभिसरति कीर्तिर्मुंचते तं भवार्तिः।
स्पृहयति सुगतिस्तं नेक्षते दुर्गतिस्तं,
परिहरति विपत्तं यो न गृह्णात्यदत्तम्।।
34. अदत्तं नादत्ते कृतसुकृतकामः किमपि यः,
शुभश्रेणिस्तस्मिन् वसति कलहंसीव कमले।
विपत्तस्माद्दूरं व्रजति रजनीवाम्बरमणे–
र्विनीतं विद्येव त्रिदिवशिवलक्ष्मीर्भजति तम्।।
35. यन्निर्वर्तितकीर्तिधर्मनिधनं सर्वागसां साधनं
प्रोन्मीलद्वधबन्धनं विरचितक्लिष्टाशयोद्बोधनम्,
दौर्गत्यैकनिबन्धनं कृतसुगत्याश्लेषसंशोधनं,
प्रोत्सर्पत्प्रधनं जिघृक्षति न तद्धीमानदत्तं धनम्।।
36. परजनमनः पीडाक्रीडावनं वधभावना–
भवनमवनीव्यापिव्यापल्लताघनमण्डलम्।
कुगतिगमने मार्गः स्वर्गापवर्गपुरार्गलं
नियतमनुपादेयं स्तेयं नृणां हितकांक्षिणाम्।।

8. शीलप्रकरणम्

37. दत्तस्तेन जगत्यकीर्तिपटहो गोत्रे मषीकूर्चक–
श्चारित्रस्य जलांजलिर्गुणगणारामस्य दावानलः।
संकेतः सकलापदां शिवपुरद्वारे कपाटो दृढः
शीलं येन निजं विलुप्तमखिलं त्रैलोक्यचिन्तामणिः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

38. व्याघ्रव्यालजलानलादिविपदस्तेषां व्रजन्ति क्षयं,
कल्याणानि समुल्लसन्ति विबुधाः सान्निध्यमध्यासते।
कीर्तिः स्फूर्तिमियर्ति यात्युपचयं धर्मः प्रणश्यत्यघं,
स्वर्निर्वाणसुखानि सन्निदधते ये शीलमाबिभ्रते।।

39. हरति कुलकलङ्कं लुम्पते पापपंकं,
सुकृतमुपचिनोति श्लाघ्यतामातनोति।
नमयति सुरवर्गं हन्ति दुर्गोपसर्गं,
रचयति शुचि शीलं स्वर्गमोक्षौ सलीलम्।।

40. तोयत्यग्निरपि स्रजत्यहिरपि व्याघ्रोऽपि सारङ्गति,
व्यालोऽप्यश्वतिपर्वतोऽप्युपलति क्ष्वेडोऽपि पीयूषति।
विघ्नोऽप्युत्सवति प्रियत्यरिरपि क्रीडातडागत्यपां–
नाथोऽपि स्वगृहत्यटव्यपि नृणां शीलप्रभावाद् ध्रुवम्।।

9. परिग्रहत्यागप्रकरणम्

41. कालुष्यं जनयन् जडस्य रचयन् धर्मद्रुमोन्मूलनं,
क्लिष्यन्नीतिकृपाक्षमाकमलिनीं लोभाम्बुधिं वर्धयन्।
मर्यादातटमुद्रुजन् शुभमनोहंसं प्रवासं दिशन्
किं न क्लेशकरः परिग्रहनदीपूरः प्रवृद्धिं गतः।।

42. कलहकलभविन्ध्यः क्रोधगृध्रश्मशानं,
व्यसनभुजगरंध्रं द्वेषदस्युप्रदोषः।
सुकृतवनदवाग्निर्मार्दवाम्भोदवायु-
र्नयनलिनतुषारोऽत्यर्थमर्थानुरागः।।

43. प्रत्यर्थी प्रशमस्य मित्रमधृतेर्मोहस्य विश्रामभूः,
पापानां खनिरापदां पदमसद्ध्यानस्य लीलावनम्।
व्याक्षेपस्य निधिर्मदस्य सचिवः शोकस्य हेतुः कलेः,
केलिर्वेश्म परिग्रहः परिहृतेर्योग्यो विविक्तात्मनाम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

44. वह्निनस्तृप्यति नेन्धनैरिह यथा नाम्भोभिरम्भोनिधि–
स्तद्वन्मोहघनो घनैरपि धनैर्जन्तुर्न संतुष्यति।
न त्वेवं मनुते विमुच्य विभवं निःशेषमन्यं भवं,
यात्यात्मा तदहं मुधैव विदधाम्येनांसि भूयांसि किम्।।

10. क्रोधत्यागप्रकरणम्

45. यो मित्रं मधुनो विकारकरणे संत्राससंपादने,
सर्पस्य प्रतिबिम्बमङ्गदहने सप्तार्चिषः सोदरः।
चैतन्यस्य निषूदने विषतरोः सब्रह्मचारी चिरं,
स क्रोधः कुशलाभिलाषकुशलैः निर्मूलमुन्मूल्यताम्।।
46. फलति कलितश्रेयःश्रेणीप्रसूनपरम्परः,
प्रशमपयसा सिक्तो मुक्तिं तपश्चरणद्रुमः।
यदि पुनरसौ प्रत्यासत्तिं प्रकोपहविर्भुजो–
भजति लभते भस्मीभावं तदा विफलोदयः।।
47. संतापं तनुते भिनत्ति विनयं सौहार्दमुत्सादय–
त्युद्वेगं जनयत्यवद्यवचनं सूते विधत्ते कलिम्।
कीर्तिं कृन्तति दुर्मतिं वितरति व्याहन्ति पुण्योदयं,
दत्ते यः कुगतिं स हातुमुचितो रोषः सदोषः सताम्।।
48. यो धर्मं दहति द्रुमं दव इवोन्मथ्नाति नीतिं लतां,
दन्तीवेन्दुकलां विधुन्तुद इव क्लिश्नाति कीर्तिं नृणाम्।
स्वार्थं वायुरिवाम्बुदं विघटयत्युल्लासयत्यापदं,
तृष्णां घर्म इवोचितः कृतकृपालोपः स कोपः कथम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

11. मानत्यागप्रकरणम्

49. यस्मादाविर्भवति विततिर्दुस्तरापन्नदीनां,
यस्मिन् शिष्टाभिरुचितगुणग्रामनामापि नास्ति।
यश्च व्याप्तं वहति वधधीधूम्यया क्रोधदावं,
तं मानाद्रिं परिहर दुरारोहमौचित्यवृत्ते!।।

50. शमालानं भंजन् विमलमतिनाडिं विघटयन्
किरन्दुर्वाक्पांसूत्करमगणयन्नागमसृणिम्।
भ्रमन्नुर्व्यां स्वैरं विनयवनवीथिं विदलय–
ञ्जनः कं नानर्थं जनयति मदांधो द्विप इव।।

51. औचित्याचरणं विलुम्पति पयोवाहं नभस्वानिव
प्रध्वंसं विनयं नयत्यहिरिव प्राणस्पृशां जीवितम्।
कीर्तिं कैरविणीं मतंगज इव प्रोज्जासयत्यंजसा
मानो नीच इवोपकारनिकरं हन्ति त्रिवर्गं नृणाम्।।

52. मुष्णाति यः कृतसमस्तसमीहितार्थं,
संजीवनं विनयजीवितमंगभाजाम्।
जात्यादिमानविषजं विषमं विकारं,
तं मार्दवामृतरसेन नयस्व शान्तिम्।।

12. मायात्यागप्रकरणम्

53. कुशलजननवन्ध्यां सत्यसूर्यास्तसन्ध्यां,
कुगतियुवतिमालां मोहमातङ्गशालाम्।
शमकमलहिमानीं दुर्यशोराजधानीं,
व्यसनशतसहायां दूरतो मुंच मायाम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

54. विधाय मायां विविधैरुपायैः, परस्य ये वंचनमाचरन्ति।
ते वंचयन्ति त्रिदिवापवर्गसुखान्महामोहसखाः स्वमेव।।

55. मायामविश्वासविलासमन्दिरं, दुराशयो यः कुरुते धनाशया।
सोऽनर्थसार्थं न पतन्तमीक्षते,
यथा बिडालो लकुटं पयः पिबन्।।

56. मुग्धप्रतारणपरायणमुज्जिहीते, यत्पाटवं कपटलम्पटचित्तवृत्तेः।
जीर्यत्युपप्लवमवश्यमिहाप्यकृत्वा,
नापथ्यभोजनमिवामयमायतौ तत्।।

13. लोभत्यागप्रकरणम्

57. यद्दुर्गामटवीमटन्ति विकटं क्रामन्ति देशान्तरं,
गाहन्ते गहनं समुद्रमतनुक्लेशां कृषिं कुर्वते।
सेवन्ते कृपणं पतिं गजघटासंघट्टदुःसंचरं,
सर्पन्ति प्रधनं धनान्धितधियस्तल्लोभविस्फूर्जितम्।।

58. मूलं मोहविषद्रुमस्य सुकृताम्भोराशिकुम्भोद्भवः,
क्रोधाग्नेररणिः प्रतापतरणिप्रच्छादने तोयदः।
क्रीडासद्म कलेर्विवेकशशिनः स्वर्भाणुरापन्नदी–
सिन्धुः कीर्तिलताकलापकलभो लोभः पराभूयताम्।।

59. निःशेषधर्मवनदाहविजृम्भमाणे,
दुःखौघभस्मनि विसर्पदकीर्तिधूमे।
बाढं धनेन्धनसमागमदीप्यमाने,
लोभानले शलभतां लभते गुणौघः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

60. जातः कल्पतरुः पुरः सुरगवी तेषां प्रविष्टा गृहं,
चिन्तारत्नमुपस्थितं करतले प्राप्तो निधिः सन्निधिम्।
विश्वं वश्यमवश्यमेव सुलभाः स्वर्गापवर्गश्रियः,
ये संतोषमशेषदोषदहनध्वंसाम्बुदं बिभ्रते।।

14. सौजन्यप्रकरणम्

61. वरं क्षिप्तः पाणिः कुपितफणिनो वक्त्रकुहरे,
वरं झम्पापातो ज्वलदनलकुण्डे विरचितः।
वरं प्रासप्रान्तः सपदि जठरान्तर्विनिहितो,
न जन्यं दौर्जन्यं तदपि विपदां सद्म विदुषा।।
62. सौजन्यमेव विदधाति यशश्चयं च,
स्वश्रेयसं च विभवं च भवक्षयं च।
दौर्जन्यमावहसि यत्कुमते! तदर्थं,
धान्ये दवं दिशसि तज्जलसेकसाध्ये।।
63. वरं विभववन्ध्यता सुजनभावभाजां नृणा–
मसाधुचरितार्जिता न पुनरूर्जिताः संपदः।
कृशत्वमपि शोभते सहजमायतौ सुन्दरं,
विपाकविरसा न तु श्वयथुसंभवा स्थूलता।।
64. न ब्रूते परदूषणं परगुणं वक्त्यल्पमप्यन्वहं,
संतोषं वहते परर्द्धिषु पराबाधासु धत्ते शुचम्।
स्वश्लाघां न करोति नोज्झति नयं नौचित्यमुल्लंघय–
त्युक्तोऽप्यप्रियमक्षमां न रचयत्येतच्चरित्रं सताम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

15. गुणिसंगप्रकरणम्

65. धर्मं ध्वस्तदयो यशश्च्युतनयो वित्तं प्रमत्तः पुमान्,
काव्यं निष्प्रतिभस्तपः शमदयाशून्योऽल्पमेधाः श्रुतम्।
वस्त्वालोकमलोचनश्चलमना ध्यानं च वांछत्यसौ,
यः सङ्गं गुणिनां विमुच्य विमतिः कल्याणमाकांक्षति।।

66. हरति कुमतिं भिन्ते मोहं करोति विवेकितां,
वितरति रतिं सूते नीतिं तनोति विनीतताम्।
प्रथयति यशो धत्ते धर्मं व्यपोहति दुर्गतिं,
जनयति नृणां किं नाभीष्टं गुणोत्तमसङ्गमः।।

67. लब्धुं बुद्धिकलापमापदमपाकर्त्तुं विहर्तुं पथि,
प्राप्तुं कीर्तिमसाधुतां विधुवितुं धर्मं समासेवितुम्।
रोद्धुं पापविपाकमाकलयितुं स्वर्गापवर्गश्रियं,
चेत्त्वं चित्त! समीहसे गुणवतां सङ्गं तदङ्गीकुरु।।

68. हिमति महिमाम्भोजे चण्डानिलत्युदयाम्बुदे,
द्विरदति दयारामे क्षेमक्षमाभृति वज्रति।
समिधति कुमत्यग्नौ कन्दत्यनीतिलतासु यः,
किमभिलषता श्रेयः श्रेयः स निर्गुणसङ्गमः।।

16. इन्द्रियदमनप्रकरणम्

69. आत्मानं कुपथेन निर्गमयितुं यः शूकलाश्वायते,
कृत्याकृत्यविवेकजीवितहृतौ यः कृष्णसर्पायते।
यः पुण्यद्रुमखण्डखण्डनविधौ स्फूर्जत्कुठारायते,
तं लुप्तव्रतमुद्रमिन्द्रियगणं जित्वा शुभंयुर्भव।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

70. प्रतिष्ठां यन्निष्ठां नयति नयनिष्ठां विघटय–
त्यकृत्येष्वाधत्ते मतिमतपसि प्रेम तनुते।
विवेकस्योत्सेकं विदलयति दत्ते च विपदं,
पदं तद्दोषाणां करणनिकुरम्बं कुरु वशे।।

71. धत्तां मौनमगारमुज्झतु विधिप्रागल्भ्यमभ्यस्यता–
मस्त्वन्तर्वणमागमश्रममुपादत्तां तपस्तप्यताम्।
श्रेयः पुंजनिकुंजभंजनमहावातं न चेदिन्द्रिय–
व्रातं जेतुमवैति भस्मनि हुतं जानीत सर्वं ततः।।

72. धर्मध्वंसधुरीणमभ्रमरसावारीणमापत्प्रथा–
लंकर्मीणमशर्मनिर्मितिकलापारीणमेकान्ततः।
सर्वान्नीनमनात्मनीनमनयात्यन्तीनमिष्टे यथा–
कामीनं कुपथाध्वनीनमजयन्नक्षौघमक्षेमभाक्।।

17. लक्ष्मीस्वभावप्रकरणम्

73. निम्नं गच्छति निम्नगेव नितरां निद्रेव विष्कंभते,
चैतन्यं मदिरेव पुष्यति मदं धूम्येव धत्तेऽन्धताम्।
चापल्यं चपलेव चुम्बति दवज्वालेव तृष्णां नय–
त्युल्लासं कुलटाङ्गनेव कमला स्वैरं परिभ्राम्यति।।

74. दायादाः स्पृहयन्ति तस्करगणा मुष्णन्ति भूमीभुजो,
गृह्णन्तिच्छलमाकलय्य हुतभुग्भस्मीकरोति क्षणात्।
अम्भः प्लावयते क्षितौ विनिहितं यक्षा हरन्ते हठाद्,
दुर्वृत्तास्तनया नयन्ति निधनं धिग्बह्वधीनं धनम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

75. नीचस्यापि चिरं चटूनि रचयन्त्यायान्ति नीचैर्नतिं,
शत्रोरप्यगुणात्मनोऽपि विदधत्युच्चैः गुणोत्कीर्तनम्।
निर्वेदं न विदन्ति किंचिदकृतज्ञस्यापि सेवाक्रमे,
कष्टं किं न मनस्विनोऽपि मनुजाः कुर्वन्ति वित्तार्थिनः।।

76. लक्ष्मीः सर्पति नीचमर्णवपयःसङ्गादिवाम्भोजिनी–
संसर्गादिव कण्टकाकुलपदा न क्वापि धत्ते पदम्।
चैतन्यं विषसन्निधेरिव नृणामुज्जासयत्यंजसा,
धर्मस्थाननियोजनेन गुणिभिर्ग्राह्यं तदस्याः फलम्।।

18. दानप्रकरणम्

77. चारित्रं चिनुते तनोति विनयं ज्ञानं नयत्युन्नतिं,
पुष्णाति प्रशमं तपः प्रबलयत्युल्लासयत्यागमम्।
पुण्यं कन्दलयत्यघं दलयति स्वर्गं ददाति क्रमा–
न्निर्वाणश्रियमातनोति निहितं पात्रे पवित्रं धनम्।।

78. दारिद्र्यं न तमीक्षते न भजते दौर्गत्यमालम्बते,
नाकीर्तिर्न पराभवोऽभिलषते न व्याधिरास्कन्दति।
दैन्यं नाद्रियते दुनोति न दरः क्लिश्नन्ति नैवापदः,
पात्रे यो वितरत्यनर्थदलनं दानं निदानं श्रियाम्।।

79. लक्ष्मीः कामयते मतिर्मृगयते कीर्तिस्तमालोकते,
प्रीतिश्चुम्बति सेवते सुभगता नीरोगतालिङ्गति।
श्रेयः संहतिरभ्युपैति वृणुते स्वर्गोपभोगस्थिति–
र्मुक्तिर्वाञ्छति यः प्रयच्छति पुमान् पुण्यार्थमर्थं निजम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

80. तस्यासन्ना रतिरनुचरी कीर्तिरुत्कण्ठिता श्रीः,
स्निग्धा बुद्धिः परिचयपरा चक्रवर्तित्वऋद्धिः।
पाणौ प्राप्ता त्रिदिवकमला कामुकी मुक्तिसंपत्
सप्तक्षेत्र्यां वपति विपुलं वित्तबीजं निजं यः।।
81. पात्रे धर्मनिबन्धनं तदितरे श्रेष्ठं दयाख्यापकं,
मित्रे प्रीतिविवर्धनं तदितरे वैरापहारक्षमम्।
भृत्ये भक्ति–भरावहं नरपतौ सम्मानसत्पादकं,
भट्टादौ सुयशस्करं वितरणं न क्वाप्यहो निष्फलम्।।

19. तप प्रकरणम्

82. यत्पूर्वार्जितकर्मशैलकुलिशं यत्कामदावानल–
ज्वालाजालजलं यदुग्रकरणग्रामाहिमन्त्राक्षरम्।
यत्प्रत्यूहतमः समूहदिवसं यल्लब्धिलक्ष्मीलता–
मूलं तद्विविधं यथाविधि तपः कुर्वीत वीतस्पृहः।।
83. यस्माद्विघ्नपरम्परा विघटते दास्यं सुराः कुर्वते,
कामः शाम्यति दाम्यतीन्द्रियगणः कल्याणमुत्सर्पति।
उन्मीलन्ति महर्द्धयः कलयति ध्वंसं च यत् कर्मणां,
स्वाधीनंत्रिदिवंशिवं च भवति श्लाघ्यंतपस्तन्नकिम्।।
84. कान्तारं न यथेतरो ज्वलयितुं दक्षो दवाग्निं विना,
दावाग्निं न यथापरः शमयितुं शक्तो विनाम्भोधरम्।
निष्णातः पवनं बिना निरसितुं नान्यो यथाम्भोधरम्,
कर्मौघं तपसा विना किमपरो हन्तुं समर्थस्तथा।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

85. संतोषस्थूलमूलः प्रशमपरिकरस्कन्धबन्धप्रपंचः,
पंचाक्षीरोधशाखः स्फुरदभयदलः शीलसंपत्प्रवालः।
श्रद्धाम्भः पूरसेकाद्विपुलकुलबलैश्वर्यसौन्दर्यभोग–
स्वर्गादिप्राप्तिपुष्पः शिवपदफलदः स्यात्तपः पादपोऽयम्।।

20. भावना प्रकरणम्

86. नीरागे तरुणीकटाक्षितमिव त्यागव्यपेतप्रभोः,
सेवाकष्टमिवोपरोपणमिवाम्भोजन्मनामश्मनि।
विश्वग्वर्षमिवोषरक्षितितले दानार्हदर्चातपः,
स्वाध्यायाध्ययनादि निष्फलमनुष्ठानं विना भावनाम्।।
87. सर्वं ज्ञीप्सति पुण्यमीप्सति दयां धित्सत्यघं भित्सति,
क्रोधं दित्सति दानशीलतपसां साफल्यमादित्सते।
कल्याणोपचयं चिकीर्षति भवाम्बोधेस्तटं लिप्सते,
मुक्तिस्त्रीं परिरिप्सते यदि जनस्तद् भावयेद् भावनाम्।।
88. विवेकवनसारिणिं प्रशमशर्मसंजीवनीं,
भवार्णवमहातरीं मदनदावमेघावलीम्।
चलाक्षमृगवागुरां गुरुकषायशैलाशनिं,
विमुक्तिपथवेसरीं भजत भावनां किं परैः?।।
89. धनं दत्तं वित्तं जिनवचनमभ्यस्तमखिलं,
क्रियाकाण्डं चण्डं रचितमवनौ सुप्तमसकृत्।
तपस्तीव्रं तप्तं चरणमपि चीर्णं चिरतरं,
न चेच्चित्ते भावस्तुषवपनवत्सर्वमफलम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

21. वैराग्य प्रकरणम्

90. यदशुभरजः पाथो दृप्तेन्द्रियद्विरदांकुशं,
कुशलकुसुमोद्यानं माद्यन्मनःकपिशृङ्खला।
विरतिरमणीलीलावेश्म स्मरज्वरभेषजं,
शिवपथरथस्तद् वैराग्यं विमृश्य भवाभयः।।

91. चण्डानिलः स्फुरितमब्दचयं दवार्चि–
र्वृक्षव्रजं तिमिरमण्डलमर्कबिम्बम्।
वज्रं महीध्रनिवहं नयते यथान्तं,
वैराग्यमेकमपि कर्म तथा समग्रम्।।

92. नमस्या देवानां चरणवरिवस्या शुभगुरो–
स्तपस्या निःसीमक्लमपदमुपास्या गुणवताम्।
निषद्यारण्ये स्यात् करणदमविद्या च शिवदा,
विरागः क्रूरागः क्षपणनिपुणोन्तः स्फुरति चेत्।।

93. भोगान् कृष्णभुजङ्गभोगविषमान् राज्यं रजःसन्निभं,
बन्धून् बन्धनिबन्धनानि विषयग्रामं विषान्नोपमम्।
भूतिं भूतिसहोदरां तृणतुलं स्त्रैणं विदित्वा त्यज–
न्तेष्वासक्तिमनाविलो विलभते मुक्तिं विरक्तः पुमान्।।

94. जिनेन्द्रपूजाः गुरुपर्युपास्तिः, सत्त्वानुकम्पा शुभपात्रदानम्।
गुणानुरागः श्रुतिरागमस्य, नृजन्मवृक्षस्य फलान्यमूनि।।

सामान्योपदेशः

95. त्रिसन्ध्यं देवार्चां विरचय चयं प्रापय यशः,
श्रियः पात्रे वापं जनय नयमार्गं नय मनः।
स्मरक्रोधाद्यारीन् दलय कलय प्राणिषु दयां,
जिनोक्तं सिद्धान्तं शृणु वृणु जवान्मुक्तिकमलाम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

96. कृत्वार्हत्पदपूजनं यतिजनं नत्वा विदित्वागमं,
हित्वा सङ्गमधर्मकर्मठधियां पात्रेषु दत्त्वा धनम्।
गत्वा पद्धतिमुत्तमक्रमजुषां जित्वान्तरारिव्रजं,
स्मृत्वा पंचनमस्क्रियां कुरु करक्रोडस्थमिष्टं सुखम्।।
97. प्रसरति यथा कीर्तिर्दिक्षु क्षपाकरसोदरा–
भ्युदयजननी याति स्फीतिं यथा गुणसन्ततिः।
कलयति यथा वृद्धिं धर्मः कुकर्महतिक्षमः,
कुशलसुलभे न्याय्ये कार्यं तथा पथि वर्तनम्।।
98. करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणमनं,
मुखे सत्या वाणी श्रुतमधिगतं च श्रवणयोः।
हृदि स्वच्छावृत्तिर्विजयि भुजयोः पौरुषमहो,
विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम्।।
99. भवारण्यं मुक्त्वा यदि जिगमिषुर्मुक्तिनगरीं,
तदानीं माकार्षीर्विषयविषवृक्षेषु वसतिम्।
यतश्छायाप्येषा प्रथयति महामोहमचिरा–
दयं जन्तुर्यस्मात्पदमपि न गन्तुं प्रभवति।।
100. सोमप्रभाचार्यमभा च यन्न, पुंसां तमः पंकमपाकरोति।
तदप्यमुष्मिन्नुपदेशलेशे, निशम्यमाने निशमेति नाशम्।।

प्रशस्तिः

101. अभजदजितदेवाचार्यपट्टोदयाद्रि–
द्युमणिविजयसिंहाचार्यपादारविन्दे।
मधुकरसमतां यस्तेन सोमप्रभेण,
व्यरचि मुनिपनेत्रा सूक्तिमुक्तावलीयम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

25. पंचसूत्रम्

—आचार्य तुलसी

1. अनुशास्तिसूत्रम्

1. एकदा समुपासीनाः शिष्या आचार्यमुत्तमम्।
   प्रारेभिरे वरां चर्चां, भावनाभ्यस्तचेतसः।।
2. मुक्तये साधवो जाताः, बन्धनच्छित्तये प्रभो!
   बन्धनान्यपि साधुत्वे, यदि स्युर्विस्मयो महान्।।
3. किमत्र बन्धनं दृष्टं, मुनेरात्मविहारिणः?
   स्पष्टमावेद्यतां वत्स! मुमुक्षामुद्गमं नयन्।।
4. अनुशासनमत्रास्ति, व्यवस्था चापि विद्यते।
   स्वतंत्रचेतसामेतद्, बन्धनं स्पष्टमीक्ष्यते।।
5. जीवनं विद्यते यत्र मुमुक्षो! सामुदायिकम्।
   तत्रानिवार्यतामेति, व्यवस्था चानुशासनम्।।
6. तथापि बन्धनं नैतद्, मुनेरात्मानुशासिनः।
   परानुशासितस्यैतद्, बन्धनं स्यान्न चान्यथा।।
7. अनिवार्यं कथं देव! समुदायेऽनुशासनम्।
   यत्र स्वशासिनः सर्वे, विद्यन्ते मुनयो वराः।।
8. लक्ष्यं स्वशासनं वत्स! तेषामस्तीति मे मतिः।
   परमात्मानुशासित्वं, क्षणेनैव सिद्ध्यति।।
9. विवेकोऽपि न सर्वेषां, सदृशो भवति क्वचित्।
   सम्बुद्धिश्चिन्तनं चापि, रुचिः संस्कारधारणा।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

10. सोपानानि यथारोढुमादेयानि न सर्वदा।
तथानुशासनं वत्स! स्वस्याऽऽरोहणहेतवे।।
11. यथा यथा धनं शीतं, वासस्तथा तथा घनम्।
क्षीणं यथा यथा शीतं, पेलवं तत्तथा तथा।।
12. यथा यथा घनो मोहः, तथा तथाऽनुशासनम्।
यथा यथा कृशो मोहः, तथातथाऽनुशासनम्।।
13. तद् दिनं चापि संभावि, यस्मिन्नात्मानुशासनम्।
गुरुशासननिर्मुक्तमुदेष्यति समात्मना।।
14. एतत् संबुद्धिसंगम्यं, न दीपः सति भास्करे।
न दीपा अपि यामिन्यामिति बुद्धेरगोचरम्।।
15. एतद् युक्तं नानुशिष्टिः, सूदिते स्वानुशासने।
स्वानुशिष्टेरभावेऽपि, नार्हा सेति न सम्मतम्।।
16. यथा यथोदयं याति, पुण्यं स्वात्मानुशासनम्।
विफणावस्थमार्याणां, तथा तथानुशासनम्।।
17. सरोवरस्य मध्यस्थं, निर्लिप्तं नलिनीदलम्।
तथानुशासनस्थोपि, न लिप्तः शासितात्मकः।।
18. श्रीकालूगणिनः पुण्यमुदाहरणमिष्यते।
यस्य स्वशासनेनाप्तं, कृशत्वमनुशासनम्।।
19. कृशत्वं यो नयेच्छिष्यः, सद्गुरोरनुशासनम्।
स कथं स्याद् विनीतात्मा, संशये भगवन्नहम्।।
20. गुरुर्वाञ्छति शिष्येषु, विकसेदात्मशासनम्।
न वाञ्छति भवेयुस्ते, नित्यं संप्रेरिताः परैः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

21. गुरुर्बध्नाति नो जाले, मीनानिवेह मैनिकः।
गुरुर्विहारयत्यभ्रे, पोतानिव विहंगमः।।
22. चंचुमध्ये क्षिपन्तेऽपि, भोजनं पक्षिणो यथा।
तथानुशास्ति कृत्योऽपि, स्वशिष्यान् बालकानिव।।
23. पंगुतां न नयत्येष, हस्तालम्बं सृजन्नपि।
गतिं संप्रेरयत्येव, गच्छेयुस्ते निजक्रमैः।।
24. पुराऽनुशासनं पुण्यमतीतेऽशिक्षिते जने।
इदानीं शिक्षिते लोके, किमावश्यकमस्ति तत्?।।
25. शाश्वतं किंचिदत्रास्ति, किंचित् सामयिकं तथा।
त्रैकालिकमिदं सत्यमारम्भः सानुशासनः।।
26. वैज्ञानिकमिदं तथ्यं संसिद्धिः स्वानुशासना।
तेनानुशासने प्रेम, पीनं भूयात् तवानिशम्।।
27. उच्छृंखलाः स्खलन्त्येव, पुरो यान्ति सुशृंखलाः।
तेनानुशास्तिमासाद्य, स्वानुशिष्टेः पथि व्रज।।
28. पुरा स्वातन्त्र्यमिच्छन्ति, ते नार्हन्ति स्वतंत्रताम्।
पुराऽनुशास्तिमिच्छन्ति, तेऽर्हन्ति सुस्वतंत्रताम्।।
29. तावच्छिष्यो भवेच्छिष्यः, यावत् साहाय्यमाप्नुयात्।
अनुशासितुमात्मानं, शिष्टेरेतत् प्रयोजनम्।।
30. सर्वां चर्यां विहारञ्च, वासं शिक्षां तथाऽपरम्।
सर्वं सुसंयतः कुर्यादनुसृत्यानुशासनम्।।
31. भारं वहति यो बुद्धेः, स नार्हति समर्पणम्।
तद् विना नानुशास्तिः स्यात् स्वीकार्या नम्रभावतः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

32. यत्र शिष्यो न मन्येत, गुरुं स्वहृदये स्थितम्।
समर्पणं न तत्र स्याद्, नानुशास्तिश्च हार्दिकी।।
33. गुरुश्चापि न मन्येत, शिष्यं स्वहृदयं गतम्।
वात्सल्यं न च तत्र स्याद्, नानुशास्तिश्च हार्दिकी।।
34. विनयो नाम शिष्याणां, वात्सल्यं च गुरोरपि।
यत्र योगं प्रकुर्वाते, तत्र हार्दं समर्पणम्।।
35. हार्दं समर्पणं यत्र, तत्रानुशास्तिरात्मिकी।
यत्रानुशासनं हार्दं तत्र शासनगौरवम्।।

2. व्यवस्थासूत्रम्

1. व्यवस्था सत्यमाप्नोति, सत्यं शिवत्वमश्नुते।
शिवं यत्र भवेत्तत्र, सौन्दर्यं सहजं भवेत्।।
2. समपंक्तौ स्थिता भान्ति, मानवाः सममस्तकाः।
फलमेतद् व्यवस्थायाः, अव्यवस्था विमुह्यति।।
3. व्यवस्था मुख्यतां नीता, तेन देवार्यभिक्षुणा।
तेरापंथस्य सौन्दर्यं, तत एवास्ति भूतले।।
4. आचार्योऽत्र भवेदेकः, स्युः शिष्या अपरे समे।
इति व्यवस्थया तेन, कलहोन्मूलनं कृतम्।।
5. शिष्यलोलुपता भूयः साधूनां विनिवारिता।
शक्तिः पुंजीकृता पुण्या, विनयोद्भवमाश्रिता।।
6. न हि सर्वत्र संचारी, सविता किन्तु तत्कराः।
संचरन्ति च सर्वत्र, हरन्ति जगतस्तमः।।
7. आचार्यस्य करीभूताः, विहरन्ति मुमुक्षवः।
हरन्ति जगतो ध्वान्तं, संचरन्ति पृथक्–पृथक्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

8. तेप्येकं प्रमुखीकृत्य, विहरेयुरियं स्थितिः।
धर्मप्रवृद्धयेऽकारि, गणस्योन्नतये ध्रुवम्।।
9. कराणां तत्करत्वं स्याल्लीयेरंस्तरणौ निजम्।
उत्थितं जलधेर्वारि, पुनरेति महार्णवम्।।
10. मुख्यानां तद्धि मुख्यत्वं, लीयेरन् गणिनि स्वकम्।
अनन्यत्वमतः सिद्ध्येद् जीवानां ब्रह्मणा यथा।।
11. पुस्तकेषु प्रदत्तेषु, गणिना पाठहेतवे।
न स्वामित्वं प्रकुर्वीत, नान्येषु गणवस्तुषु।।
12. ममकारं न कुर्वीत, सहगामिषु साधुषु।
साध्वीषु सर्वथाप्येष, योगोस्ति प्रातिहारिकः।।
13. अनन्तरं चातुर्मास्या, आयाता अग्रगामिनः।
अर्पणप्रवणां शब्दावलिं, जल्पन्ति तत्क्षणम्।।
14. शब्दात्मा न भवेदेषा, भावाद् विप्रच्युता ध्रुवम्।
न हितं साधयेत् किञ्चिद् व्यवस्था खलु शाब्दिकी।।
15. अव्यवस्था व्यवस्थायाः, शाब्दिक्याः प्रवरा भवेत्।
यस्यामप्रत्ययः स्पष्टं, न मोहं विनयेद् मनः।।
16. सप्राणाऽसौ व्यवस्था स्यादिति बाढ़मपेक्ष्यते।
अन्यथा शिष्यनिर्मुक्तिः, कृतापि न कृता भवेत्।।
17. यथावश्यकमाचार्यः, साधून् साध्वीश्च योजयेत्।
साहाय्यं तत्र कुर्वीरन्नाचार्यस्य सुचेतसः।।
18. एतत् साहाय्यमार्याय, दातुमर्हन्ति साधवः।
यथाग्रगामिनस्तद्वद्, मुनयः सहगामिनः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

19. आवश्यकं परिवर्तं, स्वीकुर्वीरन् सहर्षकम्।
तदाचार्यस्य सारल्यमत्र कामं प्रजायते।।1
20. ग्रामेष्वाचार्यदिष्टेषु, प्रवरेष्ववरेषु च।
विहारो मुनिभिः कार्यः श्रयद्भिः समभावनाम्।।
21. आहारस्य व्यवस्था या, यदाऽचार्येण सृज्यते।
तथैव पालनीया सा, प्रमाणं वार्तमानिकी।।
22. पुरा विभागः साधूनां, साध्वीनां चाभवत् समम्।
इदानीं प्राप्यते सर्वैः, स्वानीता गोचरी स्वयम्।।
23. सौविध्याय कृतास्त्येषा, व्यवस्था सुनियोजिता।
यथावश्यकमेषापि, परिवर्तनमर्हति।।
24. सामुदायिककार्याणि, दीक्षाक्रमेण संततम्।
सर्वैरपि विधेयानि, व्यवस्थेयं परंपरम्।।
25. विहारकारिणां केषां, स्थिरवासमुपेयुषाम्।
शरीरास्वास्थ्यमाप्तानां, सेवा कार्या ससम्मदम्।।
26. चराणां च चरा सेवा, स्थिरा स्थैर्यमुपेयुषाम्।
द्विविधापि विधातव्या, सकलैरग्रगामिभिः।।
27. पुरा गाथा प्रबन्धोऽभूत्, सेवा सम्प्रति साधिता।
साधूनामपि साध्वीनामनिवार्यतया मया।।
28. सेवा शाश्वतिको धर्मः, सेवा भेदविसर्जनम्।
सेवा समर्पणं स्वस्य, सेवा ज्ञानफलं महत्।।
29. महान्तो ज्ञानिनः सन्ति, महान्तो ध्यानिनस्तथा।
तेभ्योऽपि सुमहान्तश्च, सन्ति सेवापरायणाः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

30. सेवातन्तोरनुस्यूत्या, संघस्यैकत्वमिष्यते।
सेवातन्तोश्च विच्छित्त्या, संघच्छेदोऽपि जायते।।
31. वैयावृत्त्यं कृतं येन, मुनेः रुग्णस्य भावतः।
मम सेवा कृता तेन, ब्रूते तीर्थकरो महान्।।
32. तेन सेवाव्रतं पुण्यं, समुपास्यं ससम्मदम्।
साधुभिश्चापि साध्वीभिर्व्यवस्थैषा महोदया।।
33. स्थाननिर्धारणं चापि, दीक्षाक्रमेण जायते।
साहाय्यस्यापि चैकस्य, शयनस्य स्थितेरपि।।
34. व्यवस्थाऽसौ व्यवस्थानामखिलानां प्रविद्यते।
आचार्योऽमूर्यथायोग्यं, परिवर्तयितुं क्षमः।।
35. कार्यादीनां व्यवस्थायां, व्यापृणीयान्न कञ्चन।
इति स्वतंत्रतामेति, गणौचित्यं प्रपालयन्।।
36. पुरान्येषां पदानाञ्च, व्यवस्थासीत् परंपरम्।
भिक्षुणाऽभाणि सर्वेषां, पदानां कार्यकार्यहम्।।
37. ततस्तेषामप्रवृत्तिरस्माकं शासनेऽभवत्।
परन्तु न निषेधोऽत्र, कृतस्तेन महात्मना।।
38. महानद्य गणो जातः, कार्यं विवृद्धिमाश्रितम्।
तेन काचिद् व्यवस्थापि, मयाऽद्य समपेक्ष्यते।।
39. महामतेर्महाबोधेः, श्रीभिक्षोर्दूरदर्शिनः।
हार्दं संबुद्ध्यमानोऽहं, व्यवस्था काञ्चिदारभे।।
40. पुण्या चतुर्निकायात्मा, व्यवस्था क्रियते मया।
प्रबन्धः साधना शिक्षा, साहित्यञ्च भवन्त्यमी।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

41. व्यवस्थापकवर्गेण, सर्वेऽमी स्युर्व्यवस्थिताः।
गणस्योन्नतये नूनं, भाविनः सुसमीक्षिताः।।
42. व्यवस्थापकवर्गोऽत्र, गणिनैव नियोक्ष्यते।
एको निकायसचिवः, नियुक्तोऽत्र भविष्यति।।
43. आचार्येण परां प्रीतिमावहन् प्रत्ययास्पदम्।
विनम्रो धृतिमान् संघनिष्ठां यः सुदृढां वहेत्।।
44. आचार्याज्ञां समासाद्य, स तां क्रियान्वितिं नयेत्।
व्यवस्थापकवर्गेण, तथान्यैः सहयोगिभिः।।
45. यथाकार्यं यथायोग्यमाचार्येण महात्मना।
व्यवस्था व्यवहार्यासौ, सर्वं स्वातंत्र्यमर्हति।।
46. कदाचित् संप्रवर्तेत, निरुध्याच्च कदाचन।
नात्र कश्चित् परिप्रश्नः, कार्यः शासनसेविभिः।।

3. चर्यासूत्रम्

1. किमर्थं साधवो जाताः? स्मरणीयमिदं मुहुः।
स्मृतिरेषा महापुण्या, लक्ष्यं सदानुधावति।।
2. नाहाराय न पानाय, नाश्रयाय न वाससे।
अस्माभिः स्वीकृता दीक्षा, न प्रतिष्ठोपलब्धये।।
3. आत्मोदयाय साधुत्वमस्माभिः स्वीकृतं शुभम्।
तेनात्मनि दृढा श्रद्धा, समुन्नेया मुमुक्षुभिः।।
4. वैभाविकप्रवृत्तीनां, निवृत्तिरुदयो भवेत्।
यथा यथा निवृत्तिः स्यात् तथा तथाऽन्तरोदयः।।
5. कायोत्सर्गस्तथा ध्यानं, भेदविज्ञानचिन्तनम्।
लक्ष्यसिद्धयै भवेत्कार्योभ्यासोऽमीषां मुहुर्मुहुः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

6. कषायो मन्दतामेति, क्रमेणानेन चारुणा।
कषाये मन्दतां प्राप्ते, शान्तिरुज्जृम्भते वरा।।
7. स्वभावे शान्तिमायाते, साधुता शोभते शुभा।
आनन्द उदयं याति, वाचाऽनिर्वचनीयकः।।
8. दीक्षा प्राप्ता न च प्राप्तः, आत्मानन्दो यदोदयम्।
तदा त्यक्तं गृहं नाम, न त्यक्ता गृहवासना।।
9. मूल्यं क्षणस्य विज्ञाय, भाव्यं भूयोऽप्रमादिना।
दिनचर्यां स्थिरीकृत्य, निश्चित्य कार्यपद्धतिम्।।
10. अपेक्षा विविधा संघे, वैविध्यञ्च रुचेरपि।
तेन स्वरुचिमालम्ब्य, कर्त्तव्यः कार्यनिश्चयः।।
11. सेवारुचिर्मुनिः कश्चित्, स सेवेत गणं समम्।
न भेदं समपेक्षेत, सेवाकार्ये स कञ्चन।।
12. संघाटकं समं सर्वं, साहाय्यं च समं तथा।
पश्यतश्चक्षुषी यस्य, गणमेकं स पश्यति।।
13. स्वाध्यायरुचिरप्येकः, स्वाध्यायं कुरुतां भृशम्।
गणोन्नतिकरा एते, स्वाध्यायरतचेतसः।।
14. विद्यावृद्धमिदं विश्वं, यन्निर्विद्यानुपेक्षते।
स्वाध्यायस्नातकाः सन्तो, भवन्त्यभ्यर्हिता जनैः।।
15. एकः कृतरुचिर्ध्याने, ध्यानं धरतु संततम्।
चिरतां स गणस्यायुर्नयते नात्र संशयः।।
16. ध्यानाग्निनेरितो नित्यं, निर्मलो भासते गणः।
परं मलापनोदाय, नौषधं ध्यानसन्निभम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

17. व्याख्यानरुचिरप्यत्र, करोतूद्यममुन्नतम्।
गणं प्रभावयन्त्येव, व्याख्यानप्रवणा भृशम्।।
18. वाक्कौशलं चमत्कारो, यात्वस्ति महतो महत्।
आकर्षति जनान् सद्यः, तथानुगमयत्यपि।।
19. साहित्यरुचिरेकः स्यान्निर्माणार्पितमानसः।
विचारान् नूतनान् भव्यान्, स ग्रथ्नातु शुभाकृतौ।।
20. लाभमश्नुवते लोकाः, प्रभावोऽपि च वर्धते।
विचारसाम्यमापन्ने, पूर्वमैक्यं प्रजायते।।
21. एकेन्द्रियजयरुचिः, स नित्यं यतताामिह।
सर्वेन्द्रियजयरुचिः, विकासं सोपि गच्छतु।।
22. अनेके सन्ति पन्थानः, साधनाक्षेत्रचारिणाम्।
प्रकर्षं चरणान् नेतुमवलम्ब्यो यथारुचिः।।
23. सर्वे सर्वाध्वभिर्गन्तुं, सामर्थ्यं लभतां वरम्।
किन्तु सर्वात्मना सर्वे, गन्तुं सर्वत्र नेशते।।
24. तेनैको मुख्यरूपेण, समालम्ब्यो मुमुक्षुणा।
केवलं लक्ष्यसंसिद्धयै, न प्रभावयितुं परान्।।
25. ग्रंथान् कश्चिल्लिखेन्नापि, किंतु स्वाध्यायमाश्रयेत्।
कुर्याद् ध्यानं तथा गच्छेत् सर्वेन्द्रियजये रतिम्।।
26. मुमुक्षुत्वमिदं पुण्यं, न च ग्रन्थादिलेखनम्।
फलोपमं तदेतत्स्यात्, मूलं फलैर्विशिष्यते।।
27. चर्यायां वर्तमानस्य, प्रमादः क्वापि जायते।
उपदेशो विधातव्यः, तत्र ज्येष्ठेन सादरम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

28. इत्थं न वर्तितव्यं स्यादुपदेशो भवेदसौ।
जातायां विस्मृतौ तस्य, कर्तव्या स्मारणा भवेत्।।
29. पुनस्तत्र प्रमादे हि, प्रतिस्मारयते गुरुः।
प्रायश्चित्तं ततो देयं, ततो निष्कासनं गणात्।।
30. कुथितं कोथयेत् पत्रं, तम्बोलस्य पराण्यपि।
तथैव कुथितः साधुः कोथयेदपरानपि।।
31. संख्यया नैधते तेजः, तेजः शक्त्याभिवर्धते।
नयन्ति गौरवं संघमपि चाल्पे तपस्विनः।।
32. कदाचिद्धीयते संख्या, कदाचिच्च विवर्धते।
नास्या महत्त्वमस्त्यस्य, तिष्ठेत् संघो विशुद्धिमान्।।
33. गण गंगाजले पुण्ये, प्रवहति निरंतरम्।
स्नाता भवन्ति भूयांसो, निर्मलान्तःप्रवृत्तयः।।

4. आलम्बनसूत्रम्

1. लब्धालम्बं पुष्पं, स्थानं कल्याणमेति फलदाङ्के।
लब्धालम्बो भिक्षुः, स्थानं कल्याणमेति गच्छाङ्के।।
2. मुक्तालम्बं पुष्पं, सद्यः पातं प्रयाति भूम्यङ्के।
मुक्तालम्बो भिक्षुः, सद्यः पातं प्रयाति रागाङ्के।।
3. आलम्बनानि भूयो, मुनिना पीनानि तद् विधेयानि।
निदिशामि तत्र कतिचित्, स्वयमूह्यानीतराणि सापेक्षम्।।
4. आलम्बनमिदं कार्यं, विषयेच्छानिवृत्तये।
इन्द्रियाणि प्रधावन्ति, विषयेषु शरीरिणाम्।।
5. इक्षुवद् विरसाः प्रान्ते, सेविताः स्युः परे रसाः।
सेवितस्तु रसः शान्तः, सरसः स्यात् परं परम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

6. जीवनं यत्र तत्राऽस्ति, परिस्थितिप्रताडनम्।
आलम्बनमिदं कार्यं, विजयाय परिस्थितेः।।
7. पत्थरेणाहतो कीबो, खिप्पं डसइ पत्थरं।
मिगारी उ सरं पप्प, सरुप्पत्तिं व मग्गति।।
8. तहा बालो दुही वत्थुं, बाहिरं णिंदती भिसं।
दुक्खुप्पत्ति–विणासं तु, मिगारिव्व ण पप्पति।।
9. नानामतयो लोकाः, केनाप्याक्रुष्ट एषयेतत्त्वम्।
अप्रियतामपि नीतः, शुचिना दुग्धेन मिनुयात् स्वम्।।
10. आक्रूष्टेन मतिमता, तत्त्वार्थान्वेषणे मतिः कार्या।
यदि सत्यं कः कोपः, यद्यनृतं किन्नु कोपेन?।।
11. को हि तुलामधिरोहति, शुचिना दुग्धेन सहजमधुरेण।
तप्तं विकृतं मथितं, तथापि यत् स्नेहमुद्गिरति।।
12. अनुशासनमुपनीतो, गुरुणाप्यरुणेन वाक्प्रयोगेण।
उपस्थितं तनुयात् स्वं, कलमस्याख्यातमास्पृशंस्तद्वत्।।
13. अस्मानवेहि कलमानलमाहतानां,
येषां प्रकाण्डमुशलैरवदाततैव।
स्नेहं विमुच्य सहसा खलतां प्रयान्ति,
ये स्वल्पमर्दनवशान्न वयं तिलास्ते।।
14. प्रियमप्रियमपि योग–माभेजानः सहेत समभावम्।
स्मृत्वा दशरथवाक्यं, चरितं रामस्य सम्यगापश्यन्।।
15. आहूतस्याभिषेकाय, विसृष्टस्य वनाय च।
न लक्षितो मया तस्य, स्वल्पोप्याकारविभ्रमः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

16. यैरुपकृतिराचीर्णा, तानुपनतबुद्धिरनुनयेन्नित्यम्।
मंत्रममोघममुं यो वेत्ति स विन्ते सुरक्षितं स्वस्वम्।।
17. प्रथमवयसि पीतं तोयमल्पं स्मरन्तः,
शिरसि निहितभारा नालिकेरा नराणाम्।
उदकममृततुल्यं दद्युराजीवितान्तं,
न हि कृतमुपकारं साधवो विस्मरन्ति।।
18. कलहो न हितः क्वचिदपि, परमाहारक्षणे विशेषण।
भोजनसमये कलहं, कुर्वन्नग्निं नयति मन्दत्वम्।।
19. ईर्ष्याभयक्रोधपरिक्षतेन, लुब्धेन रुग्दैन्यनिपीडितेन।
प्रद्वेषयुक्तेन च सेव्यमान–मन्नं न सम्यक् परिपाकमेति।।
20. अव्युत्पन्नमतिः स्याद्, बोध्यस्तत्राग्रहो न कर्त्तव्यः।
युक्त्या प्रतिबोधितको, मुञ्चत्यल्पाशयोऽपि दुस्त्यजकम्।।
21. कासे दध्नो भोजनेन, लाभाः सन्ति त्रयो ध्रुवम्।
न वार्धक्यं न वा चौर्यं, न श्वा भक्षयति क्वचित्।।
22. अनुकूलत्वं लब्धं, प्रतिकूलत्वं क्वचित् पुनर्लब्धम्।
समता न हि हातव्या, मुनिना सवितुस्तुलां समाश्रयता।।
23. लाभालाभे सुहे दुक्खे, जीविए मरणे तहा।
समो निन्दा–पसंसासु, तहा माणावमाणओ।।
24. अणिस्सिओ इहं लोए, परलोए अणिस्सिओ।
वासी–चन्दण–कप्पो य, असणे अणसणे तहा।।
25. उदये सविता रक्तो, रक्तश्चास्तमये तथा।
संपत्तौ च विपत्तौ च, महतामेकरूपता।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

26. केचन मृदुलात्मानः, स्वल्पं चाप्यनुभवन्ति बहुतरं कृत्वा।
पदे पदेप्यपमाना–शंकाभीताश्च तैश्चिरं चिन्त्यम्।।
27. अपमानादयस्तस्य, विक्षेपो यस्य चेतसः।
नापमानादयस्तस्य, न क्षेपो यस्य चेतसः।।
28. नापि क्वचन विवादः कार्यः, पालयतात्मगौरवं महता।
सविवादो व्यवहारं,, मानीकरोति सिद्धसेनोक्तम्।।
29. ग्रामान्तरोपगतयो–रेकामिषसंगजातमत्सरयोः।
स्यात् सख्यमपि शूनो–र्भ्रात्रोरपि वादिनोर्न स्यात्।।
30. सहजगुणो नम्रत्वं, परमवलेपं व्रजेद् मुनिः कश्चित्।
बहुश्रुतत्वं प्राप्त–स्तत्रागदमाप्नुयात् प्रवरम्।।
31. ज्ञानं मददर्पहरं माद्यति यस्तेन तस्य को वैद्यः।
अगदो यस्य विषायति, तस्य चिकित्सा कथं क्रियते।।

5. शान्तसहवाससूत्रम्

1. एका मम जिज्ञासा–शासे पूर्णा भविष्यति प्रकटम्।
कथमायामि मुनीश्वर! शान्तं सहवासमत्र समुदाये।।
2. सुखमिष्टं सर्वेषां, नाशान्तस्तत् क्वचित् क्षणं लभते।
संभाव्यं किमिदं स्यात्? सहवासश्चापि शान्तिरपि।।
3. अभावितात्मा न हि शान्तिमेति, तिष्ठन्निहैकोपि जनः कथंचित्।
न भावितात्मा बहुषु स्थितोऽपि, व्रजेदशान्तिं तव वच्मि तथ्यम्।।
4. को भावितात्मा भगवन्! प्रवाच्यो? जिज्ञासुरस्मि प्रतिबोद्धुमेतत्।
यो वस्तुसत्येन मनःप्रवृत्तिं, प्रयुक्तवानस्ति स भावितात्मा।।
5. एकत्वमाप्तोऽपि वसन् समूहे, परानपेक्षेत गुणनुकारे।
परानुपेक्षेत गुणोपरोधे, स भावितात्मा चिरमेति शान्तिम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

6. इच्छन्नपि परां शान्तिमेकस्तां नाधिगच्छति।
कारणं किं प्रभो! तत्र, ज्ञातुमिच्छामि संप्रति।।
7. किं नाकर्णि त्वया शिष्य! सुभाषितमिदं वचः।
अज्ञानं सर्वपापेभ्यः, पापमस्ति महत्तरम्।।
8. अज्ञानं खलु कष्टं, क्रोधादिभ्योपि सर्वपापेभ्यः।
अर्थं हितमहितं वा, न वेत्ति येनावृतो लोकः।।
9. अज्ञानस्य जिहासायै, किंचिदिच्छामि भाषितम्।
यदि नो कष्ट–संस्पर्शस्तद् देश्यो देव! संप्रति।।
10. अन्योन्यं वत्स! सन्देहो, निरपेक्षा मनःस्थितिः।
अभावः सहयोगस्य, स्वार्थसिद्धेः प्रधानता।।
11. अपालनं समत्वस्य, मर्यादाया उपेक्षणम्।
न्यूना कर्त्तव्यनिष्ठा च, सुतरामसहिष्णुता।।
12. स्वच्छन्दा वृत्तिरज्ञानमनुशासन–पद्धतेः।
अविवेक इमे स्पष्टमशान्तेः सन्ति हेतवः।।
13. सन्देहेन द्वैधभावश्च तेन, नैकात्मत्वं तद् बिना नैव शान्तिः।
सन्देहेनोच्छेदमाप प्रसिद्धं, संघो नूनं वृज्जिकानां सुशक्तः।।
14. सापेक्षत्वं पश्य तत् सूत्रमस्ति, येनाऽन्योन्यं वीक्षतेऽनन्यदृष्ट्या।
यत्रान्योन्यं नाम नाऽपेक्षतेपि, संघोच्छेदो जायते तत्र नूनम्।।
15. साधूनामात्मसान्निध्ये, युक्तास्ति निरपेक्षता।
किन्तु देहस्य सान्निध्ये, सापेक्षत्वमपीप्सितम्।।
16. सापेक्षत्वविकासेन, सहयोगोऽभिवर्धते।
सहयोगस्य भावोऽस्ति, तत्र प्रीतिः परा भवेत्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

17. अस्ति प्रीतिः परा यत्र, स्वार्थस्तत्रैति गौणताम्।
यत्र स्वार्थविमोक्षोस्ति, विश्वासस्तत्र राजते।।
18. स्वार्थवृत्तिरिहैकस्य, द्वितीये परिवर्तनम्।
तावज्जनयति प्रायो, यावच्छक्यं न कल्पितुम्।।
19. नियमास्तत्कृतेऽन्ये स्युः, येन स्वार्थः प्रसिद्ध्यति।
नियमास्तत्कृतेऽन्ये च, येन स्वार्थो न सिद्ध्यति।।1
20. सम्बन्धानपरान् सर्वान्, गौणीकृत्य प्रपश्यति।
स्वार्थसिद्धिं प्रमुख्येन, स्वार्थदृष्टिरसौ जनः।।
21. स्वार्थस्तनुते चक्षुरन्धं मोहेन भावितं भूयः।
कुर्वंश्चेतोभंगं, वैषम्यं प्रतिचरणमपि जनयन्।।
22. स्वार्थबुद्धेः प्रधानत्वं, वैषम्यमिति पर्ययः।
अविवेको हि वैषम्यं, विवेकः साम्यमुच्यते।।
23. एकः कार्यरतो नित्यमपरो बहुधाऽलसः।
समदृष्ट्या कथं दृश्यौ, प्रश्नोऽयं विद्यते महान्।।
24. निर्विशेषं यदा स्वामी, समं भृत्येषु वर्तते।
तत्रोद्यमसमर्थानामुत्साहः परिहीयते।।
25. न मुनिः कश्चन भृत्यः, न स्वामी कोपि विद्यते विबुधः।
तेन समारोपोऽयं, न हि करणीयो विषमताजननः।।
26. सेवा कार्या स्वात्मधर्मं विचिन्त्य,
विद्या देया स्वात्मधर्मं विचिन्त्य।
विद्या ग्राह्या नेति बुद्ध्यैव सेवा,
सेवा प्राप्ता नेति बुद्ध्यैव विद्या।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

27. त्यक्त्वा विनिमयबुद्धिं, पश्यत कर्त्तव्यमात्मनो विमलम्।
स्वार्थः सेत्स्यति सहजं, समताधर्मोऽपि सेवितो भविता।।
28. इच्छासामाचारीविहितः सर्वोऽपि साधुसहयोगः।
तेनात्माधीनोऽयं, साधूनां भवति सहयोगः।।
29. मर्यादां पालयत्येक, एकश्च तामुपेक्षते।
एकः कर्त्तव्यनिष्ठश्च, कर्त्तव्योपेक्षको परः।।
30. एकस्य जायते ग्लानिरपरस्य भयं ततः।
एवमान्तरसम्बन्धविच्छेदो जायते ध्रुवम्।।
31. विधाय विस्तृतं प्रेम, जेतव्या ग्लानिरुद्धता।
मान्द्यं विनाशमागच्छेत् प्रतिबोध्यास्तथा पटुः।।
32. मृदुमध्याधिमात्राभिः प्रतिबोध्या भवन्त्यमी।
न तु सर्वत्र पन्थाः स्यादेक एवावलम्बितः।।
33. भोजनं नित्यकार्यञ्च, विभाज्यमथवा न हि।
किन्तु वैषम्यबुद्धिस्तु, निवार्या मुनिसत्तमैः।।
34. यथेष्टं आहरेते द्वौ, भवत्येक उपेक्षितः।
अशान्तसहवासस्य, बीजमेतत् परिस्फुटम्।।
35. तिस्रः स्युर्व्यापृताः कार्ये, नैका व्यापारमाश्रिता।
अशान्तसहवासस्य, बीजमेतत् परिस्फुटम्।।
36. सर्वे स्युः सहभुंजानाः, सर्वे स्युः कार्यव्यापृताः।
शान्तस्य सहवासस्य, बीजमेतत् परिस्फुटम्।।
37. भारदानेऽपि वैषम्यं, दुनोति विपुलं मनः।
अशान्तसहवासस्य, बीजमेतत् परिस्फुटम्।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

38. अस्वास्थ्ये कस्यचित् सेवा, सम्यक् कश्चिदुपेक्षितः।
अशान्तसहवासस्य, बीजमेतत् परिस्फुटम्।।
39. प्रमादे कश्चिदाक्रुष्टः नोपालब्धो भवेत् परः।
अशान्तसहवासस्य, बीजमेतत् परिस्फुटम्।।
40. समभाराः समसेवाः, सति प्रमादे समप्रतीकाराः।
शान्तं सहवासं ते, मुनयो जनयन्ति निर्मलाचाराः।।
41. भेदं जनयति भेदबुद्धिरभेदं ह्यभेदबुद्धिश्च।
वैषम्यं न तु कार्ये, तत्प्रतिबिम्बं हि भेदबुद्धिकृतम्।।
42. अभेदबुद्धिः स्थिरतामुपैति, तदा न वैषम्यमतिर्विजृम्भेत्।
समं मनो हि समतां प्रसूते, वैषम्यमेवं विषमं मनो हि।।
43. तेनान्तस्तलतुलया, स्वमनः कामं प्रतोलनीयं स्यात्।
तेन विशदभावेन, यो लिप्सुः शान्तसहवासम्।।
44. द्रव्यं क्षेत्रं कालं भावं, संप्राप्य भवति वैषम्यम्।
परमिह समवृत्तीनां, वैषम्यं नानुभूतं स्यात्।।
45. संघाटकान्यनेकानि, मिलितानि क्वचित् पुनः।
सामञ्जस्यं स्थापयेयुः, सौहार्दस्य परस्परम्।।
46. भारदानादिकं कार्यमसामञ्जस्य रूपकम्।
अशान्तसहवासस्य, प्रायो हेतुः प्रजायते।।
47. परस्यासन्निहितस्य, स्थितिं वीक्ष्यापरोप्यसौ।
सेवां संतुलितामेव गृह्णीयात् स्वानुगैस्तदा।।
48. अपि शारीरं कष्टं, मानसमप्युद्भवं कदाचिदियात्।
सोढुं तदशक्तानां, सहवासोऽशान्तिमारभते।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

49. कनिष्ठं कर्हिचिज्ज्येष्ठः, कदाचित् तं कनिष्ठकः।
सहेत सुधिया शान्तसहवासस्य हेतवे।।
50. आकस्मिकस्तु संप्राप्तः आवेगः कस्यचिद् भवेत्।
तदाऽपरेण मौनस्यालम्बनं क्रियतां वरम्।।
51. मौनं नालम्बितुं शक्यं, यदि सामान्यभावतः।
तदा श्वासनिरोधस्यालम्बनं क्रियतां क्षणम्।।
52. नैव शक्यमिदं चापि, तदा स्थानं तदुत्सृजेत्।
क्षणमन्यत्र गत्वा हि, स्थेयं क्रोधोपशान्तये।।
53. आवेगो वर्धते नूनमावेगं प्राप्य सम्मुखे।
आवेगोऽप्रतिमल्लस्तु, क्षणेनैवोपशाम्यति।।
54. आवेगः सम्मुखं स्वस्य, प्रत्यावेगं प्रपश्यति।
तदा स दीर्घजीवी स्यादभिमानपुरस्सरम्।।
55. आवेगः सम्मुखं स्वस्य, प्रत्यावेगं न पश्यति।
तदा स मृत्युमाप्नोति, पश्चात्तापपुरस्सरम्।।
56. प्रमादं कुरुते भूयः, उक्तः सोढुं न शक्यते।
अशान्तसहवासस्य, हेतुरेष महान् भवेत्।।
57. तेन सहिष्णुर्भावो, मुनिना सम्यग् विकासमानेयः।
तेन विशदभावेन, यो लिप्सुः शान्त–सहवासम्।।
58. नानुभवः परिपक्वस्तेन ज्येष्ठानुभूतिरनुकार्या।
स्वच्छन्दानां प्रायः, सहवासोऽशान्तिमारभते।।
59. मनोवैज्ञानिकी बाढमनुशासनपद्धतिः।
तदा स्वच्छन्दता नैव, वृद्धिं कदाचिदृच्छति।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

60. नाक्रोशपूर्वकं शिक्षादानेनान्यो विशुद्ध्यति।
प्रतिकारात्मकं भावं, प्राप्य श्रोता विमुह्यति।।
61. प्रमादस्यानुभूतिं यो, भवेत् कारयितुं क्षमः।
तादृशं शिक्षकं प्राप्य, शुद्धिमेत्यनुशासितः।।
62. परिणामं प्रमादस्य, योनुभूतिं नयेत् पटुः।
स लोहं गालयित्वैव, सन्धत्तेऽन्येन चायसा।।
63. आज्ञाशब्दप्रयोगस्तु, कर्त्तव्यो न यदा कदा।
यत्र प्रयुज्यते तत्र, मौनमेवानुगामिनाम्।।
64. अविवेको भवेत् शैक्षः, सोऽशान्तोऽशान्तिमाक्षिपेत्।
तत्रोपायस्तथा कार्यो, विवेको येन वर्धते।।
65. नोपदेशो बहु कार्यः, निर्देशालम्बनं सृजेत्।
उपदेशो मनः स्थूलं, प्रभावयति निश्चितम्।।
66. निर्देशो भावयत्येव, सूक्ष्मं मानसमद्भुतम्।
तेन निर्देशविधिना, सविज्ञैरुपचर्यताम्।।
67. एवं नानाविधैः सम्यक्, प्रयत्नैर्मुनिसत्तमाः।
प्राप्नुवन्तु प्रियं शान्तं सहवासं प्रतीक्षितम्।।

प्रशस्तिः

1. शासनतरुमुन्नेतुं, सुरसरितासलिलसेकनिभम्।
पुण्यं हृदयोद्भूतं, भविता चिरमत्र पंचसूत्रमिदम्।।
2. अस्त्यनुशास्तिः प्रथमा, तामनुधावत्यलं व्यवस्थापि।
चर्या तामनुगच्छति, सालम्बः शान्तसहवासः।।
3. व्युत्पादयितुमबोधान्, व्युत्पन्नान् प्रेरयितुमवसन्नान्।
ग्रन्थोऽयं प्राणायि, तुलसीगणिनोपलब्धतथ्येन।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

4. वैक्रमे द्विसहस्राब्दे, द्वाविंशत्युत्तरे वरे।
सप्तम्यां माघशुक्लायां, हिसारे नगरे शुभे।।
5. आचार्याणां प्रसादेन, सर्वेषां पूर्ववर्तिनाम्।
नित्यं नवनवोन्मेषो, वर्तते शासने महान्।।
6. जाता स्थितिः शुभनिकायचतुष्टयस्य,
जाता निकायसचिवस्य वरा नियुक्तिः।
जातो महोदयमहोत्सवसंपदानां,
सम्यग् विकासविचयो विजयश्रियश्च।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

२६. जैन सिद्धान्त दीपिका

● आचार्य तुलसी

आराध्याराध्यदेवं स्वं, सिद्धं सिद्धार्थनन्दनम्।
विदधे बोधवृद्ध्यर्थं, जैनसिद्धान्तदीपिकाम्।।

प्रथमः प्रकाशः

१. धर्माधर्माकाश-पुद्गल-जीवास्तिकाया द्रव्याणि।
२. कालश्च।
३. गुणपर्यायाश्रयो द्रव्यम्।
४. गतिसहायो धर्मः।
५. स्थितिसहायोऽधर्मः।
६. अवगाहलक्षण आकाशः।
७. लोकोऽलोकश्च।
८. षड्द्रव्यात्मको लोकः।
९. जीवपुद्गलयोर्विविधसंयोगैः स विविधरूपः।
१०. संयोगश्चापश्चानुपूर्विकः।
११. कर्मशरीरोपग्रहरूपेण त्रिविधः।
१२. चतुर्धा तत्स्थितिः।
१३. शेषद्रव्यशून्यमाकाशमलोकः।
१४. स्पर्शरसगन्धवर्णवान् पुद्गलः।
१५. शब्द-बन्ध-सौक्ष्म्य-स्थौल्य-संस्थान-भेद-तमश्छाया-तपोद्योत-प्रभावांश्च।
१६. परमाणुः स्कन्धश्च।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

१७. अविभाज्यः परमाणुः।
१८. तदेकीभावः स्कन्धः।
१९. तद्भेदसंघाताभ्यामपि।
२०. स्निग्धरूक्षत्वाद् अजघन्यगुणानाम्।
२१. द्व्यधिकादिगुणत्वे सदृशानाम्।
२२. कालः समयादिः।
२३. वर्तना-परिणाम-क्रिया-परत्वापरत्वादिभिर्लक्ष्यः।
२४. आद्यत्रीणि एकद्रव्याणि अगतिकानि।
२५. असंख्येयाः प्रदेशा धर्माधर्मलोकाकाशैकजीवानाम्।
२६. अलोकस्यानन्ताः।
२७. संख्येयाऽसंख्येयाश्च पुद्गलानाम्।
२८. न परमाणोः।
२९. कालोऽप्रदेशी।
३०. बुद्धिकल्पितो वस्त्वंशो देशः।
३१. निरंशः प्रदेशः।
३२. कृत्स्नलोकेऽवगाहो धर्माधर्मयोः।
३३. एकप्रदेशादिषु विकल्प्यः पुद्गलानाम्।
३४. असंख्येयभागादिषु जीवानाम्।
३५. कालः समयक्षेत्रवर्ती।
३६. सहभावी धर्मो गुणः।
३७. सामान्यो विशेषश्च।
३८. अस्तित्व-वस्तुत्व-द्रव्यत्व-प्रमेयत्व-प्रदेशवत्त्व-अगुरु-लघु-त्वादिः सामान्यः।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

३९. गतिस्थित्यवगाहवर्तनाहेतुत्व-स्पर्शरसगन्धवर्ण-ज्ञानदर्शन-सुख-वीर्य-चेतनत्वाचेतनत्व-मूर्त्तत्वाऽमूर्त्तत्वादिर्विशेषः।
४०. पूर्वोत्तराकारपरित्यागादानं पर्यायः।
४१. व्यञ्जनार्थभेदेन स्वभाव-विभावभेदेन चास्य द्वैविध्यम्।
४२. स्थूलः कालान्तरस्थायी शब्दानां संकेतविषयो व्यञ्जनपर्यायः।
४३. सूक्ष्मो वर्तमानवर्ती अर्थपरिणामः अर्थपर्यायः।
४४. परनिमित्तानपेक्षः स्वभावपर्यायः।
४५. परनिमित्तापेक्षो विभावपर्यायः।
४६. एकत्व-पृथक्त्व-संख्या-संस्थान-संयोग-विभागास्त-ल्लक्षणम्।

इति द्रव्यगुणपर्यायस्वरूपनिर्णयात्मकः प्रथमः प्रकाशः

द्वितीयः प्रकाशः

१. जीवाऽजीव-पुण्य-पापाश्रव-संवर-निर्जरा-बन्ध-मोक्षास्तत्त्वम्।
२. उपयोगलक्षणो जीवः।
३. चेतनाव्यापारः उपयोगः।
४. साकारोऽनाकारश्च।
५. पर्यायग्राहित्वाज्ज्ञानं साकारः।
६. ध्रौव्यग्राहित्वाद् दर्शनमनाकारः।
७. मति-श्रुतावधि-मनःपर्याय-केवलानि ज्ञानम्।
८. इन्द्रियमनोनिबन्धनं मतिः।
९. श्रुतनिश्रितेतरे।
१०. अवग्रहेहावायधारणाभेदात् श्रुतनिश्रिता चतुर्धा।
११. इन्द्रियार्थयोगे दर्शनानन्तरं सामान्यग्रहणमवग्रहः।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

१२. व्यञ्जनार्थयोः।
१३. अमुकेन भाव्यमिति प्रत्यय ईहा।
१४. अमुक एवेत्यवायः।
१५. तस्यावस्थितिर्धारणा।
१६. औत्पत्तिकी-वैनयिकी-कार्मिकी-पारिणामिकी इति चतस्रो बुद्धय अश्रुतनिश्रिताः।
१७. अदृष्टाश्रुतार्थग्राहिणी औत्पत्तिकी।
१८. विनयसमुत्था वैनयिकी।
१९. कर्मसमुत्था कार्मिकी।
२०. परिणामजनिता पारिणामिकी।
२१. जातिस्मृतिरपि मतेर्भेदः।
२२. द्रव्यश्रुतानुसारि परप्रत्यायनक्षमं श्रुतम्।
२३. अक्षर-संज्ञि-सम्यक्-सपर्यवसित-गमिकाङ्गप्रविष्टानि सप्रति-पक्षाणि।
२४. आत्ममात्रापेक्षं रूपिद्रव्यगोचरमवधिः।
२५. भवप्रत्ययो देवनारकाणाम्।
२६. क्षयोपशमनिमित्तश्च शेषाणाम्।
२७. अनुगामि-अननुगामि-वर्धमान-हीयमान-प्रतिपाति-अप्रतिपातिभेदादसौ षोढा।
२८. मनोद्रव्यपर्यायप्रकाशि मनःपर्यायः।
२९. ऋजु-विपुलमती।
३०. विशुद्धि-क्षेत्र-स्वामि-विषयभेदादवधेर्भिन्नः।
३१. निखिलद्रव्यपर्यायसाक्षात्कारि केवलम्।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

३२. मति-श्रुत-विभंगा मिथ्यात्वसाहचर्यादज्ञानम्।
३३. चक्षुरचक्षुरवधिकेवलानि दर्शनम्।
३४. प्रतिनियतविषयग्राहि इन्द्रियम्।
३५. स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्राणि।
३६. द्रव्यभावभेदानि।
३७. निर्वृत्त्युपकरणे द्रव्येन्द्रियम्।
३८. लब्ध्युपयोगौ भावेन्द्रियम्।
३९. स्पर्श-रस-गन्ध-रूप-शब्दास्तद्विषयाः।
४०. सर्वार्थग्राहि त्रैकालिकं मनः।
४१. कर्मणामुदयविलयजनितः चेतनापरिणामो भावः।
४२. परिणमनं वा।
४३. औपशमिक-क्षायिक-क्षायोपशमिका भावाः स्वरूपं जीवस्य।
४४. औदयिकपारिणामिकावपि।
४५. मोहकर्मणो वेद्याभाव उपशमः।
४६. निर्मूलनाशः क्षयः।
४७. घातिकर्मणो विपाकवेद्याभावः क्षयोपशमः।
४८. वेद्यावस्था उदयः।
४९. स्वस्वभावे परिणमनं परिणामः।
५०. औपशमिकस्य सम्यक्त्वचारित्रे।
५१. क्षायिकस्य ज्ञान-दर्शन-सम्यक्त्व-चारित्र-अप्रतिहत-वीर्यादयः।
५२. क्षायोपशमिकस्य ज्ञानाऽज्ञान-दर्शन-दृष्टि-चारित्र-संयमा-संयम-वीर्यादयः।
५३. औदयिकस्य अज्ञान-निद्रा-सुख-दुःख-आश्रव-वेद-आयु-

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

र्गति-जाति-शरीर-लेश्या-गोत्र-प्रतिहतवीर्यत्व-छद्मस्थ-असिद्धत्वादयः।

इति जीवस्वरूपनिर्णयात्मकः द्वितीयः प्रकाशः

तृतीयः प्रकाशः

१. जीवा द्विधा।
२. संसारिणः सिद्धाश्च।
३. संसारिणस्त्रसस्थावराः।
४. पृथिवी-अप्-तेजो-वायु-वनस्पतिकायिका एकेन्द्रियाः स्थावराः।
५. द्वीन्द्रियादयस्त्रसाः।
६. समनस्काऽमनस्काश्च।
७. नारकदेवा गर्भजतिर्यङ्मनुष्याश्च समनस्काः।
८. अन्येऽमनस्काः।
९. पर्याप्ताऽपर्याप्तादयोऽपि।
१०. भवारम्भे पौद्गलिकसामर्थ्यनिर्माणं पर्याप्तिः।
११. आहार-शरीर-इन्द्रिय-उच्छ्वासनिःश्वास-भाषा-मनांसि।
१२. जीवनशक्तिः प्राणः।
१३. इन्द्रियबलोच्छ्वासनिःश्वासाऽऽयूंषि।
१४. गर्भोपपातसंमूर्च्छनानि जन्म।
१५. जराय्वण्डपोतजानां गर्भः।
१६. देवनारकाणामुपपातः।
१७. शेषाणां संमूर्च्छनम्।
१८. सचित्ताऽचित्त-शीतोष्ण-संवृत-विवृतास्तन्मिश्राश्च योनयः।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

१९. अचेतनः अजीवः।
२०. धर्माधर्माकाशकालपुद्गलास्तद्भेदाः।

इति जीवाजीवभेदनिर्णयात्मकस्तृतीयः प्रकाशः

चतुर्थः प्रकाशः

१. आत्मप्रवृत्त्याकृष्टास्तत्प्रायोग्यपुद्गलाः कर्म।
२. तच्चावरण-विकार-प्रतिघात-शुभाशुभ-हेतु।
३. ज्ञानदर्शनावरणवेदनीयमोहनीयायुष्कनामगोत्रान्तरायभेदादष्टधा।
४. घाति अघाति च।
५. बन्ध-उद्वर्तना-अपवर्तना-सत्ता-उदय-उदीरणा-संक्रमण-उपशम-निधत्ति-निकाचनास्तदवस्थाः।
६. कर्मपुद्गलादानं बन्धः।
७. प्रकृतिस्थित्यनुभागप्रदेशास्तद्भेदाः।
८. सामान्योपात्तकर्मणां स्वभावः प्रकृतिः।
९. कालावधारणं स्थितिः।
१०. विपाकोऽनुभागः।
११. दलसंचयः प्रदेशः।
१२. शुभं कर्म पुण्यम्।
१३. तच्च धर्माविनाभावि।
१४. अशुभं कर्म पापम्।
१५. द्रव्यभावभेदादेते बन्धाद् भिन्ने।
१६. कर्माकर्षणहेतुरात्मपरिणाम आश्रवः।
१७. मिथ्यात्वमविरतिः प्रमादः कषायो योगश्च।
१८. अतत्त्वे तत्त्वश्रद्धा मिथ्यात्वम्।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

१९. आभिग्रहिकमनाभिग्रहिकं च।
२०. अप्रत्याख्यानमविरतिः।
२१. अनुत्साहः प्रमादः।
२२. रागद्वेषात्मकोत्तापः कषायः।
२३. क्रोधमानमायालोभात्मा।
२४. प्रत्येकमनन्तानुबन्धि-अप्रत्याख्यान-प्रत्याख्यान-संज्वलन-भेदाच्चतुर्धा।
२५. काय-वाङ्-मनो-व्यापारो योगः।
२६. शुभोऽशुभश्च।
२७. यत्र शुभयोगस्तत्र नियमेन निर्जरा।
२८. योगवर्गणान्तर्गतद्रव्यसाचिव्याद् आत्मपरिणामो लेश्या।
२९. कृष्ण-नील-कापोत-तेजः-पद्म-शुक्लाः।

इति बन्ध-पुण्य-पाप-आश्रवस्वरूपनिर्णयात्मकश्चतुर्थः प्रकाशः

पञ्चमः प्रकाशः

१. आश्रवनिरोधः संवरः।
२. सम्यक्त्वं विरतिरप्रमादोऽकषायोऽयोगश्चेति पञ्चधा।
३. तत्त्वे तत्त्वश्रद्धा सम्यक्त्वम्।
४. औपशमिक-क्षायिक-क्षायोपशमिक-सास्वादन-वेदकानि।
५. निसर्गजं निमित्तजञ्च।
६. द्वयञ्च करणापेक्षमपि।
७. परिणामविशेषः करणम्।
८. यथाप्रवृत्त्यपूर्वाऽनिवृत्तिभेदात् त्रिधा।
९. शम-संवेग-निर्वेदानुकम्पाऽऽस्तिक्यानि तल्लक्षणम्।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

१०. शंका-कांक्षा-विचिकित्सा-परपाषण्डप्रशंसासंस्तवास्तदति-चारः।
११. निःशंकित-निष्कांक्षित-निर्विचिकित्सित-अमूढदृष्टि-उपबृंहण-स्थिरीकरण-वात्सल्य-प्रभावनास्तदाचारः।
१२. सावद्यवृत्तिप्रत्याख्यानं विरतिः।
१३. अध्यात्मलीनता अप्रमादः।
१४. क्रोधाद्यभावोऽकषायः।
१५. अप्रकम्पोऽयोगः।
१६. तपसा कर्मविच्छेदादात्मनैर्मल्यं निर्जरा।
१७. उपचारात्तपोऽपि।
१८. सकामाऽकामा च।
१९. कृत्स्नकर्मक्षयादात्मनः स्वरूपावस्थानं मोक्षः।
२०. अनावृत-ज्ञान-दर्शनो निर्धूतमोहो विदेह आत्मा सिद्धः।
२१. सिद्धो बुद्धो मुक्तः परमात्मा परमेश्वर ईश्वर इत्यनर्थान्तरम्।
२२. ते चानन्ता अपुनरावृत्तयश्च।
२३. तीर्थातीर्थ-तीर्थंकरातीर्थंकर-स्वान्य-गृह-स्त्रीपुंनपुंसकलिंग-प्रत्येकबुद्ध-स्वयं-बुद्ध-बुद्धबोधितैकानेकभेदात् पञ्चदशधा।
२४. मुक्त्यनन्तरमेकसमयाद् ऊर्ध्वं गच्छन्त्यालोकान्तात्।
२५. ईषत्प्राग्भारा पृथ्वी तन्निवासः।
२६. तत्त्वद्वय्यां नवतत्त्वावतारः।
२७. अरूपिणो जीवाः।
२८. अजीवा रूपिणोऽपि।

इति संवरनिर्जरामोक्षस्वरूपनिर्णयात्मकः पञ्चमः प्रकाशः

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

षष्ठः प्रकाशः

१. सम्यग्दर्शन-ज्ञान-चारित्र-तपांसि मोक्षमार्गः।
२. यथार्थदृष्टिः सम्यग्दर्शनम्।
३. यथार्थबोधः सम्यग्ज्ञानम्।
४. महाव्रतादीनामाचरणं सम्यक्चारित्रम्।
५. सामायिक-छेदोपस्थाप्य-परिहारविशुद्धि-सूक्ष्मसंपराय-यथाख्यातानि।
६. अहिंसा सत्यमस्तेयं ब्रह्मचर्यमपरिग्रहश्च महाव्रतम्।
७. प्राणानामनतिपातः सर्वभूतेषु संयमः अप्रमादो वा अहिंसा।
८. सद्भावोद्भावनं सत्यम्।
९. अदत्ताग्रहणम् अस्तेयम्।
१०. इन्द्रियमनःसंयमो ब्रह्मचर्यम्।
११. ममत्वविसर्जनम् अपरिग्रहः।
१२. ईर्या-भाषा-एषणा-आदाननिक्षेप-उत्सर्गाः समितिः।
१३. युगमात्रभूमिं चक्षुषा प्रेक्ष्य गमनं ईर्या।
१४. अनवद्यभाषणं भाषा।
१५. निर्दोषान्नपानादेरन्वेषणम् एषणा।
१६. उपध्यादेः सयत्नं व्यापरणम् आदाननिक्षेपः।
१७. उच्चारादेः सविधि परिष्ठापनम् उत्सर्गः।
१८. मनोवाक्कायसंवरो गुप्तिः।
१९. मनःस्थैर्याय अनित्याद्यर्थानुप्रेक्षणं अनुप्रेक्षा।
२०. पुनः पुनरासेवनमभ्यासो वा भावना।
२१. अनित्य-अशरण-भव-एकत्व-अन्यत्व-अशौच-आश्रव-

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

संवर-निर्जरा-धर्म-लोक-बोधिदुर्लभताश्च।

२२. देशतश्चाणुव्रतशिक्षाव्रते।

२३. स्थूलहिंसा-मृषा-स्तेयाऽब्रह्मविरतिः इच्छापरिमाणं च अणुव्रतम्।

२४. दिग्गुपभोगपरिभोग-अनर्थदण्डविरति-सामायिक-देशावकाशिक-पौषधोपवास-यथासंविभागाः शिक्षाव्रतम्।

२५. दर्शन-व्रत-सामायिक-पौषध-कायोत्सर्ग-ब्रह्म-सचित्तारम्भ-प्रेष्योद्दिष्टवर्जन-श्रमणभूताश्च प्रतिमाः।

२६. मारणान्तिकी संलेखना।

२७. परिग्रहविसर्जन-प्रवज्या-भक्तपानप्रत्याख्यानविषये पर्यालोचनं महानिर्जराहेतु।

२८. इन्द्रियमनोनिग्रहकारकमनुष्ठानं कर्मशरीरतापकत्वात् सम्यक्तपः।

२९. अनशन-ऊनोदरिका-वृत्तिसंक्षेप-रसपरित्याग-कायक्लेश-प्रतिसंलीनता बाह्यम्।

३०. आहारपरिहारोऽनशनम्।

३१. अल्पत्वमूनोदरिका।

३२. नानाभिग्रहाद् वृत्त्यवरोधो वृत्तिसंक्षेपः।

३३. विकृतेर्वर्जनं रसपरित्यागः।

३४. कायोत्सर्गाद्यासनकरणं कायक्लेशः।

३५. इन्द्रियादीनां बाह्यविषेयभ्यः प्रतिसंहरणं प्रतिसंलीनता।

३६. प्रायश्चित्त-विनय-वैयावृत्त्य-स्वाध्याय-ध्यान-व्युत्सर्गाश्चाभ्यन्तरम्।

३७. अतिचारविशुद्धये प्रयत्नः प्रायश्चित्तम्।

३८. अनाशातना-बहुमानकरणं विनयः।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

३९. परार्थव्यापृतिर्वैयावृत्त्यम्।
४०. श्रुतस्याध्ययनं स्वाध्यायः।
४१. एकाग्रे मनःसन्निवेशनं योगनिरोधो वा ध्यानम्।
४२. धर्म्यशुक्ले।
४३. आज्ञा-अपाय-विपाक-संस्थान-विचयाय धर्म्यम्।
४४. पृथक्त्ववितर्कसविचार-एकत्ववितर्काऽविचार-सूक्ष्म-क्रियाऽप्रतिपाति-समुच्छिन्नक्रियाऽनिवृत्तीनि शुक्लम्।
४५. नार्त्तरौद्रे तपः।
४६. प्रियाप्रियवियोगसंयोगे चिन्तनमार्त्तम्।
४७. वेदनायां व्याकुलत्वं निदानं च।
४८. हिंसा-अनृत-स्तेय-विषयसंरक्षणार्थं रौद्रम्।
४९. शरीरकषायादेः परित्यागो व्युत्सर्गः।

इति मोक्षमार्गनिर्णयात्मकः षष्ठः प्रकाशः

सप्तमः प्रकाशः

१. कर्मविशुद्धेर्मार्गणापेक्षाणि चतुर्दशजीवस्थानानि।
२. मिथ्यादृष्टि-सास्वादनसम्यग्दृष्टि-सम्यग्मिथ्यादृष्टि-अविरत-सम्यग्दृष्टि-देश-विरत-प्रमत्तअप्रमत्तसंयत-निवृत्तिअनिवृत्ति-बादर-सूक्ष्मसम्पराय-उपशान्तक्षीणमोह-सयोगिअयोगिकेवलिनः।
३. तत्त्वं मिथ्याश्रद्दधानो मिथ्यादृष्टिः।
४. सम्यक्त्वाच्च्यवमानः सास्वादनसम्यग्दृष्टिः।
५. मिश्रित-सम्यग्मिथ्यारुचिः सम्यग्मिथ्यादृष्टिः।
६. असंयतस्तत्त्वं श्रद्दधानश्च अविरतसम्यग्दृष्टिः।
७. संयताऽसंयतो देशविरतः।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

८. प्रमादयुक्तः सर्वविरतः प्रमत्तसंयतः।
९. प्रमादवियुक्तो ध्यानलीनः अप्रमत्तसंयतः।
१०. निवृत्तियुक्तो बादरकषायो निवृत्तिबादरः।
११. अनिवृत्तियुक्तो बादरकषायः अनिवृत्तिबादरः।
१२. उपशमकः क्षपकश्च।
१३. सत्संज्वलनसूक्ष्मलोभांशः सूक्ष्मसम्परायः।
१४. सर्वथोपशान्तक्षीणकषायौ उपशान्तक्षीणमोहौ।
१५. क्षीणघात्यचतुष्टयः प्रवृत्तिमान् सयोगिकेवली।
१६. शैलेशीं प्रतिपन्नः अयोगिकेवली।
१७. स्थितिरेषामनेकधा।
१८. सम्यग्दृष्टि-देशविरत-सर्वविरत-अनन्तवियोजक दर्शनमोह-क्षपक-उपशमक-उपशान्तमोह-क्षपक-क्षीणमोह-जिनानां क्रमशोऽसंख्येयगुणा निर्जरा।
१९. सूक्ष्मसम्परायान्तः साम्परायिको बन्धः।
२०. ईर्यापथिको वीतरागस्य।
२१. अबन्धोऽयोगी।
२२. अकेवली छद्मस्थः।
२३. चतुर्दशापि शरीरिणाम्।
२४. सुखदुःखानुभवसाधनं शरीरम्।
२५. औदारिक-वैक्रिय-आहारक-तैजस-कार्मणानि।
२६. उत्तरोत्तरं सूक्ष्माणि पुद्गलपरिमाणतश्चासंख्येयगुणानि।
२७. तैजसकार्मणे त्वनन्तगुणे।
२८. एते चान्तरालगतावपि।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

२९. वेदनादिभिरेकीभावेनात्मप्रदेशानां तत इतः प्रक्षेपणं समुद्घातः।
३०. वेदना-कषाय-मारणान्तिक-वैक्रिय-आहारक-तैजस-केवलिनः।
३१. औपपातिक-चरमशरीर-उत्तमपुरुष-असंख्येयवर्षायुषो निरुपक्रमायुषः।
३२. शेषाः सोपक्रमायुषोऽपि।
३३. अध्यवसान-निमित्त-आहार-वेदना-पराघात-स्पर्श-उच्छ्वास-निःश्वासा उपक्रमकारणानि।

इति जीवस्थानस्वरूपनिर्णयात्मकः सप्तमः प्रकाशः

अष्टमः प्रकाशः

१. अर्हन् देवः।
२. निर्ग्रन्थो गुरुः।
३. आत्मशुद्धिसाधनं धर्मः।
४. विवक्षाभेदादसौ अनेकविकल्पः।
५. अहिंसा।
६. श्रुत-चारित्रे।
७. संवर-निर्जरे।
८. स्वधीत-सुध्यात-सुतपस्यितानि।
९. ज्ञान-दर्शन-चारित्र-तपांसि।
१०. अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहाः।
११. क्षान्ति-मुक्ति-आर्जव-मार्दव-लाघव-सत्य-संयम-तपः-त्याग-ब्रह्मचर्याणि वा।
१२. आत्मोदयकारकत्वेन लोकधर्मादसौ भिद्यते।
१३. अपरिवर्तनीयस्वरूपत्वेन सर्वसाधारणत्वेन च।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

१४. ग्राम-नगर-राष्ट्र-कुल-जाति-युगादीनामाचारो व्यवस्था वा लोकधर्मः।
१५. प्रेयः सम्पादनमपि।

इति देवगुरुधर्मस्वरूपनिर्णयात्मकोऽष्टमः प्रकाशः

नवमः प्रकाशः

१. पापाचरणादात्मरक्षा दया।
२. सदुपदेशविपाकचिन्तनप्रत्याख्यानादयोऽस्या उपायाः।
३. लोके प्राणरक्षापि।
४. मोहमिश्रितत्वान्नात्मसाधनी।
५. असंयमपोषकत्वाद् बलप्रयोगादेः संभवाच्च।
६. क्वचिदियं प्रसंगजापि।
७. रागद्वेषपरिणतिर्मोहः।
८. नायं स्वपरप्रतिबन्धी।
९. स्वसामग्रीसापेक्षाऽस्य वृत्तिः।
१०. व्यष्टिसमष्ट्यादिष्वपि।
११. असंयमसुखाभिप्रायो रागः।
१२. दुःखाभिप्रायो द्वेषः।
१३. रागद्वेषराहित्यं माध्यस्थ्यम्।
१४. हिंसादेरनिवृत्तिरसंयमः।
१५. तद्विरतिः संयमः।
१६. स्वपरोपकारार्थवितरणं दानम्।
१७. संयमोपवर्धकं निरवद्यम्।
१८. सहयोगदानमुपकारः।
१९. लौकिको लोकोत्तरश्च।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

२०. आत्मविकासकृल्लोकोत्तरः।
२१. तदितरस्तु लौकिकः।
२२. इष्टसंयोगाऽनिष्टनिवृत्तेराह्लादः सुखम्।
२३. तद्विपर्ययो दुःखम्।
२४. तच्चात्मविकासावरोधि हेयम्।

इति दयादानोपकरादिस्वरूपनिर्णयात्मकः नवमः प्रकाशः

दशमः प्रकाशः

१. तत्त्वानि प्रमाण-नय-निक्षेपादिभिरनुयोज्यानि।
२. यथार्थज्ञानं प्रमाणम्।
३. अनिराकृतेतरांशो वस्त्वंशग्राही प्रतिपत्तुरभिप्रायो नयः।
४. शब्देषु विशेषणबलेन प्रतिनियतार्थप्रतिपादनशक्तेर्निक्षेपणं निक्षेपः।
५. नाम-स्थापना-द्रव्य-भावाः।
६. तदर्थनिरपेक्षं संज्ञाकर्म नाम।
७. तदर्थशून्यस्य तदभिप्रायेण प्रतिष्ठापनं स्थापना।
८. भूतभाविभावस्य कारणं अनुपयोगो वा द्रव्यम्।
९. विवक्षितक्रियापरिणतो भावः।
१०. निक्षिप्तानां निर्देशादिभिरनुयोगः।
११. निर्देश-स्वामित्व-साधनाधार-स्थिति-विधान-सत्-संख्या-क्षेत्र-स्पर्शन-कालान्तर-भावाल्पबहुताः।

इति निक्षेपस्वरूपनिर्णयात्मको दशमः प्रकाशः

प्रकाशैर्दशभिः स्पष्टैः, मिथ्यध्वान्तप्रणाशिभिः।
तत्त्वज्योतिर्मयी जीयाज्जैन सिद्धान्तदीपिकाः।।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

२७. भिक्षु न्याय कर्णिका

● आचार्य तुलसी

श्रीस्याद्वादोपदेष्टारं, तीर्थेशं त्रिशलात्मजम्।
भक्त्याभिनम्य कुर्वेहं, श्रीभिक्षुन्यायकर्णिकाम्।।

प्रथमो विभागः

१. युक्त्यार्थपरीक्षणं न्यायः।
२. प्रमाणं प्रमेयं प्रमितिः प्रमाता चेति चतुरङ्गः।
३. अर्थसिद्ध्यै तत्प्रवृत्तिः।
४. सा च लक्षणप्रमाणाभ्याम्।
५. व्यवच्छेदकधर्मो लक्षणम्।
६. अव्याप्त-अतिव्याप्त-असंभविनस्तदाभासाः।
७. लक्ष्यैकदेशवृत्तिरव्याप्तः।
८. लक्ष्यालक्ष्यवृत्तिरतिव्याप्तः।
९. लक्ष्यमात्रावृत्तिरसंभवी।
१०. यथार्थज्ञानं प्रमाणम्।
११. अयथार्थञ्च विपर्ययसंशयाऽनध्यवसायाः।
१२. अतत्त्वे तत्ताध्यवसायो विपर्ययः।
१३. अनिर्णायी विकल्पः संशयः।
१४. आभासमात्रमनध्यवसायः।
१५. प्रामाण्यनिश्चयः स्वतः परतो वा।

इति लक्षणप्रमाणस्वरूपनिर्णयात्मकः प्रथमो विभागः

द्वितीयो विभागः

१. तत् प्रत्यक्षं परोक्षञ्च।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

२. साहाय्यनिरपेक्षं प्रत्यक्षम्।
३. तच्च चेतनस्य निरावरणस्वरूपं केवलम्।
४. अपूर्णमवधिमनःपर्यायौ।
५. रूपिद्रव्यसाक्षात्करणमवधिः।
६. मनोद्रव्यपर्यायसाक्षात्कारि मनःपर्यायः।
७. अवग्रहेहावायधारणात्मकं सांव्यवहारिकम्।
८. इन्द्रियार्थयोगे दर्शनानन्तरं सामान्यग्रहणमवग्रहः।
९. व्यञ्जनार्थयोः।
१०. न नयनमनसोर्व्यञ्जनम्।
११. अमुकेन भाव्यमिति प्रत्यय ईहा।
१२. अमुक एवेत्यवायः।
१३. तस्यावस्थितिर्धारणा।
१४. असामस्त्येनापि उत्पद्यमानत्वात्, अपूर्वापूर्ववस्तुपर्याय-प्रकाशकत्वात् क्रमभावित्वाच्च एते व्यतिरिच्यन्ते।
१५. आशूत्पादात् क्वचित् क्रमानुपलक्षणमेषाम्।
१६. प्रतिनियतार्थग्रहणमिन्द्रियम्।
१७. स्पर्शरसगन्धरूपशब्दग्रहणलक्षणानि स्पर्शनरसनघ्राण-चक्षुःश्रोत्राणि।
१८. प्रत्येकं चतुर्धा।
१९. निर्वृत्त्युपकरणे पौद्गलिके।
२०. आत्मिके लब्ध्युपयोगौ।
२१. सर्वार्थग्राहि त्रैकालिकं मनः।

इति प्रत्यक्षस्वरूपनिर्णयात्मको द्वितीयो विभागः

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

तृतीयो विभागः

१. साहाय्यापेक्षं परोक्षम्।
२. मतिश्रुते।
३. इन्द्रियमनोनिबन्धनं मतिः।
४. स्मृति-प्रत्यभिज्ञा-तर्क-अनुमानानि तत्प्रकाराः।
५. संस्कारोद्बोधसंभवा तदित्याकारा स्मृतिः।
६. अनुभवस्मृतिसंभवं तदेवेदं तत्सदृशं तद्विलक्षणं तत्प्रतियोगी-त्यादि संकलनं प्रत्यभिज्ञा।
७. अन्वयव्यतिरेकनिर्णयस्तर्कः।
८. साधनात् साध्यज्ञानमनुमानम्।
९. सिसाधयिषितं साध्यम्।
१०. निश्चितसाध्याविनाभावि साधनम्।
११. सहक्रमभावनियमोऽविनाभावः।
व्याप्ति-सम्बन्ध-प्रतिबन्धादयः अस्य पर्यायाः।
१२. सहचरयोर्व्याप्यव्यापकयोश्च सहभावः।
१३. पूर्वोत्तरचरयोः कारणकार्ययोश्च क्रमभावः।
१४. स्वभावः सहभावः क्रमभावश्च भावाभावाभ्यां विधिप्रतिषेधयोः।
१५. तथोपपत्त्यन्यथानुपपत्तिभ्यां तत्प्रयोगः।
१६. असिद्ध-विरुद्ध-अनैकान्तिकास्तदाभासाः।
१७. अप्रतीयमानस्वरूपोऽसिद्धः।
१८. साध्यविपरीतव्याप्तो विरुद्धः।
१९. अन्यथाऽप्युपपद्यमानोऽनैकान्तिकः।
२०. वचनात्मकेऽनुमाने दृष्टान्तोपनयनिगमनान्यपि।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

२१. व्याप्तिप्रतीतिप्रदेशो दृष्टान्तः।
२२. अन्वयी व्यतिरेकी च।
२३. साध्यव्याप्तसाधननिरूपणमन्वयी।
२४. साध्याभावे साधनाभावनिरूपणं व्यतिरेकी।
२५. साध्यसाधनोभयविकलाः संदिग्धसाध्यसाधनोभया विपरीतान्वयश्च अन्वयिदृष्टान्ताभासाः।।
२६. असिद्धसाध्यसाधनोभयाः संदिग्धसाध्यसाधनोभया विपरीत-व्यतिरेकश्च व्यतिरेकिदृष्टान्ताभासाः।।
२७. धर्मिणि साधनस्योपसंहार उपनयः।
२८. साध्यस्य निगमनम्।
२९. प्रतिषेधश्चतुर्धा प्राक् प्रध्वंस इतरेतरोऽत्यन्तश्च।
३०. उत्पत्तेः पूर्वं कारणे कार्यस्याऽसत्त्वं प्राक्।
३१. लब्धात्मलाभस्य विनाशः प्रध्वंसः।
३२. परस्परापोह इतरेतरः।
३३. सर्वदा तादात्म्यनिवृत्तिरत्यन्तः।
३४. अन्यथानिर्विकारानन्तसर्वैकात्मकतोपपत्तेः।
३५. कार्यनिष्पत्त्यपेक्षं कारणम्।
३६. उपादाननिमित्तभेदाद् द्वयम्।
३७. कारणमेव कार्यतया परिणमद् उपादानम्।
३८. साक्षात् साहाय्यकारि निमित्तम्।
३९. तद्व्यापारानन्तरं भावि कार्यम्।।
४०. सकर्तृकाऽकर्तृकम्।

इति मतिस्वरूपनिर्णयात्मकस्तृतीयो विभागः

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

चतुर्थो विभागः

१. शब्दाद्यनुसारिणी मतिरेव श्रुतम्।
२. तदाप्तवचनाज्जातमागमः।
३. यथार्थविद् यथार्थवादी चाप्तः।
४. लौकिकोऽलौकिकश्च।
५. सहजसामर्थ्यसमयाभ्यां शब्दोऽर्थप्रतिपत्तिहेतुः।
६. अर्थप्रकाशकत्वमस्य स्वाभाविकं प्रदीपवत्, यथार्थत्व-मयथार्थत्वञ्च वक्तृगुणदोषानुसारि।
७. अर्पणानर्पणाभ्यामनेकान्तात्मकार्थप्रतिपादनपद्धतिः स्याद्वादः।
८. विधिनिषेधविकल्पैः सोऽनेकभङ्गः।
९. यथा स्यादस्त्येव, स्यान्नास्त्येव, स्यादवक्तव्यमेवेति।
१०. प्रमाणं स्वावरणविलययोग्यतया प्रतिनियतार्थप्रकाशि।
११. स्वार्थं परार्थञ्च।
१२. यत् परार्थं तन्नयवाक्यापरपर्यायः सद्वाद एव।

इति श्रुतस्वरूपनिर्णयात्मकश्चतुर्थो विभागः

पञ्चमो विभागः

१. अनिराकृतेतरांशो वस्त्वंशग्राही प्रतिपत्तुरभिप्रायो नयः।
२. द्रव्यार्थिकः पर्यायार्थिकश्च।
३. नैगमः संग्रहो व्यवहारश्चेति त्रिधा द्रव्यार्थिकः।
४. भेदाभेदग्राही नैगमः।
५. संकल्पग्राही च।
६. अभेदग्राही संग्रहः।
७. परोऽपरश्च।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

८. भेदग्राही व्यवहारः।
९. ऋजुसूत्रः शब्दः समभिरूढ एवंभूतश्चेति चतुर्धा पर्यायार्थिकः।
१०. वर्तमानपर्यायग्राही ऋजुसूत्रः।
११. कालादिभेदेन ध्वनेरर्थभेदकृच्छब्दः।
१२. पर्याये निरुक्तिभेदेनार्थभेदकृत् समभिरूढः।
१३. क्रियापरिणतमर्थं तच्छब्दवाच्यं स्वीकुर्वन्नेवंभूतः।
१४. आद्याश्चत्वारोऽर्थप्रधानत्वादर्थनयाः।
१५. शेषाश्च शब्दनयाः।
१६. पूर्वः पूर्वो बहुविषयः कारणभूतः, परः परोऽल्पविषयः कार्यभूतश्च।
१७. अपरथापि नयो द्विधा-निश्चयो व्यवहारश्च।
१८. तात्त्विकार्थाभ्युपगमपरो निश्चयः।
१९. लोकप्रसिद्धार्थानुवादपरो व्यवहारः।
२०. ज्ञानक्रियाप्रधानौ क्रमाज्ज्ञानक्रियानयावपि।
२१. पक्षीकृतांशादितरांशापलापी नयाभासः।

इति नयस्वरूपनिर्णयात्मकः पञ्चमो विभागः

षष्ठो विभागः

१. प्रमाणस्य विषयः सदसन्नित्यानित्यसामान्यविशेषवाच्या-वाच्याद्यनेकान्तात्मकं वस्तु।
२. उत्पाद-व्यय-ध्रौव्यात्मकं सत्।
३. तदितरदसत्।
४. सतोऽप्रच्युतिर्नित्यम्।
५. परिणमनमनित्यम्।
६. अभेदप्रतीतेर्निमित्तं सामान्यम्।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

७. भेदप्रतीतेर्निमित्तं विशेषः।
८. गुणपर्यायभेदाद् द्विरूपः।
९. वाग्गोचरं वाच्यम्।
१०. वाचामविषयमवाच्यम्।
११. विवक्षाऽविवक्षातः संगतिः।
१२. प्रमाणस्य फलमर्थबोधः।
१३. तत् प्रमाणतः स्याद् भिन्नमभिन्नञ्च।
१४. साध्यसाधनभावेन तयोर्भेदः।
१५. एकप्रमातृतादात्म्येन चाभेदः।
१६. अवग्रहादीनां क्रमिकत्वात् पूर्वं पूर्वं प्रमाणमुत्तरमुत्तरं फलम्।

इति प्रमेयप्रमितिस्वरूपनिर्णयात्मकः षष्ठो विभागः

सप्तमो विभागः

१. स्वपरावभासी प्रत्यक्षादिप्रसिद्ध आत्मा प्रमाता।
२. चैतन्यलिङ्गोपलब्धेस्तद्ग्रहणम्।
३. न तज्जडलक्षणभूतधर्मः।
४. उपादाननियमात्।
५. नासदुत्पादः।
६. नापि मस्तिष्कमूलम्, मस्तिष्कस्य तु तत्प्रयोगहेतुमात्रत्वात्।
७. शोणितं प्राणशक्त्यनुगाम्येव।
८. प्रेत्यसद्भावाच्च।
९. शरीराग्रहरूपचेतसः संभवात् तत्सद्भावः।

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

१०. हर्षभयशोकोपलब्धिरपि पूर्वाभ्यस्तस्मृत्यनुबन्धा।

११. समानजातीयाङ्कुरोत्पादात्, शस्त्रानुपहतद्रवत्वात्, आहारेण वृद्धिदर्शनात्, अपराप्रेरितत्वे तिर्यगनियमितगतिमत्त्वात्, छेदादिभिर्ग्लान्यादिदर्शनाच्च क्रमेण पृथिव्यादीनां जीवत्वं संसाधनीयम्।

१२. त्रसानां च प्रत्यक्षसिद्धमेव।

इति प्रमातृस्वरूपनिर्णयात्मकः सप्तमो विभागः

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org

- Rajesh kumar Bengani
- Dipika Bengani
- Bidasar Tredars
- Anurag Creations
- Rinku Devi Bengani
- Bidasar Creations
- Monika Stores
- Bidasar-Kolkata

जैन विश्व भारती प्रकाशन
Books are available online at https://books.jvbharati.org
ISBN 978-81-938763-7-4
₹ 90

© Jain Vishva Bharati For Personal & Private Use Only https://books.jvbharati.org